वेदः । सामान्यग्रहणं पूर्वकाण्डे पूर्वसृष्टिवाक्यानां सङ्ग्रहार्थम् । यथास्यैव कारणत्वं, नान्यथा तथोपरिष्टाद्वक्ष्यामः । मतान्तरवज्जन्मादीनां न विकारित्वम् । किन्त्वाविर्भावतिरोभावावेव

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

ण्डस्थानामेव सृष्ट्यादिवाक्यानां कथं ग्रहणमित्यत आहुः—'**सामान्यग्रहणमि**'ति । पूर्वस्मिन्नपि काण्डे सृष्ट्यादिवाक्यानां—'**प्रजापतिरकामयते**'त्यादीनां सत्त्वात्तेषां संग्रहार्थं सामान्यग्रहणम् । ननु तत्र प्रजापतिप्रभृतीनामेव कर्तृत्वस्य प्रतीयमानत्वात्कथं ब्रह्मण एव तत्त्वं तत्राहुः—'**यथास्यैवे-त्युपरिष्टान्ननु न सर्वो वेदो ब्रह्मणो जगत्कर्तृत्वे मानमि**'त्यारभ्येत्यर्थः । ननु ब्रह्मणो जगत्कर्तृत्वे प्रपञ्चस्य कार्यत्वादब्रह्मत्वापत्तिस्तथा चायं सिद्धान्तः कस्मान्न भवतीत्यत आहुः—'**मता-न्तरवदि**'ति । ननु जन्मादिसूत्र इदमाऽनेकभूतभौतिकदेवतिर्यङ्मनुष्याऽनेकाऽद्भुतरचनायुक्तकोटि-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

र्थमित्यत आहुः—'**सामान्ये**'ति । **पूर्वकाण्डे सृष्टिवाक्यानामि**ति । भाववृत्तसूक्ते, **सो अङ्ग वेद यदि वा न वेद** इत्यादिवाक्यानामित्यर्थः । एतेन सकलवेदार्थरूपो भगवानिति सूचितम् ।

ननु केषांचिन्मते ब्रह्मणो निमित्तकारणत्वं योनिपदमपि निमित्तकारणवाचीति किमर्थं कारणत्वं ब्रह्मणः स्वीक्रियत इत्यत आहुः—'**यथे**'ति । **उपरिष्टाद**ग्रिमसूत्रे । ननु साङ्ख्यै-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

पदम् । '**सामान्ये**'ति । सर्ववेदवाचकशास्त्रपदग्रहणम् । '**पूर्वसृष्टी**'ति । पूर्वेभ्यः प्रजापतिभ्यो या सृष्टिस्तत्प्रतिपादकव्याख्यानामित्यर्थः । तथा च पूर्वकाण्डीयैरपि वाक्यैर्ब्रह्मण एव कर्तृत्वं प्रति-पाद्यत इति बोधनार्थं तथेति भावः । अन्यथा मिथोवाक्यविरोधः स्यात् । सर्वकारणता च ब्रह्मणो भज्येत ।

ननु प्रजापतिप्रभृतीनामपि श्रुतं कर्तृत्वं कथं निह्नोतुं शक्यमित्यत आहुः—'**यथे**'ति । अस्य ब्रह्मणः । '**उपरिष्टादि**'ति । समन्वयाद्यधिकरणेषु । प्रजापत्यादिरूपेणाऽपि ब्रह्मण एव कर्तृ-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

मुक्तमित्याशङ्क्य समादधते—'**सामान्यग्रहणमि**'त्यादिना । शास्तीति शास्त्रमिति व्युत्पत्त्या वेदस्य ग्रहणात्पूर्वकाण्डेऽपि **प्रजापतिरकामयते**त्यादिसृष्टिवाक्यानां विद्यमानत्वात्तैरपि ब्रह्मकारणतैव बोध्यत इति ज्ञापनाय पूर्वकाण्डोत्तरकाण्डोभयग्रहणार्थं वेदवाचकशास्त्रपदोपादानं शास्त्रयोनित्वा-दितीत्यर्थः । ननु पूर्वकाण्डे प्रजापतीनां कारणत्वोक्तेः कथं ब्रह्मैककारणकत्वं प्रपञ्चस्य सेत्स्यतीत्या-शङ्क्य समादधते—'**यथास्यैव कारणत्वमि**'त्यादिना । '**उपरिष्टादि**'ति । भाष्ये, 'ननु न सर्वो

भगवदीश्रीमदिच्छारामप्रणीतः प्रदीपः ।

सामान्यग्रहणं उपनिषत्पदमनुक्त्वा 'शास्त्रे'तिपदप्रयोगरूपम् । **पूर्वसृष्टिवाक्यानां** 'प्रजापति-रकामयते'त्यादिपूर्वकाण्डीयसृष्टिवाक्यानाम् । **सङ्ग्रहार्थं** ब्रह्मणि कारणताप्रतिपादकत्वेन सङ्ग्रहार्थमि-त्यर्थः । ननु प्रजापतिप्रभृतीनां कारणताप्रतिपादकवाक्यैस्तेषामेव कारणत्वं प्रतिपाद्यते, ननु ब्रह्मण इत्यत आहुः—'**यथे**'त्यादि । **अस्यैव** ब्रह्मण एव । एवकारेण ब्रह्मभिन्नानां कारणत्वव्यवच्छेदः । **उपरिष्टात्** अग्रिमसूत्रेषु । ननु प्रपञ्चस्योत्पत्तिमत्त्वे प्रपञ्चस्याब्रह्मत्वापत्तिरित्यत आहुः—'**मतान्तरे**'-

तथोत्तरत्र वक्ष्यते तदनन्यत्वाधिकरणे । नामलीलाया अपि न पृथङ्निरूपणम् । प्रपञ्चमध्यपातात् ।

केचित् पृथग्रूपनामप्रपञ्चकर्तृत्वं योगविभागेन प्रतिज्ञाय समन्वयादिसूत्रेष्वेव हेतून्

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

ब्रह्माण्डरूपप्रपञ्चस्यैवोक्तेस्तत्कर्तृत्वमेव तत्रोच्यत इति नामप्रपञ्चकर्ता कश्चिदन्य एव कस्मान्न भवतीत्यत आहुः—'**नामलीलाया अपी**'ति । इदमः सन्निहितविषयत्वेन नामप्रपञ्चस्याऽपि श्रोत्रादिसन्निहितत्वात्तद्विषयत्वम् । तथा च न पृथङ्निरूपणं साम्प्रतमित्यर्थः । ननु शास्त्रयोनित्वादिति पृथक्सूत्रं कृत्वा नामप्रपञ्चकर्तृत्वं तस्मिन्भिन्नतया न कुत्राऽपि प्रतिपाद्यत इति कथं न पृथङ्निरूपणं साम्प्रतमित्यत आहुः—'**केचिदि**'ति । प्रतिभातीत्यन्तो ग्रन्थो विचारणीयोऽस्ति । पुनस्तदेव दृढीकर्तुं

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

र्यावन्नामरूपात्मकप्रपञ्चजन्मादीनां प्रकृतिविकारत्वं स्वीक्रियते । कुतः । मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्तेति स्मरणात् । तथाच तत्कारणत्वं कथं ब्रह्मणः । '**मतान्तरवदि**'ति । अस्मिन्नर्थे सूत्रकारसम्मतिमाहुः—'**वक्ष्यत**' इति । द्वितीयाध्याये इति शेषः । ननु, **तस्माद्वा एतस्मादि**त्यादिवाक्येनाऽऽकाशवाय्वादिरूपार्थजनकत्वं प्रतिपादितं, नत्वाकाशवाय्वादिशब्दजनकत्वमिति न्यूनतां स्यादित्यत आहुः—'**नामे**'ति । '**प्रपञ्चे**'ति । नामरूपात्मकप्रपञ्चस्य शब्दार्थोभयरूपत्वात् । प्रपञ्चवाचकस्य पदस्य सूत्रे विद्यमानत्वान्न न्यूनतेति भावः । मतान्तरमाह—'**केचिदि**'ति । '**योगविभागेने**'ति । युज्यते लक्ष्येण सहेति योगः

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

भाव इति भावः । ननु तेषां जन्मसविकल्पसहिष्णुत्वात्कथं ब्रह्मत्वमित्यत आहुः—'**मतान्तरवदि**'ति । '**विकारित्वमि**'ति । विकुर्वन्तीति विकारिणः । **सुप्यजाताविति** ताच्छील्ये णिनिः । स्वाधारे विकारं कुर्वन्तीत्यर्थः । किन्त्वाविर्भावतिरोभावपर्याया एवेति ज्ञेयाः ।

ननु नामलीलाप्रतिज्ञार्थं सूत्रान्तरमेवेदं कुतो न स्यादित्यत आहुः—'**नामलीलाया**' इति । '**प्रपञ्चे**'ति । तथात्वेनाऽस्येत्यनेनैव तन्निर्देशादिति भावः । अत्र सूत्रद्वयं, तेन रूपनामविषयके प्रतिज्ञे अपि द्वे इति कस्यचिन्मतमनूद्य दूषयन्ति—'**केचिदित्यादि प्रतिभाती**'त्यन्तम् । अत्राऽ-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

वेदो ब्रह्मणो जगत्कर्तृत्वे मानं तपो यज्ञादियुक्तप्रजापतिप्रभृतीनामेव जगत्कारणत्वस्य पूर्वकाण्डे तत्तदुपाख्यानेष्ववगम्यमानत्वादि'नोपरिष्टाद्वक्ष्याम इत्यर्थः । ननु जन्माद्यस्य यत इत्यनेन रूपप्रपञ्चस्योक्तत्वान्नामप्रपञ्चकारणताकथनार्थं शास्त्रयोनित्वादिति वक्तव्यमतो नेदमेकं सूत्रं, किं रूपनामभेदकारणत्वनिरूपणार्थमियं द्विसूत्रीति साम्प्रतमित्याशङ्क्याऽऽहुः—'**नामलीलाया अपी**'त्यादि ।

भगवदीश्रीमदिच्छारामप्रणीतः प्रदीपः ।

त्यादि । जन्मादीत्यादिपदेन स्थितिभङ्गादीनां ग्रहणम् । **न विकारित्वं** न विकाररूपत्वम् । नन्वर्थरूपप्रपञ्चकर्तृत्वस्य ब्रह्मणि लाभेऽपि नामात्मकेऽलाभात्तत्र कश्चनान्यः कर्ता भविष्यतीत्यत आहुः—'**नामे**'त्यादि । तथा च जन्माद्यस्येत्यत्रेदंशब्देन सन्निकृष्टमात्रपरामर्शान्नामप्रपञ्चस्यापि श्रोत्रसन्निकर्षात् सोपीदंशब्देन सङ्गृहीत इति बोध्यम् ।

केचित् शङ्कराचार्याः । तेषां मते दशसूत्रं जन्माद्यधिकरणम् । तत्र प्रथमसूत्रेणार्थसृष्टि-

वर्णयन्ति । अन्वयसिध्यर्थञ्च, अतति व्याप्नोतीति अत्, शास्त्रे योनित्वं प्राप्तं तदिति । नैतत् सूत्रकार[1]सम्मतमिति प्रतिभाति । तस्मात्सर्वज्ञत्वं सर्वशक्तिमत्त्वञ्च सिद्धं निरङ्कुशजगत्कर्तृत्वेन ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

प्रकारान्तरेण प्रत्यवतिष्ठते । '**नन्वि**'ति । शास्यतेऽनेनेतिव्युत्पत्त्या शास्त्रं वेदः । तस्मिन्योनिः शास्त्रयोनिः । शास्त्रोक्तकारणत्वादिति सूत्राऽवयवस्य व्याख्यातत्वात्सर्वोऽपि वेदो ब्रह्मणो जगत्कर्तृत्वे

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

सूत्रम् । तस्य विभागेनेत्यर्थः । एवं च रूपप्रपञ्चकर्तृत्वबोधकं जन्माद्यस्येत्येकं सूत्रम् । नामप्रपञ्चकर्तृत्वबोधकं शास्त्रयोनित्वादित्यपरं सूत्रमिति विभागेन प्रतिज्ञां कृत्वेत्यर्थः । ननु सूत्रं तु पञ्चम्यन्तं अर्थादायातं यद्ब्रह्मपदं तत्प्रथमान्तमिति समानविभक्तिकत्वाऽभावेनान्वयाभावात्कथं तद्बोधकत्वं तस्येत्यत आहुः—'**समन्वयादी**'ति । तथा च समन्वयादिसूत्रादारभ्य सूत्रेषु हेतुपञ्चम्यन्तत्वं स्वीकुर्वन्ति । अत्र तु शास्त्रयोनित्वादिति प्रथमान्तत्वात् । '**शास्त्रे**'ति । सप्तम्यानिरूपितत्वमर्थः । शास्त्रनिरूपितकारणत्वाश्रयं ब्रह्मेति सूत्रार्थः । एवं च शास्त्रस्य शब्दस्वरूपत्वान्नामप्रपञ्चकर्तृत्वं भगवतः सूत्रेण बोधितमिति भावः । एतन्मतं खण्डयन्ति—'**नैतदि**'ति । '**भाती**'ति । शास्त्रयोनिरित्येतावतैव त्वदीयार्थसिद्धौ शेषवैयर्थ्यम् । मात्रालाघवस्य सूत्रकाराणां हर्षजनकत्वादक्षरद्वयगौरवस्य दुःसहत्वादिति भावः । '**जगत्कर्तृत्वेने**'ति । शास्त्रप्रतिपाद्यस्वतन्त्रजगत्कर्तृत्वलक्षणेनेत्यर्थः । प्रकृत्यादिवारणाय शास्त्रेति । केवलशास्त्रप्रतिपाद्यस्यैव लक्षणत्वे धर्मे व्यभिचार इत्यतो जगदिति । शास्त्रप्रतिपाद्यजगत्कर्तृत्वं प्रजापतेरप्यस्तीत्यतः स्वतन्त्रेति । अत्र पूर्वकाण्डं निर्भरं

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

सम्मतिबीजं तु शास्त्रयोनीत्येतावतैव तत्तथार्थलाभेऽधिकस्य वैयर्थ्यापत्तिरित्युपसंहरन्ति—'**तस्मादि**'ति । कर्तृत्वाद्यन्यथानुपपत्तेः । कर्तृत्वे किञ्चिदाशङ्कते—**नन्वि**ति । अवान्तरकारणत्वमपि तेषां

श्रीलालूभट्टकृता गूढार्थदीपिका ।

तथा च जन्माद्यस्येत्यत्रेदंशब्देन रूपनामोभयप्रपञ्चस्य ग्रहणान्न पृथक्सूत्राऽपेक्षेत्यर्थः । '**नैतत्सूत्रकारमतमि**'त्यादि । शास्त्रयोनित्वमततीति व्युत्पत्त्या शास्त्रयोनित्वादिति प्रथमान्तं ब्रह्मवाचकमिति परेषामाशयस्तं दूषयन्ति—'**नैतत्सूत्रकारमतमि**'त्यादिना । यदि सूत्रकारस्याऽयमाशयः स्यात्तदा शास्त्रयोनिरेतावदेव वदेन्न त्वधिकमतः शास्त्रयोनिरित्येतावतैव चारितार्थ्येऽपि त्वादि-

भगवदीश्रीमदिच्छारामप्रणीतः प्रदीपः ।

प्रतिज्ञा । **शास्त्रयोनित्वा**दितिसूत्रं पूर्वसूत्राद्विभज्य तन्मते पञ्चम्यर्थानन्वयात्प्रथमान्तं सूत्रमित्युक्त्वा द्वितीयसूत्रेण शब्दसृष्टिप्रतिज्ञा इत्येवंरूपं तन्मतमुपन्यस्यन्ति—'**पृथगि**'त्यादिना । **हेतून् वर्णयन्ति** समन्वयार्थहेतून् वर्णयन्तीत्यर्थः । सूत्रस्य प्रथमान्ततामुपवर्णयन्ति । '**अन्वये**'त्यादिना । तद्दूषयन्ति । '**नैतदि**'त्यादिना । दूषणं तु **शास्त्रयोनि**रेतावतैव प्रतिज्ञासिद्धेस्त्वादितिभागस्य वैयर्थ्यं नहि सर्वज्ञः सूत्रकारो व्यर्थं प्रयुङ्क्ते इति । स्वोक्तसूत्रार्थं निगमयन्ति । '**तस्मा**'दित्यादिना ।

---

[1] मतमिति लालूभट्टसंमतः पाठः ।

ननु न सर्वो वेदो ब्रह्मणो जगत्कर्तृत्वे मानम् । तपोयज्ञादिप्रयुक्तप्रजापतिप्रभृतीनामेव जगत्कारणत्वस्य पूर्वकाण्डे तत्तदुपाख्यानेष्ववगम्यमानत्वात् । नचाऽवान्तरकारणत्वम् ? । परस्याऽश्रवणात् । उत्तरकाण्डे तु द्वयप्रतिपादनाद्विरोधः । सन्देहश्च । मीमां-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

मानमित्युक्तं भवति । तन्न घटते । '**प्रजापतिरकामयते**'त्याद्युपाख्यानेषु प्रजापतिप्रभृतीनां तपोयज्ञादियुक्तानां यज्ञानां च जगत्कारणत्वस्य श्रवणात् ।

ननु यथा घटादिप्रत्यक्षे सन्निकर्षादीनामवान्तरकारणत्वेऽपि प्रमाणानां करणत्वं नाऽपगच्छति, तेषामप्यवान्तरकारणत्वं कथं ब्रह्मणः कारणत्वमुपहन्यादित्याशङ्क्याऽऽह—'**न चे**'ति । तत्र हेतुमाहुः—'**परस्ये**'ति । यथा तत्र प्रमाणानां मुख्यत्वं प्रत्यक्षसिद्धं, न तथा पूर्वकाण्डे प्रजापतिप्रभृतिभ्यः परस्य श्रवणमस्ति, येनावान्तरकारणत्वं तेषां कल्प्येत । ननूत्तरकाण्डे परस्य श्रवणाच्छास्त्रयोनित्वमप्रतिहतमेव, न ह्युत्तरस्य शास्त्रत्वं नाऽस्तीति वक्तुं शक्यम् । तथा च का वाऽनुपपत्तिरित्यत आहुः—'**उत्त-**

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

मन्यमाना ब्रह्मणि स्वातन्त्र्येण जगत्कर्तृत्वमसहमाना मीमांसकाः प्रत्यवतिष्ठन्ते—'**नन्वि**'ति । '**तपोयज्ञादियुक्ते**'ति । क्वचित्पुस्तके तपोयज्ञादिप्रयुक्तेत्यपिपाठः । '**अवगम्यमानत्वादि**'ति । **प्रजापतिरकामयत, प्रजाः सृजेये**त्यादिना तपःसाहचर्येण प्रजापतेर्यज्ञसाहचर्येणान्यस्य जगत्करणत्वप्रतिपादनादित्यर्थः । '**नचे**'ति । न हीत्यर्थः । '**अवान्तरे**'ति । भृत्यादीनां यथा यत्किञ्चित्कारणत्वं तथा प्रजापतेरिति । न हीत्यर्थः । '**अश्रवणादि**'ति । प्रजापत्यादिव्यतिरिक्तस्याऽश्रवणादित्यर्थः । ननूत्तरकाण्डे श्रवणं वर्तत इत्यत आह—'**उत्तरे**'ति । '**द्वयप्रतिपादनादि**'ति । कर्तृ-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

परिहरन्ति—'**नचे**'ति । '**परस्ये**'ति । मुख्यस्येत्यर्थः । '**द्वयमि**'ति । कर्तृत्वं तदभावश्च ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

त्यधिकमुक्तमतो ज्ञापयति परोक्तं न व्यासाशयगोचर इति । '**उत्तरकाण्डे तु द्वये**'त्यादि । **यतो वा इमानि भूतानी**त्यादिना कर्तृत्वप्रतिपादनं, **निष्कलं निष्क्रियमि**त्यादिना **नित्यशुद्धबुद्धे**त्यादिना च कर्तृत्वाऽभावप्रतिपादनमिति विरोध इत्यर्थः । तथा चोत्तरकाण्डे विरोधसन्देहयोः सत्वात्पूर्वकाण्डे ब्रह्माऽतिरिक्तस्य प्रजापतिप्रभृतेः कर्तृत्वप्रतिपादनान्न ब्रह्मणि जगत्कर्तृत्वं वेदसिद्धमतः शास्त्रयोनित्वं यदुक्तं तन्न सिद्ध्यतीति पूर्वपक्षिणो हार्दम् ।

भगवदीश्रीमदिच्छारामप्रणीतः प्रदीपः ।

जगत्कर्तृत्वेन ब्रह्मणि सर्वज्ञत्वसर्वशक्तिमत्त्वे असहमानाः प्रत्यवतिष्ठन्ते । ननु इत्यादिना । **प्रभृति**पदेन क्षेत्रज्ञप्रकृत्यादीनां ग्रहणम् । **तत्तदुपाख्यानेषु** प्रजापतिक्षेत्रज्ञाद्युपाख्यानेषु । **अवान्तरकारणत्वं** मुख्यं कारणत्वं परब्रह्मणः अवान्तरकारणत्वं प्रजाप्रत्यादीनाम् । '**परस्ये**'त्यादि । तथाचेन्द्रियाणां सन्निकर्ष इव यस्यावान्तरकारणं प्रजापतिः स्यात्तादृशपरस्य प्रपाठके अश्रवणादित्यर्थः । ननूत्तरकाण्डेन ब्रह्मणि कर्तृत्वं व्यवस्थापनीयमत आहुः । '**उत्तरे**'त्यादि । **द्वयप्रतिपादनात्** 'तस्माद्वा' 'यतो वा' इत्यादिश्रुतिभिः कर्तृत्वस्य 'नित्यशुद्धबुद्धे'त्यादिभिः कर्तृत्वाभावस्येतिविरोध इत्यर्थः । **सन्देहश्च** कर्तृत्वतदभावोभयसाधारणचैतन्यधर्मदर्शनात्सन्देहोपीत्यर्थः । **मीमां-**

१ एतदन्तरं 'अत्र प्रजापतिप्रभृतिभ्य इत्यादी'ति निःसम्बन्धइव पाठः सत्वस्माभिर्न रक्षितः ।

सायाः सन्देहनिवारकत्वेऽप्येकांशस्याऽप्रामाण्यं स्यात् । उभयसमर्थने शास्त्रवैफल्यं वा । वेदप्रामाण्यादेव तत्सिद्धेः । बाधितार्थवचनं वेदे नास्तीत्यवोचाम । किञ्च, वेदान्ताः किं

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

रकाण्डे त्विति । ब्रह्मवियदादिश्चेति कारणद्वयस्य समप्राधान्येन प्रतिपादनात्परस्परप्रतिबन्ध एकस्याऽपि कारणत्वं न सम्भवतीति कारणत्वस्य विरोधो विरहः श्रौतत्वाऽविशेषात्सन्देहश्च स्यादित्यर्थः ।

ननु सत्यपि सन्देहे मीमांसया तदपगमो भविष्यतीत्याशङ्क्याह **'मीमांसाया'** इति । मीमांसया ह्येकतरनिश्चये सन्देहाऽपगमस्तथा च द्वितीयस्यांऽशस्याऽप्रामाण्यमेव भवेत् । ननु श्रौतत्वाऽविशेषादेकतरबाधस्याऽशक्यत्वात्कालभेदेनोभयमेव कस्मान्न भवतीत्यत आहुः—**'उभये'**ति । तत्र हेतुः—**'वेदे'**ति । निरस्तसमस्तदोषाशङ्कस्य वेदस्य बाधितानधिगताऽसन्दिग्धबोधजनकत्वरूपाऽनपेक्षप्रामाण्योपपत्त्यर्थं कालभेदेनोभयोपपत्तौ शास्त्रस्य मीमांसाया वैयर्थ्यमेव भवेदित्यर्थः ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

त्वाऽकर्तृत्वयोर्द्वयोः प्रतिपादनादित्यर्थः । **'सन्देह'** इति । उभयप्रतिपादकवाक्ययोः प्रामाण्यादेकतरपक्षपातस्याऽशक्यत्वात्सन्देह इत्यर्थः ।

नन्वत एव मीमांसाया उपयोग इत्यत आह—**'मीमांसे'**ति । **'उभयसमर्थने'**ति । कर्तृत्वाऽकर्तृत्वोभयसमर्थने । **'अवोचाम'** इति । बाधितार्थप्रतिपादकत्वरूपाऽप्रामाण्यं वेदे नास्तीत्युक्तं, प्रागित्यर्थः । एवं च स्वतन्त्रजगत्कारणत्वं कुत्रापि नास्तीति बीजाङ्कुरन्यायेनानादिसृष्टिवाद एव स्वीकार्य इति यतो वेत्यादिना कार्यलक्षणं न सम्भवतीति भावः । इदानीं वेदान्तविचारस्य

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

विरोधो मिथोवाक्ययोः । **सन्देहः** कर्तृत्वं तदभावो वेत्येवंरूपः । **'एकांशस्ये'**ति । निषेध्यप्रतिपादकवेदभागस्य । **'उभये'**ति । कर्तृत्वतदभावयोः । शास्त्रं मीमांसाशास्त्रम् । **'तत्सिद्धेरि'**ति । उभयसिद्धेः । वेदप्रामाण्ये हेतुं स्मारयन्ति—**'बाधितार्थे'**ति । ननु सिद्धं तर्हि ब्रह्मणः कर्तृत्वमिति मनसि निधाय ब्रह्मकर्तृत्वप्रतिपादकवेदान्तानामेव विकल्पेनाऽकिञ्चित्करत्वमाहुः—**'किञ्चे'**त्यादि ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

ननु सन्देहनिवारणमनया मीमांसया भविष्यति । तथा च कर्तृत्वकर्तृत्वाभावयोर्मध्य एक एवार्थोऽवशिष्येत । ततश्च सर्वं निर्दुष्टमित्याशङ्क्याऽऽह—**'एकांशस्याऽप्रामाण्यं स्यादि'**ति । यदि कर्तृत्वतदभावयोर्मध्येऽन्यतरस्वीकारस्तदा स्वीकृतप्रमेयाऽतिरिक्तप्रतिपादकस्यैकांशस्य तच्छ्रुतिभागस्याऽप्रामाण्यं स्यादित्यर्थः । यदि च मीमांसयोभयमप्याद्रियते तदा मीमांसाशास्त्रवैफल्यम् । कुतो वैफल्यमित्याकाङ्क्षायामाह—**'वेदप्रामाण्यादेवे'**त्यादि । अतःपरं पूर्वकाण्डोक्तकारणत्वानां प्रजापतिप्रभृतीनामेव जगत्कारणत्वं नतूत्तरकाण्डोक्तकारणताकस्य ब्रह्मणो जगत्कर्तृत्वमिति द्रढयितुमुत्तरकाण्डस्य पूर्वकाण्डापेक्षया ह्यकिञ्चित्करत्वसमर्थनाय विकल्पमाह—**'किञ्चे'**त्यादिना । वेदशेषत्वं

भगवदीश्रीमदिच्छारामप्रणीतः प्रदीपः ।

सायाः उत्तरमीमांसायाः । **एकांशस्ये**त्यादि । तथा च कोटिद्वयमध्ये यत्कोटिनिर्णयः क्रियते तदितरकोटिप्रतिपादकवेदान्तस्याप्रामाण्यं स्यादित्यर्थः । **उभये**त्यादि कोटिद्वयस्यापि ब्रह्मण्यङ्गीकारे इत्यर्थः । **शास्त्रवैफल्यं** विरोधस्यैवाभावेन तन्निर्धारार्थं व्याससूत्ररूपशास्त्रस्य वैफल्यमित्यर्थः । **त्सिद्धेः** विरुद्धकोटिद्वयस्य ब्रह्मणि सिद्धेरित्यर्थः । वादी वेदप्रामाण्यमेव दृढं प्रदर्शयति **बाधि-**

वेदशेषा, वेदा वा ? । नाद्यः । अनुपयोगात् । अनारभ्याऽधीतत्वेन तदुपयोगित्वे पूर्वका-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

अथ पूर्वकाण्डोक्तप्रजापतिप्रभृतीनामेव कारणत्वं न ब्रह्मण इत्येव वक्तुं ब्रह्मकारणत्वप्रतिपादकानां वेदान्तानां पूर्वकाण्डापेक्षयाऽकिंचित्करत्वसमर्थनार्थं विकल्पमाहुः—'**किञ्चे**'ति। तत्प्रथमं पक्षं दूषयन्ति—'**नाद्य**'इति। तत्र हेतुमाहुः—'**अनुपयोगादि**'ति। एकप्रकरणपठितत्वे हि तदङ्गत्वम्। यथा दर्शपूर्णमासप्रकरणपठितस्याऽऽज्यावेक्षणस्य तदङ्गभूताऽऽज्यसंस्कारकत्वम् । न चेह तथा । प्रकरणभेदात् । किंच । शेषत्वं हि द्वेधा सम्भवति। स्वरूपोपकारित्वेन फलोपकारित्वेन वा । न हि वेदान्तानां कर्मस्वरूपोपकारित्वम् । नित्यशुद्धबुद्धोदासीनाऽऽत्मतत्त्वप्रतिपादनेन कर्तृदेवताऽऽदिप्रकाशनार्थत्वाऽभावात् । नापि फलोपकारित्वम् । तत्प्रतिपादनस्य कर्मसमृद्ध्यर्थत्वाऽभावात् । नन्वनारभ्याऽधीतमपि '**यस्य पर्णमयी जुहूर्भवती**'त्यव्यभिचरितक्रतुसम्बन्धजुहूद्वारेण जुहूपदं क्रतुं स्मारयद्वाक्येन पर्णताया यथा क्रतुशेषभावमापादयति, तथाऽऽत्मनोऽप्यव्यभिचरितक्रतुसम्बन्धाऽऽत्मद्वारे-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

निष्फलत्वात्स न कर्तव्य इत्याक्षिपति–'**किञ्चे**'ति । '**वेदशेषा**' इति । वेदस्य वेदोक्तकर्मणः शेषा अङ्गभूता इत्यर्थः । '**वेदा**' इति । प्रयोगानुष्ठापकवाक्यरूपा इत्यर्थः । '**अनुपयोगादि**'ति । वेदान्तानां ज्ञानाङ्गब्रह्मप्रतिपादकत्वेन द्रव्यदेवतादिप्रकाशकत्वाऽभावादनुपयोगादित्यर्थः । **अनारभ्य** प्रकरणमप्राप्य । **अधीतत्वेन** पठितत्वेन । तदुपयोगित्वे वेदोक्तकर्मोपयोगित्वे ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

'**अनुपयोगादि**'ति । पूर्वकाण्डीयवाक्यार्थबोधेन, युक्ते कर्मणि वा, **तेजो वै घृतमि**त्यादिवन्निर्णायकत्वाऽभावेनाऽनुपयोगात् । नन्व**ष्टवर्षं ब्राह्मणमुपनयीत, स्वाध्यायोऽध्येतव्यो यस्य पर्णमयी जुहूर्भवती**त्याद्यनारभ्याऽधीतमपि वाक्यजातं तदुपयोगिकर्मोपयोगिस्वार्थप्रतिपादनद्वारा यथा तच्छेषत्वभावं भजते, तथा तदुक्तकर्मकर्त्रात्मस्वरूपप्रतिपादनेन वेदान्ता अपि तच्छेषभावं भजन्त इत्यत आहुः—'**अनारभ्ये**'ति । '**तदि**'ति । वेदवेदोक्तकर्मोपयोगित्वे । '**गतार्थत्वमि**'ति ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

दूषयति–'**अनुपयोगादि**'ति । एकप्रकरणपठितत्वे ह्यङ्गत्वं स्यात् । दर्शपूर्णमासप्रकरणपठिताऽज्यावेक्षणवत् । वेदान्ते तु प्रकरणभेदान्नाङ्गत्वमित्यर्थः । अन्यच्च । स्वरूपोपकारित्वेन फलोपकारित्वेन शेषत्वं द्वेधा । तत्र वेदान्तानामसङ्गोदासीनाऽऽत्मस्वरूपप्रतिपादकतया कर्तृदेवताप्रकाशनार्थत्वाऽभावान्न स्वरूपोपकारित्वम् । नवा फलोपकारित्वम् । निर्लेपाऽऽत्मप्रतिपादनस्य कर्मसमृद्ध्यर्थत्वाऽभावात् । ननु **यस्य पर्णमयी जुहूर्भवती**त्यव्यभिचरितक्रतसम्बन्धजुहूद्वारेण क्रतुं

भगवदीश्रीमदिच्छारामप्रणीतः प्रदीपः ।

तार्थेत्यादि । वेदान्तप्रामाण्ये तदुक्तोर्थः सिध्येदिति तत्प्रामाण्यमेवाक्षिपति '**किञ्चे**'त्यादिना । **नाद्य** इति । तत्रहेतुः **अनुपयोगा**दिति । वेदशेषत्वं हि द्वेधा वेदबोधितकर्मोपकारित्वेन, कर्मफलोपकारित्वेन वा । नहि वेदान्तानां कर्मस्वरूपोपकारित्वघटकद्रव्यदेवताप्रतिपादकत्वरूपं सम्भवति । तत्र द्रव्यदेवते हि कर्मस्वरूपम् । तत्र नित्यशुद्धबुद्धमुक्तस्वभावोदासीनस्य कर्मस्वरूपाघटकत्वेन स्वरूपोपकारित्वासम्भवात् । नापि फलोपकार्यङ्गत्वं तादृशब्रह्मणोऽकारणत्वेन तत्प्रतिपादनस्य फलोपकारिप्रतिपादनत्वासम्भवात् । '**अनारम्भे**'त्यादि । 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं सम-

ण्डविचारेणैव गतार्थत्वम् । विद्याप्रवेशश्च । न द्वितीयः । यज्ञाप्रतिपादनात् । मन्त्रब्राह्मणत्वाभावाच्च । तस्माद्वेदोपरा वेदान्ता इति तेषां किं स्यादिति चेत्—

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

णाऽनारभ्याऽधीतानामपि वेदान्तवाक्यानां पूर्वकाण्डशेषत्वं कस्मान्न भवतीत्याशंक्याऽऽहुः—'**अनारभ्ये**'ति । तथा सति तद्विचारेणैव गतार्थत्वात्कृतमुत्तरविचारेण । दूषणान्तरमप्याह—'**विद्ये**'ति । '**श्रोतव्यो मन्तव्यः**' '**तं त्वौपनिषदं पुरुषं पृच्छामी**'त्यादिभिः सिद्धो वेदान्तानां श्रवणादिद्वारकाऽपरोक्षसाक्षात्कारजनकत्वेन ब्रह्मविद्यायां प्रवेशो व्याहन्येत। शेषत्वेन स्वतन्त्रफलजनकत्वस्य वक्तुमशक्यत्वात्। द्वितीयं दूषयति—'**न द्वितीय**' इति। तत्र हेतुमाहुः—'**यज्ञे**'ति। वेदो हि नित्य-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

यथाऽनारभ्याऽधीतत्वेन सूत्राणि, **अष्टवर्षं ब्राह्मणमुपनयीते**त्यादिवाक्येनोपनयनादावपि प्रयुक्तानि भवन्ति, तथा प्रकरणमप्राप्य विहिता वेदान्ता अपि यदेव विद्यया करोतीति वाक्येन वेदोक्तकर्मसूपयोगित्वे स्वीक्रियमाणे सतीत्यर्थः । '**पूर्वकाण्डविचारेणैवे**'ति । पूर्वमीमांसायां तृतीयाध्याये, 'अथातः शेषशेषिभावलक्षणमि'त्यनेन, प्रथमाध्याये स्मृतिपादे च सूत्रादीनां प्रामाण्यविचारः कृत इति तेनैव गतार्थत्वमस्या इति भावः । '**विद्याप्रवेश**'श्चेति । वेदशेषत्वेन स्मृतीनां चतुर्दशविद्यासु यथा प्रवेशस्तथाऽस्यापीत्यर्थः । चकारात्पुराणेऽपि । '**यज्ञे**'ति । यागतदङ्गप्रधानप्रयाजादीनामप्रतिपादनादित्यर्थः ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

उत्तरमीमांसाया इति शेषः । तथा चैतद्वैय्यर्थ्यमितिभावः । दूषणान्तरमाहुः—'**विद्ये**'ति । तर्हि त्वदभिमतब्रह्मविद्यायां वेदान्तानां प्रवेशो न स्यात् । स्वातन्त्र्येण साधनफलनिरूपणात् । '**यज्ञे**'ति । वेदे हि स्वाध्यायाध्ययनविधिना पुरुषार्थपर्यवसायित्वमुक्तम् । तच्च स्वेष्टसाधनीभूतक्रियाप्रतिपादकतया । न हि वेदान्तास्तत्प्रतिपादयन्ति । सिद्धार्थप्रतिपादकत्वात् ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

स्मारयद्वाक्येन यथा क्रतुशेषतां पर्णतायाः प्रतिपादयति । तथैवाऽव्यभिचरितक्रतुसम्बन्धात्मद्वारेणाऽनारभ्याऽधीतानामपि वेदान्तवाक्यानां पूर्वकाण्डशेषत्वमात्मपदं कुतो नापादयेदित्याशङ्क्याऽऽह—'**अनारभ्याधीतत्वेने**'त्यादि । अथवा । अनारभ्याधीता अपि स्मृतयो गृह्यसूत्राणि च, **यद्वै किञ्च मनुरवदत्तद्भेषजमि**त्यादिवाक्येन शेषतां प्राप्तास्तथा वेदान्ता अपि, **यदेव विद्यया करोती**ति श्रुत्या कर्मणो वीर्यवत्तरतासम्पादनेन शेषतां लप्स्यन्त इत्याशङ्क्याऽऽह–'**अनारभ्याधीतत्वेने**'त्यादि । यदि पूर्वकाण्डशेषत्वं तदा पूर्वमीमांसया सर्वेषां वेदान्तानामपि निर्णये सिद्ध उत्तरमीमांसाया गतार्थतेति भावः । पूर्वकाण्डशेषत्वे दूषणान्तरमाह—'**विद्याप्रवेशश्चे**'ति ।

भगवदीश्रीमदिच्छारामप्रणीतः प्रदीपः ।

श्रुते' इत्यव्यभिचरितक्रतुसम्बद्धजुहूद्वारेण क्रतुं स्मारयद्वाक्यं यथा पर्णतायाः क्रतुशेषतां बोधयति तथाऽव्यभिचरितक्रतुसम्बद्धात्मोपस्थितिद्वारेणानारभ्याधीतवेदान्तवाक्यानामपि कर्मोपयोगित्वे पूर्वमीमांसयैव गतार्थता उत्तरस्याः अनुपयोग एव । **विद्याप्रवेशः** पूर्वोक्तरीत्या कर्माङ्गत्वोरीकारे श्रवणादिसम्पाद्यब्रह्मविद्यानुपयोगेनोपनिषदां ब्रह्मविद्यानुपयोगित्वमित्यर्थः । **न द्वितीयः** वेदा इति द्वितीयः ।

१–अस्यामेव टीकायां क्वचिद्बहुवचनं क्वचिच्चैकवचनं द्वयोरपि पुस्तकयोर्मिलितं किंहेतुकमिति न जानीमः ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

स्वाध्यायाऽध्ययनविधिविषयत्वेन पुरुषार्थपर्यवसायी । तच्च स्वेष्टसाधनीभूतक्रियाप्रतिपादकत्वेन । नहि वेदान्तानां तत्प्रतिपादकत्वमस्ति । सिद्धार्थप्रतिपादकत्वेन तदप्रतिपादकत्वात् । तथा च पुरुषार्थपर्यवसायित्वाऽभावेन स्वाध्यायाऽध्ययनविध्यविषयत्वान्न वेदत्वम् । अस्मिन्नेव विषये हेत्वन्तरमप्याहुः—'**मन्त्रे**'ति । पूर्वतन्त्रे द्वितीये । ननु मन्त्रब्राह्मणयोर्वेदत्वे '**द्वादशशतं ददाति**' '**अनुबन्ध्यामालभेते**'त्यादिविधीनां मन्त्रत्वं ब्राह्मणत्वं वेतिसन्देहे मन्त्रत्वमिति । कथमेवमवगम्यत इति चेदित्थम् । '**न तानसन्ति न दधाति तस्करो नैना अमित्रो व्यथिरादधर्षति । देवांश्च याभिर्यजते ददाति च योगित्ताभिः स च ते गोपतिः सहे**'त्यादिमन्त्रेष्वपि यजते ददातीत्यादिविधायकशब्दश्रवणात्तेषामपि विधायकत्वस्य सत्त्वाद्विधीनां मन्त्रत्वमिति पूर्वपक्षो, '**विधिमन्त्रयोरैकार्थ्यमैकशब्द्यादि**'त्यनेन प्रपंचितः । एतदर्थस्तु विधिमन्त्रयोरैकार्थ्यप्रवर्तकत्वम् । तत्र हेतुः । '**ऐकशब्द्यादि**'ति । एक एव हि शब्द उभयत्र । न हि स एवैकत्र प्रवर्तकोऽपरत्र नेति वक्तुं शक्यम् । तस्मादत्रापि विधायक इति । ततः सूत्रकारः स्वयमेव समाधानमाह—'**अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यादि**'त्यनेन । मन्त्रोऽभिधानवाची केवलं धर्मप्रमितिमेव जनयति

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ननु यज्ञाप्रतिपादनेऽपि 'यदेव विद्यया करोती'त्यनेन यागोपयोगिविद्याप्रतिपादनमस्तीत्यत आहुः—'**मन्त्रे**'ति । उपसंहरन्ति—'**तस्मादि**'ति । '**वेदोषरा**' इति । वेदान्तानामार्यप्रसिद्धिमात्रेण वेदत्वे तूषरभूमितुल्या इत्यर्थः । '**तेषामि**'ति । विचार इति शेषः । '**किं स्यादि**'ति । फलमिति

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ननु मन्त्रादिवद्वेदत्वमस्त्वित्याशङ्कायामाहुः—'**मन्त्रे**'ति । वेदो हि मन्त्रब्राह्मणसमुदायात्मकः । तदुभयस्वरूपमपि पूर्वतन्त्रे द्वितीयस्य प्रथमे '**तच्चोदकेषु मन्त्राख्या,**' '**शेषे ब्राह्मणशब्द**' इत्येतत्सूत्राभ्यां निर्णीतम् । तत्र चोदकत्वं नाम प्रयोगकालेऽनुष्ठानौपयिकार्थप्रकाशकत्वम् । शेषोऽवशेषः । तथा च मन्त्रातिरिक्तः कर्माङ्गभूतोऽर्थवादविधिनिगदादिरूपः शब्दो ब्राह्मणशब्दवाच्य इत्यर्थः । तथा च वेदान्तेषु तल्लक्षणाऽभावान्न तत्त्वमिति भावः । उपसंहरन्ति—'**तस्मादि**'ति । वेदशेषवेदत्वाऽभावात्तथाभूताः । तथात्वमपि वेदत्वेन शिष्टाचारमात्रात् । ईदृशानां तेषां विचारे किं फलम् । न किमपीत्यर्थः । तथा चैतादृशैतत्प्रतिपादितब्रह्मकर्तृत्वं न विश्वसनीयमिति भावः ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

यदि पूर्वकाण्डशेषत्वमुपनिषदां, तथा तच्छेषत्वेन स्वतन्त्रफलजनकत्वाऽभावात् ब्रह्मविद्यायामप्रवेशः स्यादित्यर्थः । '**तेषां किं स्यादि**'ति । तेषां वेदान्तानां वेदोषरत्वात्किं स्यात् । वेदत्वं वेदशेषत्वं

भगवदीश्रीमदिच्छारामप्रणीतः प्रदीपः ।

मन्त्रेत्यादि वेदान्तानां मन्त्रब्राह्मणत्वाभावादित्यर्थः । तत्र हेतुमाहुः । '**यज्ञे**'त्यादि । वेदान्तानामिष्टसाधनीभूतकर्माप्रतिपादकत्वाद्ब्राह्मणत्वाभावादित्यर्थः । मन्त्रस्तु कर्मप्रवृत्तपुरुषस्य व्यापारनिचयसम्पादकः । 'द्वादशशतं ददाति अनुबन्ध्यामालभेते'तिविधिरूपमन्त्राणामपि तादृशनिचयसम्पादकत्वमव्याहतमेव । तस्मादेतदन्यतररूपत्वाभावान्न वेदत्वं वेदान्तानामित्यर्थः । पूर्वपक्षं निगमयन्ति '**तस्मादि**'ति । **तस्मात्** पूर्वोक्तरीत्या पुरुषार्थसाधनोपयोगित्वाभावेपि वेदपदप्रवृत्तिनिमित्तवेदत्वस्य

मैवम् । अस्ति तावद्वेदत्वम् । अध्ययनादिभ्यः । स्मरणाच्च । प्रमाणञ्च सर्वोऽपि

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

न विधायकः । तत्र हेतुः—**प्रयोगसामर्थ्यात्** । मन्त्रस्तु प्रयोगे समर्थः । प्रयोगः प्रवृत्तस्य व्यापारनिचयः । विधिस्तु प्रवर्तकः पूर्वसिद्धः । तेनैव प्रवृत्तत्वात् । कृतिसमये प्रवर्तकत्वं व्यर्थम् । किन्तु प्रमितिमेव जनयति । विद्यया कुर्यादिति । तस्मान्मन्त्रस्य न विधायकत्वम् । समानशब्दश्रवणेऽपि भेदकं रूपं वक्तुं सूत्रकार एव मन्त्रलक्षणमाह—'**तच्चोदकेषु मन्त्राख्ये**'ति । कर्मविधिना ह्यनुष्ठानं बोध्यते । विधिमन्त्रस्तु साधनत्वेनेति । अग्रेऽपि कर्मणि तदनुवादकत्वात्तेषां कर्मणां चोदकत्वं मन्त्रेषु सिद्धम् । अतः कर्मणि यागादौ यः साधनभूतः शब्दः स मन्त्रः । कर्मकरणः शब्दो मन्त्र इत्युक्तं भवति । ततो विधेरर्थवादादेश्च मन्त्रत्वाऽभावेऽपि वेदत्वसमर्थनार्थं ब्राह्मणलक्षणमुक्तं '**शेषे ब्राह्मणशब्द**' इति । मंत्रातिरिक्तः कर्माङ्गभूतोऽर्थवादविधिनिगदादिरूपः शब्दो ब्राह्मणशब्दवाच्य इत्यर्थः । तथा च मन्त्रब्राह्मणलक्षणाऽभावात्कथं वेदान्तानां वेदत्वम् । ननु तेषामवेदत्वे कथं वेदत्वेन प्रसिद्धिरित्यत आहुः—'**तस्मादि**'ति । यस्माद्वेदलक्षणाऽभावेऽपि तच्छब्दप्रवृत्तिस्तस्मात्तदुपपत्त्यर्थं वेदान्तानां वेदोषरत्वाद्वेदशब्दाभिधेयत्वम् । यथोषरभूमेः फलोत्पत्तिसम्भावनारहितत्वेन विश्वपोषकत्वाद्यभावेऽपि गौण्या वृत्त्या भूमिशब्दाभिधेयत्वं, तथाऽत्रापि पुरुषार्थपर्यवसानाऽभावेऽपि पाठादिधर्मसाम्याद्वेदशब्दवाच्यत्वम् । ननु मन्त्रब्राह्मणवन्मुख्यं तत्त्वमित्यर्थः । तथा च पुरुषार्थपर्यवसायिवेदापेक्षया तेषां वेदान्तानां किं, किं सामर्थ्यं स्यात् । न किमपीति भावः । तथाच तैस्तत्प्रतिपादितप्रजापतिप्रभृतिकारणत्वस्य बाधाऽसम्भवात्तेन च तद्बाधस्याऽनायासेन सम्भवान्न ब्रह्मणः कर्तृत्वमुपपद्यत इति स्थिते—

उत्तरमाहुः—'**मैवमि**'ति । यदुक्तं वेदोषरा वेदान्ता इति । एवं न वक्तव्यं भवति । पुरुषार्थपर्यवसायित्वेन वेदत्वात् । कथं पुरुषार्थपर्यवसायित्वमित्यत आहुः—'**अध्ययनादिभ्यः**' इति ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

शेषः । तस्माद्वेदान्तविचारस्य निष्फलत्वात्स न कर्तव्य इति भावः । समाधानमाहुः—'**मैवमि**'ति । '**वेदत्वमि**'ति । वेदान्तेषु वेदत्वमेव, न वेदोषरत्वमित्यर्थः । '**अध्ययनादिभ्य**' इति । वेदा-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

अत्र समादधते **मैव**मित्यादिना । '**अध्ययनादिभ्य**' इति । स्वाध्यायाध्ययनविधिविहिताध्ययनात् । तथा चाऽध्ययनविधिरेव वेदान्तानामव्याकुलवेदत्वं बोधयतीति भावः । अध्यापन-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

वा न स्यादिति भावः । '**अध्ययनादिभ्य**' इति । **स्वाध्यायोऽध्येतव्य** इत्यादिविधिविषयत्वेन पुरुषार्थपर्यवसायित्वाद्वेदत्वमित्यर्थः । **ऋचां मूर्द्धानं यजुषामुत्तमाङ्गं साम्नां**

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

सत्त्वात् **वेदोषराः** वेदत्वे सति ऊषराः फलानुपयोगिनः । यथोषरभूमिर्भूमित्वे सति फलासम्पादनी तथेत्यर्थः । **किं स्यात्** ? तेषां विचारेण किं फलं स्यात् ? तथा च तेषामतिदुर्बलत्वेन ततो ब्रह्मणः कर्तृत्वप्रतिपत्तिः सुदूरपराहतैवेति फलितम् ।

उक्ते पूर्वपक्षे समाधानमाहुः—'**मैव**'मिति । **अस्तीत्यादि** । वेदान्तेषु न वेदोषरत्वं किन्तु परमपुरुषार्थसाधनोपयोगि वेदत्वमेव । तत्र हेतुमाहुः—'**अध्ययनादिभ्य**' इति । अध्ययनाध्यापनविधिना

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

स्वाध्यायाऽध्ययनविषयत्वेन वेदान्तानामपि पुरुषार्थपर्यवसायित्वात् । न च स्वाध्यायशब्दवाच्यत्वं पूर्वकाण्डस्यैवेति वाच्यम् । **'ऋचां मूर्धानं यजुषामुत्तमाङ्गं साम्नां शिरोऽथर्वणां मुण्डमुण्डम् । नाऽधीतेऽधीते वेदमाहुस्तमज्ञं शिरश्छित्वाऽसौ कुरुते कबन्धमि'**त्यनेन केवलपूर्वकाण्डाऽध्ययने दोषश्रवणात् । स्वैरधीयत इति व्युत्पत्त्या तस्याऽपि ग्रहणसम्भवाच्च । षोढा विहितस्य वेदैकसमधिगम्यत्वेन शिरोभागप्रतिपादकस्य वेदत्वाऽभावे तावतो भागस्योपनिषत्त्वं भज्येतेत्यादिहेतव आदिशब्देन गृह्यन्ते । हेत्वन्तरमप्याहुः—**'स्मरणाच्चे'**ति । स्मरणं स्मृतिः । ब्रह्मप्रतिपादिका । तस्या इत्यर्थः ।

अयमर्थः—वेदान्तानामवेदत्वे स्मृतीनामनुमानत्वेन नित्याऽनुमेयवेदानुमापकत्वात्तन्मूलत्वादेव प्रामाण्यस्य सर्ववादिसम्मतत्वाद्ब्रह्मप्रतिपादिकायास्तस्या वेदमूलकत्वाऽभावेनाऽप्रामाण्यमेव भवेदित्यर्थः । यद्वा एवं स्मार्त्तं ब्रह्मप्रकरणं नित्याऽनुमेयवेदमूलकमित्यस्मिन्पक्षे स्मरणाच्चेतिव्याख्याय तत्त्वाऽर्थदीपे **'पुराणमूलकं वापी'**ति तस्य पुराणमूलकत्वस्याऽपि स्वीकृतत्वेन पूर्वव्याख्यानाऽसम्भवात्प्रकारान्तरेण तद्व्याख्यानमाहुः—**'स्मरणाच्चे'**ति । **'ब्रह्मसंस्थोऽमृतत्वमेती'**ति श्रुतौ ब्रह्मसंस्थस्याऽमृतत्वप्राप्तिरुक्ता । ब्रह्मसंस्थत्वं त्वितरव्यासङ्गाऽभावपूर्वकं तत्रैव नैरन्तर्येण मनोनिवेशनम् । तच्च **'तं त्वौपनिषदं पुरुषं पृच्छामी'**ति श्रुतिपर्यालोचने वेदान्तवाक्यानां गुरुमुखाच्छ्रवणाऽनन्तरं मननादौ क्रियमाणे भवतीति मननादिविषयत्वेन वेदान्तवाक्यानामेवोपादानात्तेषां वेदत्वं गमयतीति बोध्यम् । श्रौतेनैव ब्रह्मज्ञानेनाऽमृतत्वम् । न स्मार्त्तेन । किन्तु चित्तशुद्धिमात्रम् । साऽपि सवासनैव । न तद्रहितेति ज्ञेयम् । स्मार्त्तं ब्रह्मप्रकरणं नित्याऽनुमेयवेदमूलकमिति पक्षस्य गौणत्वप्रदर्शनार्थश्चकारोऽनादरार्थो ज्ञेयः । मुख्यपक्षे तु तस्य पुराणमेव मूलमिति तत्वार्थदीपे निरूपितत्वात् । नन्वेवं वेदान्तानां साधितेऽपि वेदत्वे किं जातमित्यत आहुः—**'प्रमाणं चे'**ति । अपौरुषेयत्वेन निरस्तसमस्त-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

न्तेष्वाचारपरम्परया शूद्राश्रवणादिनियमेनाऽऽर्येकर्तृकस्वरपूर्वकाऽध्ययनाऽध्यापनादिसत्वादित्यर्थः । नन्वाचारपरम्पराया अन्धपरम्परातुल्यत्वं स्वीक्रियत इत्यत आह—**'स्मरणादि'**ति । **स्वयम्भूरेष भगवन् वेदो गीतस्त्वया पुरा । शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारका** इति पुराणवाक्याद्वेदान्तानामपि स्मरणं प्रतीयते । नतु कर्तृजन्मत्वमित्यर्थः । **सर्वोऽपि**

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

श्रवणपाठा आदिशब्दार्थः । नचेदं सर्वं पूर्वकाण्डमात्रविषयः । **ऋचां मूर्धानमिति** निन्दोपलब्धेः । **'स्मरणाच्चे'**ति । ब्रह्मप्रतिपादिकायाः स्मृतेरित्यर्थः । वेदमूलकत्वेनैव तासां प्रामाण्याऽङ्गी-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

शिरोऽथर्वणां मुण्डमुण्डम् । नाधीतेऽधीते वेदमाहुस्तमज्ञं शिरः छित्वासौ कुरुते कबन्धमित्यनेन वेदान्ताऽध्ययनं विना केवलवेदाध्ययने दोषश्रवणादुपनिषदध्ययनस्य

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

वेदत्वेनानध्यायवर्जं शूद्रादिश्रवणवर्जं वेदाध्ययनार्थमुक्तनियमपुरःसरं वेदान्तानामध्ययनादित्यर्थः । वेदान्तानां वेदत्वे हेत्वन्तरमाहुः—**'स्मरणाच्चे'**ति । 'साङ्गोपनिषदो वेदानधीत्याध्याप्य विस्तरात् ।

वेदः स्वार्थे । स च न यज्ञश्चेद्ब्रह्म भवतु । नचैतावता अवेदत्वम् । अतिप्रसङ्गात् । शक्यते

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

दोषाशङ्कत्वान्मुख्ययैव वृत्त्या स्वार्थं प्रत्याययतीति सिद्धम् । ननूक्तं यज्ञाऽप्रतिपादनान्न स्वार्थे प्रामाण्यमित्यत आहुः— **स चे**ति । नहि क्रियाप्रतिपादकस्यैव वेदत्वमिति वक्तुं शक्यम् । तथा सति तदतिरिक्तस्य सर्वस्याऽप्यर्थवादाऽऽदिरूपस्याऽपि वेदस्याऽवेदत्वप्रसङ्गेनाऽवेदत्वस्याऽतिप्रसङ्गः स्यादित्यर्थः । नन्वस्त्वतिप्रसङ्ग इत्याशङ्क्याह—'**शक्यते ही**'ति । अग्निहोत्रादीनां कर्मणामन्यतरस्याऽन्तर्भावमकृ-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

पूर्वोत्तरकाण्डद्वयात्मकोऽपि । **स्वार्थे** अलौकिकेऽर्थे । **स च** अलौकिकार्थश्च । '**न यज्ञश्चेदि**'ति । उत्तरकाण्ड इति शेषः । '**न चैतावते**'ति । यज्ञातिरिक्तब्रह्मप्रतिपादकत्वेनाऽवेदत्वं न हीत्यर्थः । '**अतिप्रसङ्गादि**'ति । अग्निहोत्रादिप्रतिपादकवाक्यानां यावद्यज्ञाऽप्रतिपादकत्वादवेदत्वप्रसङ्गादित्यर्थः । नन्वेवं चेत्तर्ह्यग्निहोत्रप्रतिपादकवाक्येषु वेदत्वमेव न वक्तव्यमित्यत आहुः-'**शक्यते**

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

कारात्तेषामवेदत्वे तत्प्रामाण्यं भज्येतेति भावः । यद्वा **साङ्गोपनिषदो वेदानधीत्याऽध्याप्य विस्तरात् । ब्राह्मणो ब्रह्मवर्चस्वी लभते ब्रह्मणः पद**मित्यादिस्मृतेरित्यर्थः । ननु वेदत्वमस्त्वेवं, किं तत इत्यत आहुः—'**प्रमाणमि**'ति । अनेन **तेषां किं स्या**दित्युक्तमुत्तरतत्रवैय्यर्थ्यं निरस्तमिति भावः । ननु तथापि किमर्थत्वात्, तस्य तदभावे कथं तेषां तत्त्वमित्यत आहुः—'**स चे**'ति । सोऽर्थः । '**एतावते**'ति । अयज्ञब्रह्मार्थत्वेन । '**अतिप्रसङ्गादि**'ति । अवेदत्वाऽप्रसङ्गात् । तमेव व्युत्पादयन्ति—'**शक्यते ही**'ति । आदिशब्देन सत्रेष्टी । एषां मध्य एकमपि यज्ञे-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

नित्यत्वमुपनिषदां वेदशिरस्त्वेन वेदावयवत्वमतोऽस्ति वेदत्वमित्यर्थः । तदेतदाहुः—'**अध्ययनादिभ्य** इति । अर्थाच्छ्रुत्युक्तेभ्यो वेदान्ताऽध्ययनादिभ्यो हेतुभ्यो वेदत्वमस्तीत्यर्थः । आदिशब्देन स्वरपूर्वकपाठशूद्राश्रवणानध्यायपरिपालनप्रभृतयो नियमा ग्राह्याः । '**स्मरणाचे**'ति । **स्वयम्भूरेष भगवन् वेदो गीतस्त्वया पुरा । शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारका** इति पुराणवाक्येन यथा पूर्वकाण्डविषयकस्मरणमेव शिवादीनां, न पूर्वकाण्डकर्तृत्वम् । एवमुत्तरकाण्डस्याऽपि स्मरणमेव । कर्मलाभान्न शिवादीनां कर्तृत्वमिति स्मरणस्यापि तौल्याद्वेदत्वमेवेत्यर्थः । वेदान्तानां वेदत्वे साधिते यत्सिद्धं तदाहुः—'**प्रमाणं चे**'त्यादि । अपौरुषत्वेन निखिलदोषराहित्याल्लक्षणाप्रभृतिहीनमुख्ययाभिधाख्यवृत्त्या स्वार्थं बोधयन्तीति हार्दम् ।

ननु साध्यप्रतिपादकत्वाऽभावाद्विध्यभावेन धर्मनिरूपणाभावात् कथं वेदत्वमित्याशङ्क्य समादधते—'**स च न यज्ञश्चेद्ब्रह्म भवत्वि**'ति । न हि क्रियाप्रतिपादकता वेदत्वमिति नियमोऽस्ति

भगवदीयश्रीमदिच्छाराममप्रणीतः प्रदीपः ।

ब्राह्मणो ब्रह्मवर्चस्वी लभते ब्रह्मणः पदमितिस्मरणादित्यर्थः । प्रमाणं मुख्यया वृत्त्या स्वार्थप्रमाजनकः । **स्वार्थे** शक्यार्थे । **स च** स्वार्थश्च । **एतावता** यज्ञाप्रतिपादकतयाऽवेदत्वाङ्गीकारे । **अतिप्रसङ्गात्** अवेदत्वस्यार्थवादादावापत्तिप्रसङ्गादित्यर्थः । **शक्यते** हीत्यादि । तथा च यावद्यज्ञाप्रतिपादकत्वमवे-

ह्यग्निहोत्रादीनामन्यतरदनन्तर्भाव्य तथा वक्तुम् । तस्मात् ब्रह्मापि प्रतिपादयन्तो वेदान्ता

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

त्वाऽपि वेदत्वमर्थवादादौ वक्तुं शक्यम्। अध्ययनविधिविषयत्वादि[ति] युक्तमेव। उक्तमर्थमुपसंहरति—'**तस्मादि**'ति। यस्मात्क्रियाऽतिरिक्ताऽर्थप्रतिपादका अपि अर्थवादा उक्तहेतोर्वेदत्वं न व्यभिचरन्ति तन्न्यायेन ब्रह्माऽपि प्रतिपादयन्तो वेदान्ता अपीति सिद्धम्।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

ही'ति। वक्तुमित्यनेनान्वयः। अग्निहोत्रादिप्रतिपादकवाक्यानामित्यर्थः। '**अन्यतरदि**'ति। अत्राऽन्यतममिति प्रयोक्तव्यत्वेऽन्यतरदिति प्रयोगस्तु महाभाष्ये प्रत्ययः परश्चेत्यत्र निमित्तविचारं प्रकृत्य तदुदाहरणे 'तद्यथा बहुष्वासीनेषु कश्चित्कञ्चित्पृच्छति कतरो देवदत्त' इत्यत्रोपाध्यनङ्गीकाराद्बोध्यः। यावद्यज्ञप्रतिपादकत्वं यत्किञ्चिद्यज्ञप्रतिपादकत्वं चेत्युभयोर्मध्य एकमित्यर्थः। '**अनन्तर्भाव्ये**'ति। यावत्त्वं यत्किञ्चित्त्वमनिवेश्येत्यर्थः। **तथा वक्तुं** यथाकथञ्चिद्यज्ञप्रतिपादकत्वं वेदत्वमिति वक्तुं शक्यत इत्यर्थः। केवलहोमप्रतिपादकानां वाक्यानां साक्षाद्यज्ञाऽप्रतिपादकत्वाद्यत्किञ्चिद्यज्ञप्रतिपादकत्वं यावद्यज्ञप्रतिपादकत्वं वा नास्तीत्यन्यतरत्तदन्तर्भाव्य यथाकथञ्चिद्यज्ञप्रतिपादकत्वं वेदत्वमिति वक्तव्यं तच्चाऽग्निहोत्रादिप्रतिपादकवाक्येषु होमं विना यज्ञादिसिद्धिर्न भवतीति होमद्वारा यथाकथञ्चिद्यज्ञप्रतिपादकत्वं वक्तुं शक्येतेति भावः। '**तस्मादि**'ति। एतादृशवेदलक्षणादित्यर्थः। '**ब्रह्मापी**'ति। **यदेव विद्यया करोतीति**वाक्येन ब्रह्मज्ञानस्याऽपि

केश्चिद्विरचिता वेदान्तचन्द्रिका।

ऽनन्तर्भाव्य तत्प्रतिपादके भागे। **तथा**ऽवेदत्वम्। होमयागादीनां मिथो भेदात्। अग्निहोत्रादीनां कर्मणामेकमप्यन्तर्भाव्य, **अनु पुत्रेभ्यो दायं व्यभजदि**त्याद्यर्थवादेषु तथेति वाऽर्थः। अध्ययनविधिविषयत्वादेव। उपसंहरति—'**तस्मादि**'ति। अक्रियार्थानामप्युक्तार्थवादानां वेदत्वात्।

श्रीलालुभट्टकृता गूढार्थदीपिका।

किन्तु यज्ञब्रह्माऽन्यतरप्रतिपादकत्वमपेक्षितम्। तदुत्तरकाण्डे ब्रह्मप्रतिपादकत्वमस्त्येवेत्यर्थः। अन्यथा **वषट्कारो वै गायत्र्यै शिरोच्छिनत्तस्यै रसः परापतत्स पृथिवीं प्राविशत्स खदिरोऽभवदि**त्याद्यर्थवादानामवेदत्वं स्यात्। तदाहुः—'**न च तावता अवेदत्वमतिप्रसङ्गादि**'ति। अवेदत्वस्याऽर्थवादादिष्वतिप्रसङ्गादित्यर्थः। क्रियाप्रतिपादकाऽतिरिक्तेष्वपि वेदत्वमाहुः—'**शक्यते ह्यग्निहोत्रादीनामि**'त्यादिना। अग्निहोत्रादीनां कर्मणां मध्येऽन्यतरदपि कर्म, अर्थवादादिष्वनन्तर्भाव्याऽपि अर्थवादप्रतिपादितानां पदार्थानां अग्निहोत्रादिरूपक्रियात्वाऽभावेऽपि वेदत्वमस्तीत्यर्थः। '**तस्माद् ब्रह्मापी**'त्यादि। यस्मात्कर्मातिरिक्तनिरूपकेष्वर्थवादेषु वेदत्वमस्ति, तस्मात्कर्माऽतिरिक्तब्रह्मनिरूपकेषु वेदान्तेष्वप्यस्ति वेदत्वमित्यर्थः। ननु मन्त्रब्राह्मणाऽति-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

दत्वसाधकमुत यत्किञ्चिद्यज्ञाप्रतिपादकत्वं?। तत्र नाद्यः। ज्योतिष्टोमादियज्ञप्रतिपादकेपि यावद्यज्ञप्रतिपादकत्वाभावेन अवेदत्वापातात्। नान्त्यः। तस्मिन्नेव वाक्ये ज्योतिष्टोमेतरयत्किञ्चिद्यज्ञाप्रतिपादकत्वेनावेदत्वापत्तेः। अथवा, **शक्यते ही**त्यादि। तथा च होमयज्ञाद्यन्यतर**दनन्तर्भाव्य** अप्रतिपाद्यापि

वेदत्वं न व्यभिचरन्तीति । मन्त्रब्राह्मणरूपत्वं चोत्पश्यामः । ऋगेव मन्त्रः । ब्रह्मप्रति-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

ननु मन्त्रब्राह्मणत्वाऽभावे कथं तेषां वेदत्वमित्यत आहुः—'**मन्त्रब्राह्मणे**'ति । एकेनैव चारितार्थ्येऽपि '**अधिकं तत्राऽनुप्रविष्टमि**'तिन्यायेन ब्राह्मणरूपत्वमप्युक्तमिति ज्ञेयम् । पूर्वतन्त्र एव द्वितीये मन्त्रलक्षणमुक्त्वा '**ऋचः सामानि यजूंषि सा हि श्रीरमृता सतामि**'ति मन्त्रे मन्त्राणां त्रैविध्यमुक्तम् । तत्र भेदकाऽभावे त्रैविध्यं नोपपद्यत इत्याशङ्क्य क्रमेण तेषां लक्षणं भेदसिद्ध्यर्थमुक्तम् । '**तेषां ऋग् यत्रार्थवशेन पादव्यवस्थे**'त्यादिना । तदर्थस्तु यत्राऽर्थवाचकपदानुरोधेन

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

यज्ञोपकारकत्वादग्निहोत्रवाक्यानामिव ब्रह्मप्रतिपादकवेदान्तवाक्यानामपि यथाकथञ्चिद्यज्ञप्रतिपादकत्वं वेदत्वमस्तीति भावः । ननु कथं वेदत्वं वक्तव्यं, मन्त्रब्राह्मणरूपत्वं तु नास्तीत्युक्तमेवेत्यत आह—'**मन्त्रे**'ति । यद्यपि पूर्वकाण्डे मन्त्रलक्षणं बहुधा कथितं तथाऽपि ब्रह्मवादिभिर्यत्र मन्त्र इति समाख्या क्रियते स मन्त्रः । यत्र ब्राह्मण इति समाख्या तद्ब्राह्मणम् । तदुभयं वेदत्रयं प्रसिद्धमत्राप्युत्पश्याम इत्यर्थः ।

केश्चिद्विरचिता वेदान्तचन्द्रिका ।

स्वरूपतोऽपि वेदत्वं समर्थयन्ति—'**मन्त्रे**'त्यादि । यत्राऽर्थवशेनेत्याद्यृगादिलक्षणाऽऽक्रान्तत्वान्मन्त्रत्वेन । अभियुक्तप्रसिद्धेश्च । ऋगादय एव मन्त्रा इत्याहुः—'**ऋगेवे**'ति । गायत्रीमन्त्रवत् । अत एव **मान्त्रवर्णिकमेवे**त्यग्रे वक्ष्यति भगवान् सूत्रकारः । ऋगित्युपलक्षणम् । तेन **तत्त्वमसी**त्यादीनां यजुष्ट्वं **हावुहावु** इत्यादीनां सामत्वं च सिध्यतीति हृदयम् । **शेषे ब्राह्मणशब्द** इति लक्षणसञ्ज्ञया च ब्राह्मणत्वमपीत्याहुः—'**ब्रह्मे**'ति । सृष्ट्यादिवाक्यानां ब्रह्माऽप्रतिपादिकत्वेऽपि

श्रीलालूभट्टकृता गूढार्थदीपिका ।

रिक्तासूपनिषत्सु कथं वेदत्वमित्याशङ्क्याऽऽहुः—'**मन्त्रब्राह्मणरूपत्वं चोत्पश्याम**' इति । मन्त्रब्राह्मणरूपत्वमुपनिषत्सूपपादयन्ति—'**ऋगेवे**'त्यादिना । मन्त्रलक्षणं निरूप्य, **ऋचः सामानि यजूंषि सा हि श्रीरमृता सता**मिति मन्त्राणां त्रैविध्यमुक्तं तत्त्रैविध्यसमर्थनाय भेदसाधकं त्रयाणां लक्षणमुक्तम् । **ऋग् यत्रार्थवशेन पादव्यवस्थे**त्यादिना । अर्थवाचकपदानुरोधेन यत्र पादव्यवस्था न छन्दोनुरोधेन सा। एवं सत्येतस्य लक्षणस्य वेदान्तेष्वपि सत्त्वादुपनिषदां भवत्यृक्त्वम् । ऋक्त्वे च सिद्धा मन्त्रता । **ऋचः सामानि यजूꣳषी**ति श्रुतेः । सिद्धे मन्त्रत्वे वेदत्वं सिद्धमित्याशयः । ब्राह्मणत्वमप्युपपादयन्ति—'**ब्रह्मप्रतिपादकमिती**'ति । मन्त्राऽतिरिक्तस्य सर्वस्याऽपि

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

तथा वेदान्ता वेदा इति **वक्तुं** शक्यत एवेत्यर्थः । सिद्धान्तमुपसंहरन्ति—'**तस्मादि**'त्यादि । **न व्यभिचरन्ति** न वेदत्वशून्या भवन्ति। ननु मन्त्रब्राह्मणत्वाभावे कथं वेदान्तानां वेदत्वमित्यत आहुः—**मन्त्रे**त्यादि। तथा च यत्रार्थवाचकपदानुरोधेन पादव्यवस्था न छन्दोनुरोधेन सा ऋगिति पूर्वमीमांसायां लक्षणकरणादेतल्लक्षणस्य च वेदान्तेष्वपि सत्त्वात् ऋग्रूपमन्त्रत्वमव्याहतमेवेति भावः । ब्राह्मणरूपत्वं व्यवस्थापयन्ति—'**ब्रह्मे**'त्यादिना। एतदपि पूर्वतन्त्र एवोक्तं '**शेषे ब्राह्मणशब्द**' इत्यत्र **शेषे** मन्त्रा-

पादकं ब्राह्मणम्। तच्छेषाः सृष्ट्यादिप्रतिपादकाः। यद्यपि न विधीयते तथापि तादृशमेव

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

पादव्यवस्था, न छन्दोऽनुरोधेन सा ऋगिति। तथा चैतस्य लक्षणस्य वेदान्तेष्वपि सत्वादस्ति मन्त्रत्वमित्यर्थः। ब्राह्मणरूपत्वमप्युपपादयन्ति—'**ब्रह्मप्रतिपादकमि**'ति। 'शेषे ब्राह्मण' इत्यत्र मन्त्राऽतिरिक्तस्य सर्वस्यैव शेषशब्देनोक्तेर्वेदान्तानामपि ब्राह्मणलक्षणाऽऽक्रान्तत्वेन ब्रह्मप्रतिपादकत्वेन च ब्राह्मणत्वमपि सिद्ध्यतीति सर्वथैव वेदत्वं न व्यभिचरन्तीति भावः। नन्वेवं सृष्ट्यादिवाक्यानां का गतिर्ब्रह्मप्रतिपादकत्वाऽऽभावादित्यत आहुः—'**तच्छेषा**' इति। तेषां ब्रह्मप्रतिपादकानां वाक्यानां शेषभूता इति। तेषामपि माहात्म्यप्रतिपादनद्वारा ब्रह्मनिरूपकत्वमेवेति भावः।

ननु ब्रह्मप्रतिपादकत्वाद्ब्राह्मणत्वं वेदान्तानामिति यदुक्तं तन्न सम्भवति। यतः सर्वस्यैवाऽऽम्नायस्याऽध्ययनविधिविषयत्वेन क्रियार्थत्वाद्वेदान्तानामतदर्थानामपुरुषार्थानां भूतार्थत्वेन च पक्षादिभिः समानविषयाणां लौकिकवाक्यवत्तदर्थाऽनुवादकानां कथमिव प्रामाण्यसम्भवः। अबाधिताऽ-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

नन्वत्र कथं प्रतीयत इत्यत आहुः—'**ऋगेवे**'ति। **सत्यं ज्ञानमि**ति ऋगेवेत्यर्थः। '**ब्रह्मे**'ति। ब्रह्मप्रतिपादकं यद्यद्वाक्यं तत्सर्वं ब्राह्मणमित्यर्थः। '**तच्छेषा**' इति ब्रह्मप्रतिपादकवाक्यशेषा इत्यर्थः। '**सृष्ट्यादी**'ति। आदिनोपासनाप्रतिपादकवाक्यपरिग्रहः। 'तस्माद्वा एतस्मा'दित्यादिभागा इत्यर्थः। प्रतिपादका इत्येव पाठः। न तु प्रतिपादिका इति पाठः। ननु तथाप्यस्तु नाम वेदत्वं, निष्फलत्वरूपवेदोषरत्वनिवारणं तु न जातमित्यत आहुः—'**यद्यपी**'ति। '**न विधीयत**'

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

तच्छेषत्वेन सङ्गतिमाहुः—'**तच्छेषा**'इति। ब्रह्मप्रतिपादकवाक्यानां शेषाः। एतेनैव ब्रह्मस्वरूपज्ञानाङ्गं सृष्ट्यादिवाक्यप्रतिपादितमाहात्म्यज्ञानमित्युक्तं भवति। ननु ज्ञानस्याऽविधेयत्वात्कथमस्य

श्रीलालूभट्टकृता गूढार्थदीपिका।

शेषे ब्राह्मण इत्यत्र ब्राह्मणत्वोक्तेरुपनिषदामपि ब्राह्मणलक्षणाऽऽक्रान्तत्वादस्ति ब्राह्मणत्वम्। ब्रह्मप्रतिपादकं ब्राह्मणमिति शब्दसिद्ध्यापि ब्राह्मणत्वं सिद्ध्यतीत्याहुः—'**ब्रह्मप्रतिपादकमि**'ति। ब्रह्मसम्बन्धि ब्राह्मणम्। प्रतिपाद्यप्रतिपादकभावः सम्बन्धः। सिद्धे ब्राह्मणत्वे वेदत्वमस्तीति हार्दम्। अत्रैवं ज्ञेयम्। व्याख्यातृणां पुरुषत्वात्तदुक्तानां परस्परं कलहग्रस्तत्वात्पुरुषोक्तिमनादृत्य ऋषिवाक्यरूपं सूत्रमात्रमादृत्य ब्रह्मप्रतिपादकं ब्राह्मणमिति भगवता भाष्यकारेणोक्तम्। एवं **ऋचां मूर्द्धानं यजुषामुत्तमाङ्गमि**ति श्रुत्युक्तं वेदान्तानां वेदशिरस्त्वं सिद्धं भवतीति महांल्लाभः। **आपो वा इदमग्रे सलिलमासी**दित्यादिसृष्टिनिरूपकाणां गतिमाहुः—'**तच्छेषा**' इत्यादिना। सृष्ट्यादि-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

तिरिक्तसर्ववेदभागे **ब्राह्मणशब्दः** ब्राह्मणपदवाच्यत्वमित्यर्थः। एवं ब्रह्मप्रतिपादकवेदत्वेनापि ब्राह्मणत्वमुक्तं बोध्यम्। ननु सृष्ट्युपासनाप्रकारफलप्रशंसनादिवेदभागानां ब्रह्मप्रतिपादकत्वाभावाद्ब्राह्मणत्वं न स्यादित्यत आहुः—'**तच्छेषा**' इत्यादि। तथा च माहात्म्यज्ञानद्वारा तेषामपि ब्रह्मप्रतिपाद-

नागताऽसन्दिग्धबोधजनकत्वस्य तत्राऽसत्त्वात्। अतएवा'ऽऽम्नायस्य **क्रियार्थत्वादि**'त्यनेन शास्त्रस्य सर्वस्यापि क्रियापरत्वमङ्गीकृत्य '**सोरोदीदि**'त्यादीनां '**विधिना त्वेकवाक्यत्वादि**'-त्यनेन स्तुत्याद्यर्थतया मन्त्राणां '**चेषेत्वे**'त्यादीनां क्रियातत्साधनाऽभिधायित्वेन विध्येकवाक्यतां सम्पाद्य प्रामाण्यं समर्थितम्। न तु साक्षात्स्वार्थप्रत्यायनेन। नहि परिनिष्ठितवस्तुप्रतिपादकानां विध्येकवाक्यतां विनाऽर्थवत्त्वं क्वचिद्दृष्टमुपपन्नं वा। तस्मात्पूर्वकाण्डोक्तक्रियासमवायिकर्तृदेवतादि-प्रकाशनार्थत्वेन स्वप्रकरणोक्तोपासनादिक्रियार्थत्वेन वा प्रामाण्यस्य वक्तुं शक्यत्वान्न ब्रह्मप्रतिपादकत्वं वेदान्तानामुपपद्यत इति कथं ब्रह्मप्रतिपादकं ब्राह्मणमिति सङ्गच्छते। नन्वक्रियार्थत्वेऽपि ब्रह्मस्वरूप-विधिपरत्वं वेदान्तानां भविष्यति। न खल्वप्रवृत्तप्रवर्तनमेव विधिः। उत्पत्तिविधेरज्ञातज्ञापनाऽर्थ-त्वेन वेदान्तानामज्ञातं ब्रह्म ज्ञापयतां विधायकत्वात्स्वार्थ एव प्रामाण्यमिति चेत्। अनागतोत्पाद्यभा-वविषयत्वाद्विधिमात्रस्य। नन्वन्येषां तथात्वेऽप्युत्पत्तिविधेर्न तथात्वमिति वाच्यम्। उत्पत्त्यधिकार-प्रयोगविनियोगरूपाणां चतुर्णामपि परस्पराऽविनाभावादुत्पत्तिविधेरपि तथा नियमस्याऽवश्यकत्वात्। विधिमात्रस्य भावनाविषयत्वात्।

उच्यते। अस्ति तावद्वेदान्तानां ब्रह्मस्वरूपमात्रपरत्वम्। ननु क्रियासमवायिकर्तृदेवतादि-प्रकाशनाऽर्थत्वमेव कुतो नेतिचेत्त'**त्केन कं पश्येदि**'त्यादिवेदान्तवाक्येभ्यः क्रियाकारकफलनि-राकरणस्याऽवगतत्वात्। ननु सर्वत्र क्रियातत्साधनान्यतराऽभिधायित्वे पुरुषार्थपर्यवसायित्वं दृष्ट-मिति वेदान्तानां तदन्यतराऽनभिधायित्वे कथं तत्त्वमिति चेत्। '**ब्राह्मणो न हन्तव्य**' इत्यादौ निवृत्तिरुपदिश्यते। न च सा क्रिया तत्साधनं वेति तदुपदेशस्य निष्प्रयोजनत्वं प्रसज्येत। स्वभा-वप्राप्तहननविषयत्वबोधनेन भवति। नतु क्रियाकारित्वेन। नञः स्वसम्बन्धिनोऽभावबोधकत्वस्यैव प्रतीयमानत्वात्। अभावबुद्धिश्चौदासीन्यकारणं दग्धेन्धनाऽग्निवत्स्वयमेवोपशाम्यति। तथा च क्रिया-तत्साधनाऽभिधायित्वेऽपि पुरुषार्थपर्यवसानस्य तत्र दृष्टत्वादत्रापि तथात्वे न किञ्चिदनुपपन्नम्। ननु वेदान्तानां सिद्धवस्तुपरत्वे प्रत्यक्षादिभिः समानविषयत्वेन प्रमाणलक्षणाऽसङ्गतिरिति चेत्। '**तत्त्वमसी**'ति ब्रह्मात्मभावस्य वेदान्तव्यतिरेकेणाऽनधिगतत्वात्। न च सिद्धवस्तुनो हेयोपादेय-रहितत्वात्तत्प्रतिपादकानां तेषां परमपुरुषार्थत्वं स्यादितिवाच्यम्। '**त्वं हि नः पिता योऽस्माक-मविद्यायाः परं पारं तारयति**' '**श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मवि-दि**'ति। '**सोहं भगवः शोचामि तं मां भवांच्छोकस्य पारं तारयतु, तस्मै मृदित-कषायाय तमसः पारं दर्शयति भगवान् सनत्कुमार**' इत्येवमाद्याः श्रुतयो मोक्षप्रतिबन्ध-निवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति। पुरुषार्थपर्यवसायित्वं न व्यभिचरन्ति।

ननु पूर्वकाण्डोक्तकर्मसमवायिकर्तृदेवतादिप्रकाशनाऽर्थत्वाऽभावेऽपि ह्युक्तवाक्यगतोपास-नार्थत्वे किं बाधकमिति चेत्। एकत्वविज्ञानेन द्वैतविज्ञानस्योन्मथितत्वेनोपास्योपासकोपासनाभेद-घटितोपासनाया निरस्तसमस्तभेदप्रपञ्चे ब्रह्मणि वक्तुमशक्यत्वान्नोपासनाविधिशेषत्वमपि वेदान्तानां सम्भवति। ननु ज्ञानं नाम मानसी क्रिया। तथा च यथा स्वर्गकामस्याऽग्निहोत्रादिसाधनं विधीयते तथाऽमृतत्वकामस्य ब्रह्मज्ञानमिति कथं न विधिविषयत्वं तस्येति चेत्। क्रिया हि नाम सा, या

गोस्वामिश्रीमुरलीविरचिता अणुभाष्यव्याख्या।

वस्तुस्वरूपनिरपेक्षैव चोद्यते। पुरुषचित्तव्यापारायत्ता च यथा **यस्यै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेद्वषट्करिष्यन्' 'सन्ध्यां मनसा ध्यायेदि'**त्यादिषु ध्यानं चिन्तनं यथा मानसी क्रिया। पुरुषेण कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वात्। न तथा ज्ञानं प्रमाणजन्यं भूतवस्तु विषयम्। प्रमाणवस्तुपरतन्त्रत्वे कर्तुमकर्तुमन्यथाकर्तुमशक्यत्वेन चोदनाऽविषयत्वात्। यथा **'वाचं धेनुमुपासीत' 'मनो ब्रह्मेत्युपासीत' 'आदित्यो वै देवमधिव'**त्यादौ वागादिषु धेन्वादिबुद्धिर्मानसी क्रिया। नोदकवाक्यमात्रजन्यत्वात्पुरुषतन्त्रत्वाच्च। न तथा वागादिषु वागादिबुद्धिः पूर्वोक्तहेतुद्वयाऽभावात्।

नन्वेवं सति **'द्रष्टव्य'** इत्यादीनि कथं सङ्गतानि भविष्यन्तीति विधिरूपत्वस्य प्रतीयमानत्वादिति चेत्। अत्र ब्रूमः। तद्विषये श्रूयमाणा अपि लिङ्गादयोऽनियोज्यविषयत्वाद्ब्रमणिप्रयुक्तवास्यादितैक्ष्ण्यवत्कुंठीभवन्तो दर्शनादीनामर्हत्वादिबोधनेन बहिर्मुखपुरुषस्वाभाविकप्रवृत्तिविषयविमुखीकरणेन सार्थका भवन्ति। यद्यपि बहिर्मुखोऽपीष्टं मे भूयादनिष्टं मे मा भूदित्यनुसन्धाय प्रवर्तते। इष्टतत्साधनताज्ञानस्य प्रवृत्तिमात्रहेतुत्वात्। तथापि तदभिमतस्येष्टस्याऽनिष्टत्वात्स्वाभाविकेष्टप्रदर्शनार्थं तदुपयोगात्। ततस्तत्कारणापेक्षया **'श्रोतव्यो मन्तव्य'** इत्यादिभिः फलोपकार्यङ्गाभ्यां सह श्रवणमेव साधनत्वेन विधीयते। चोदनाविषयत्वादिति। तदेतदनुसन्धायोक्तं **ब्रह्मप्रतिपादक-**

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

इति। ब्रह्मज्ञानमिति शेषः। यथा 'स्वर्गकामो यजेते'तिवाक्यस्य विधित्वात् स्वर्गरूपफलजनकयागप्रतिपादकत्वं तथात्र मोक्षरूपफलजनकब्रह्मज्ञानविधायकविध्यभावाद्वेदोषरत्वमिति भावः। वेदोषरत्वं खण्डयन्ति–**'तथापी'**ति। तादृशविध्यभावेऽपीत्यर्थः। **'ज्ञानमि'**ति। **तस्माद्वे**त्यादि-

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

शेषत्वमित्यत आहुः—**'यद्यपी'**ति। **'तादृशमि'**ति। कर्तृत्वादिधर्मविशिष्टं ब्रह्मज्ञानम्। ननु

श्रीलालूभट्टकृता गूढार्थदीपिका।

प्रतिपादका अपि सृष्ट्यादिद्वारा ब्रह्ममहिमानं वर्णयन्तो ब्रह्मप्रतिपादका एवेति भावः। ननु सृष्ट्याद्यर्थवादानां शेषत्वमनुपपन्नम्। **स्तुत्यर्थेन विधीनां** स्युरित्यनेन विधिशेषतयैव तेषां सार्थक्यकथनादित्याशङ्क्याऽऽहुः—**'यद्यपि न विधीयत'** इत्यादि। यद्यपि ब्रह्म न विधीयते। स्वतः सर्वदा विद्यमानत्वेनाऽऽविधेयत्वात्। तथात्र सृष्ट्याद्यर्थवादानामनुपयोग इवाभाति, तथापि **ब्रह्मविदाप्नोति परमि**त्यादौ फलप्राप्त्यर्थं ब्रह्मज्ञानाऽपेक्षोक्ता। ब्रह्मज्ञानं तु द्वेधास्ति। स्वरूपज्ञानं, लीलाविशिष्टज्ञानं च। तत्र **सत्यं ज्ञानमनन्तं ब्रह्मेति** स्वरूपज्ञानमुक्त्वा, **तस्माद्वा एतस्मादि**त्यनेन सर्गलीला निरूपिता। इत्थं स्वरूपज्ञानं लीलाज्ञानं च परप्राप्तिसाधकमिति तन्निरूपकाः सृष्ट्यादिप्रतिपादका वेदान्ता ज्ञानशेषभावं भजन्तोऽत्यन्तमुपयुक्ता भवन्तीत्याहुः—**'तादृशमेव**

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

कत्वात् ब्रह्मप्रतिपादकवाक्यशेषतया तेषामपि ब्राह्मणत्वमव्याहतमित्यर्थः। **यद्यपी**त्यादि। **न विधीयते** सृष्ट्यादिवाक्यैर्माहात्म्यज्ञानं ब्रह्मणि न विधीयते। **तथापि** विधानाभावेपि। **तादृशमेव** ब्रह्मबोधक-

ज्ञानं फलायेति युक्तमुत्पश्यामः । पूर्ववैलक्षण्यन्तु भूषणाय । काण्डद्वयस्याऽन्योन्योप-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

मित्यारभ्य उत्पश्याम इत्यन्तमित्यलं विस्तरेण । नन्वेवं ब्रह्मज्ञानस्य धर्मवैलक्षण्यं भवेत्तदेव तु बाधकमितिचेत्तत्राह—'**पूर्ववैलक्षण्यमि**'ति । अलंकारो ह्ययमस्माकं यत्पूर्ववैलक्षण्यम् । धर्मस्य त्रिवर्गसाधकत्वाद्ब्रह्मज्ञानस्य च तद्विरोधिकृतकृत्यतासाधकत्वान्महदेव वैलक्षण्यम् । तथाच श्रुतिः—'**आत्मानं चेद्विजानीयादहमस्मीति पूरुषः । किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेदि**'ति । स्मृतिश्च '**एतद्बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारते**'ति । ननूत्तरस्य पूर्वापेक्षयाऽभ्यर्हितत्वे शास्त्रयोनित्वादिति सामान्यग्रहणं निःप्रयोजनम् । उपनिषद्योनित्वादित्यस्यैव सप्रयोजनत्वादित्यत आह—'**काण्डद्वयस्ये**'ति । अध्ययनविधिविषयत्वेन सर्वोऽपि वेदराशिः पुरुषार्थश्च नाऽमृतत्वव्यतिरेकेणाऽन्यो भवितुमर्हति । तथा च 'स्वर्गकामस्वाराज्यकामा'दिशब्दश्रवणा-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

वाक्यादेव ब्रह्मणि जगत्कर्तृत्वज्ञानमित्यर्थः । '**फलाये**'ति । परप्राप्तिरूपफलायेत्यर्थः । '**युक्तमि**'ति । फलयुक्तमित्यर्थः । तथा च कुत्रापि वेदोपरत्वं नास्तीति भावः । ननु पूर्वकाण्डे विधिवाक्यादेव फलं प्रतीयतेऽत्र तु तथा नास्तीति वैलक्षण्यमित्यत आह—'**पूर्वे**'ति । '**भूषणाये**'ति । विधिवाक्याभावेऽपि केवलवाक्यार्थज्ञानादेव फलं जायत इत्याधिक्यमेव भूषणार्थं भवतीत्यर्थः ।

एवंरीत्या मीमांसकमतं निराकृत्य शास्त्रयोनित्वादित्यत्र शास्त्रपदस्वारस्यमाहुः—'**काण्डे**'ति । '**अन्योन्ये**'ति । उभयोरेकवाक्यत्वबोधनायेत्यर्थः । '**साधारणे**'ति । सूत्र उभयसाधारणं

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

पूर्वतन्त्रे विहितस्यैव फलदत्वमुक्तं, कथमविहितस्य तथात्वमित्यत आहुः—'**पूर्वे**'ति । वैयर्थ्यनिरासत्वादिति भावः । एतेन पूर्वोक्तोपरत्वमपि निरस्तं ज्ञेयम् । शास्त्रपदाऽऽदानस्य प्रयोजनान्तरम-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

ज्ञानमि'त्यादि । '**तादृशमेवे**'ति । सृष्ट्यादिकर्तृत्वविशिष्टज्ञानमेवेत्यर्थः । '**फलाये**'ति । परप्राप्तिरूपाय फलायेत्यर्थः । तथा च तादृग्ज्ञानविषयीभूतलीलाप्रतिपादकत्वेन ज्ञानशेषभूताः सृष्ट्याद्यर्थवादा इति फलितम् । ननु पूर्वकाण्डेऽर्थवादा विध्युक्तस्तावकत्वेन शेषभावं भजन्तोऽनुपयोगित्वमपनुदन्तः सार्थका भवन्त्यत्र तु सिद्धपदार्थमहिमानं वर्णयन्तो ज्ञानशेषभावं स्फोरयन्तः सार्थकतामापद्यन्त इत्युक्तं, तथा च धर्मनिरूपकपूर्वकाण्डवलक्षण्यमेव महद्दूषणमित्याशङ्क्याऽऽहुः—'**पूर्ववैलक्षण्यं त्वि**'त्यादि । पूर्वकाण्डस्य नश्वरस्वर्गादिसाधकत्वमुत्तरस्य त्वक्षयरूपब्रह्मप्राप्तिसाधकत्व-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

वाक्यार्थज्ञानविषयब्रह्ममाहात्म्यविषयकमेव । **फलाय** भक्तिरूपफलसम्पादनायेत्यर्थः । नन्वेवं ब्रह्मज्ञानस्य धर्मवैलक्षण्यं स्यादतआहुः—'**पूर्वे**'**त्यादि** । **भूषणाय** धर्मस्य त्रिवर्गसाधकत्वात् ब्रह्मज्ञानस्य च तद्विरोधिमोक्षरूपपरमफलसाधकत्वात् धर्मवैलक्षण्यं इष्टमेवेत्यर्थः । 'आत्मानं चेद्विजानीयादहमस्मीति पूरुषः । किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेदि'तिश्रुतेः । ननूत्तरकाण्डस्य पुरुषार्थपर्यवसाने पूर्वस्य च त्रिवर्गोपक्षीणत्वे काण्डद्वयोपसंहारकं शास्त्रयोनित्वादितिसामान्योपादानमनुचितं उपनिषद्योनित्वादित्येव चोचितमित्यत आहुः'—**काण्डद्वयस्ये**'त्यादि । तथा चाध्ययनाध्यापनविधिविषयत्वेन

कारित्वाय साधारणग्रहणम् । 'यदेव विद्यया करोती' त्यादिना पूर्वशेषत्वं सर्वस्य । 'तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ती'त्यादिना सर्वस्योत्तरशेषत्वम् । कर्मब्रह्मणोः क्रियाज्ञा-नयोर्धर्मिपरत्वेनैक्यात्कर्तृवाक्येषु सर्वत्र न विरोधः । तस्माच्छास्त्रयोनित्वं सिद्धम् ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

त्पूर्वस्य पुरुषार्थत्वमस्ति नवेति सन्देहनिराकरणाय **'यदेव विद्यया करोती'**त्यादिना ज्ञानपूर्वं कृतस्य वीर्यवत्तरत्वनिरूपणेन पुरुषार्थत्वमबाधितमेव सिध्यति । न चैवमुत्तरस्य पूर्वशेषत्वे गौणत्वा-पत्तिरिति वाच्यम् । **'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती'**त्यादिना पूर्वस्याऽप्युत्तर-शेषत्वश्रवणात् । **सर्वस्य** कृत्स्नस्येत्यर्थः । नन्वेवं साम्यापत्तिरेव स्यादिति चेदिष्टापत्तिः । **'वेदो नारायणः साक्षादि'**त्यादिना साम्यस्य निष्प्रत्यूहत्वात् ।

ननु वेदस्य सर्वस्याऽप्यपौरुषेयत्वेन निरस्तसमस्तदोषाशङ्कत्वे कथं प्रजापत्यग्निहोत्रब्रह्मणां कर्तृत्वोक्तिरुपपन्ना भविष्यतीत्याशङ्क्याह—**'कर्मब्रह्मणोरि'**ति । क्रियायां प्रविष्टत्वात्क्रियारूपत्वेन

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

शास्त्रपदग्रहणमित्यर्थः । एकवाक्यत्वमेवाऽऽहुः—**'यदेवे'**ति । चतुर्थाध्याये, **यदेव विद्ययेति** हीति सूत्रे वक्ष्यते । **पूर्वशेषत्वं** प्रथमतो ब्रह्मज्ञानं सम्पाद्यानन्तरं कर्मकरणे कर्मणः पौष्कल्यं जायत इति वेदान्तस्य पूर्वकाण्डाङ्गत्वमित्यर्थः । एवं पूर्वस्योत्तराङ्गत्वमाहुः—**'तमेवे'**ति । कर्मणा च भगवत्प्रसादेन चित्तशुद्धौ ज्ञानमुत्पद्यत इति परस्परापेक्षितत्वेन साकाङ्क्षत्वादेकार्थप्रतिपादकत्वा-च्चैकवाक्यत्वमिति भावः । ननु कथमुभयोरेकार्थत्वमत आहुः—**'कर्मब्रह्मणोरि'**ति । कर्मणः

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

प्याहुः—**'काण्डद्वयस्ये'**ति । तत्र प्रमाणमाहुः—**'यदेवे'**त्यादिना । **'सर्वस्ये'**ति । उत्तरस्येति शेषः । नन्वेवमन्योन्याश्रय इति वाच्यम् । प्रामाणिकेऽर्थे तदनभ्युपगमात् । **'ननु न सर्वोपी'**त्युक्तं विरोधं परिहरन्ति—**'कर्मब्रह्मणो'**रिति । कर्मज्ञानकाण्डयोः । **'क्रियाज्ञानयोरि'**ति । स्वस्वप्रतिपाद्य-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

मतस्तद्वैलक्षण्यमत्र भूषणायैवेत्यर्थः । **'काण्डद्वयस्ये'**त्यादि । **यदेव विद्यया करोति श्रद्ध-योपनिषदा वा तदेव वीर्यवत्तरं भवतीति** श्रुतेः पूर्वकाण्डस्योत्तरकाण्डमुपकरोति । **तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्तीति** श्रुतेरुत्तरकाण्डस्य पूर्वकाण्डमुपकरोत्येवं यः

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

सर्वोपि वेदराशिः पुरुषार्थपर्यवसायी पुरुषार्थश्च परब्रह्मप्राप्तिरेव नान्यो भवितुमर्हति । इत्थं च पूर्वकाण्डे स्वर्गकामस्वाराज्यादिकामनाश्रवणात् परमपुरुषार्थपर्यवसाने च सन्देहः प्राप्तः । तन्निरासाय उक्तपुरु-षार्थपर्यवसानाय च 'यदेव विद्यये'त्यादिना वीर्यवत्तरत्वनिरूपणेन कर्मणां पुरुषार्थपर्यवसानमुक्तम् । इत्थं च सर्वस्यापि वेदराशेः पूर्वकाण्डोक्तकर्मशेषत्वमागतम् । एवमुत्तरस्य पूर्वशेषत्वे गौणत्वं स्यादत आहुः—**'तमेतमि'**त्यादि । तथा च वेदानुवचनयज्ञदानतपःप्रभृतिभिर्ब्रह्मज्ञानेच्छापूर्तेः श्रवणात्सर्वस्य वेदराशेरुत्तरशेषत्वमिति न गौणता । सर्वस्य वेदस्य ब्रह्मत्वेन साम्ये त्विष्टापत्तिः । ननु सर्वस्य वेदस्य समप्रामाण्ये प्रजापत्यग्निहोत्रादीनामपि कर्तृत्वप्रतिपादनाद्ब्रह्ममात्रपर्यवसितं कर्तृत्वं कथं सिद्ध्येदित्यत आहुः—**'कर्मब्रह्मणो'**रिति । **क्रियाज्ञानयोः** क्रियाज्ञानस्वरूपयोः । **धर्मिपरत्वेने**त्यादि । क्रियायाः

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

प्रतीयमानत्वेऽपि कर्मणो **'यज्ञो वै विष्णुरि'**तिश्रुतेर्धर्मिरूपत्वाज्ज्ञाने प्रविष्टत्वाज्ज्ञानरूपत्वेन प्रतीयमानत्वेऽपि ज्ञानस्य **'विज्ञानमानन्दं ब्रह्मे'**ति धर्मिरूपत्वादुभयकारणत्वनिरूपकयोरपि वाक्ययोरेकवाक्यत्वार्थं विशिष्टैकधर्मिनिरूपकत्वस्याऽवश्याऽभ्युपेयत्वात् । **कर्तृवाक्येषु** कर्म-ब्रह्मकर्तृत्वप्रतिपादकवाक्येषु पूर्वोत्तरकाण्डस्थेषु सर्वत्र विरोधो नास्तीत्यर्थः । धर्मरूपेण भेदेऽपि धर्मिण एकत्वात् । नन्वेवं कर्मकर्तृत्वबोधकानां तेषां परिहृतेऽपि विरोधे प्रजाप्रत्यादिकर्तृत्वबोधकानां कथं सङ्गतिरिति चेत् । तेषामवान्तरकारणत्वेन विरोधस्याऽनवसरपराहतत्वात् । ननूक्तं तस्मात्प-रस्याऽश्रवणादिति । नैष दोषः । तेषामपि यज्ञतपःप्रभृतिसाधनकरणाऽनन्तरमेव कारणत्वोक्तेः । उत्तरकाण्डे ततोऽपि परस्य ब्रह्मणः श्रवणाच्च । न च प्रकरणभेदात्कथं तस्य प्रयोजकत्वमिति वाच्यम् । सर्वस्याऽपि वेदस्यैकार्थप्रतिपादकत्वेनैकवाक्यत्वात्प्रकरणभेदस्य बुद्धिसौकर्यार्थं कल्पितत्वात् । अधुनोक्तमर्थमुपसंहरन्ति—**'तस्मादि'**ति । पूर्वोक्तात्कारणकलापाद्ब्रह्मण एव शास्त्रोक्तं कारणत्वं सिद्ध-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

क्रियारूपत्वेन ब्रह्मणो ज्ञानरूपत्वेन, **धर्मो यस्या**मित्येकादशस्कन्धोक्तेर्ब्रह्मणोऽपि धर्मरूपत्वेन धर्मिणोः क्रियाज्ञानयोरैक्यात्पूर्वोत्तरमीमांसयोरपि क्रियाज्ञानरूपधर्मिविचारात्मकत्वेनैक्यादेव पूर्वो-त्तरकाण्डगतं कर्तृत्वं ब्रह्मण्येव पर्यवस्यतीति न विरोध इति भावः । **'सिद्धमि'**ति । ब्रह्मणि वेदप्रतिपाद्यं जगत्कर्तृत्वं सिद्धमित्यर्थः ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

भगवत्क्रियाज्ञानशक्तिरूपयोर्यो धर्मस्तत्परत्वेन भगवद्धर्माणां भगवदभिन्नत्वाद्**यज्ञो वै विष्णु-र्विज्ञानमानन्दं ब्रह्मे**त्यादिश्रुतेश्च धर्मनिरूपणेनानेन धर्मिप्रतिपत्तिसम्पत्तिवद्विशिष्टधर्मनिरूपकत्वेनै-क्यादेकार्थप्रतिपादकत्वेनैकवाक्यत्वाद्धेतोः कर्तृवाक्येषु सर्वत्र पूर्वोत्तरकाण्डस्थितेषु मिथो न विरोध

श्रीलालूभट्टकृता गूढार्थदीपिका ।

परस्परोपकारकत्वलक्षणो गुणस्तेन चैकहार्दत्वसूचनाय शास्त्रयोनित्वादित्यत्र काण्डद्वयसाधारणस्य शास्त्रपदस्य ग्रहणम् । अन्यथा वेदान्तयोनित्वादित्येव वदेत् । नन्वेवमेकहार्दत्व उत्तरकाण्डे ब्रह्मणः कारणत्वोक्तिवत्पूर्वकाण्डेऽपि ब्रह्मकारणत्वोक्तिरित्याशङ्क्याऽऽहुः—**'कर्मब्रह्मणोरि'**त्यादि । पूर्व-काण्डे प्रतिपाद्या या यज्ञात्मकभगवतो धर्मरूपा, तस्यां प्रविष्टस्य भगवतः क्रियारूपत्वम् । उत्तर-स्मिन् काण्डे प्रतिपाद्यं यज्ज्ञानं ब्रह्मात्मकं भगवतो धर्मरूपं, तस्मिन् धर्मरूपे ज्ञाने प्रविष्टस्य भगवतो ज्ञानरूपत्वम् । एवं क्रियाज्ञानरूपयोः कर्मब्रह्मणोर्धर्मिपरत्वेन धर्मी यो भगवान् तत्परत्वेन तद्रूपत्वे-नैक्यात्कर्तृवाक्येषु कर्मनिष्ठकर्तृत्वनिरूपकवाक्येषु न विरोधः । अग्निहोत्ररूपे कर्मणि यत्कर्तृत्वं निरूपितं ब्रह्मनिष्ठमेव, कर्मब्रह्मणो भगवद्रूपत्वेनाऽविरोधादिति भावः । एकदेशिमतदूषणार्थमनु-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

धर्मिरूपत्वं 'यज्ञो वै विष्णुरि'तिश्रुत्या, ज्ञानस्य धर्मिरूपत्वं 'विज्ञानमानन्दं ब्रह्मे'तिश्रुत्यावसेयम् । **न विरोधः** वेदे यत्र क्वापि प्रतिपादितं कर्तृत्वं ब्रह्मण्येव पर्यवस्यतीति न विरोध इत्यर्थः । **तस्मात्** पूर्वोक्तरीत्याऽविरोधप्रतिपादनात् । **शास्त्रयोनित्वं** शास्त्रोक्तकर्तृत्ववत्त्वं ब्रह्मणि सिद्धमित्यर्थः ।

केचिदत्र जन्मादिसूत्रं लक्षणत्वादनुमानमिति वर्णयन्ति । अन्ये पुनः श्रुत्यनुवाद-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

मित्यर्थः । एकदेशिमतद्वयमनूद्य दूषयति—'**केचिदि**'त्याऽऽरभ्यो'**पेक्ष्यमि**'त्यन्तेन । **जन्माद्यस्य यत** इत्यस्य संसारिव्यतिरिक्तेश्वराऽस्तित्वसाधकाऽनुमाननिरूपकत्वमिति वदन्ति । अनुमानप्रकारस्तु—संसारिव्यतिरिक्त आत्माऽस्ति । जगज्जन्मादिकारणत्वादिति । अत्र हेतुनिरूपकत्वादनुमानरूपत्वं सूत्रस्य । अन्ये पुनर्यथा ब्रह्मणि **श्रुतिः** प्रमाणं तथा '**यतो वे**'त्यादिश्रुत्यनुवादकमि-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

नैयायिकमतमनूद्य दूषयन्ति–'**केचिदत्रे**'ति । अत्र ईश्वरस्य जगत्कर्तृत्वविषये । '**लक्षणत्वादि**'ति । लक्षणबोधकत्वादित्यर्थः । '**अनुमानमि**'ति । तेषां मते लक्षणस्येतरभेदसाधकत्वात् गन्धवत्त्वस्य पृथिव्या लक्षणकरणेन पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात् । यन्नैवं तन्नैवं यथा जलमिति व्यतिरेक्यनुमानेन यथा पृथिव्यां जलादिभेदः सिद्ध्यति, तथाऽनुमानद्वयेन जगत्कर्तृत्वस्येश्वरस्य च सिद्धौ सूत्रैर्जगज्जन्मादिकर्तृत्वरूपलक्षणकरणेन 'ब्रह्मस्वरूपं जीवजडव्यतिरिक्तं भवितुमर्हति । जगज्जन्मादिकर्तृत्वात् । यन्नैवं तन्नैवम् । यथा जीव' इति जीवभिन्नत्वसाधकं व्यतिरेक्यनुमानमित्यर्थः । ननु कीदृशानुमानद्वयमिति चेदुच्यते–प्रथमं जगति कार्यत्वसाधकमेकमनुमानम् । तथा हि–जगत् कार्यम् । सावयवत्वात् । महत्त्वे सति क्रियावत्वात् । महत्वे सति मूर्तत्वाच्च । घटादिवदित्यनुमानेन जगतः कार्यत्वसिद्धौ सत्यामनन्तरं कार्यहेतुकमपरमनुमानम् । तदित्थम् । जगत् बुद्धिमत्कारणपूर्वकम् । कार्यत्वात् । घटादिवदित्यनुमानेन जगति बुद्धिमत्कारणपूर्वकत्वसिद्धिः । अथ च जगत्कारणीभूतः चतुर्दशभुवनात्मकविचित्रप्रपञ्चरचनासमर्थो बुद्धिमान् को वेत्याकाङ्क्षायामीदृशजगदुपादानोपकरणसम्प्रदानप्रयोजनाभिज्ञः कश्चिन्मन्तव्य इति जीवस्य तादृशाभिज्ञत्वाभावात्प्रकृतेश्च जडत्वादुभयभिन्नो भगवानेवैतादृश इत्यनुमानमेव ब्रह्मणि जगत्कर्तृत्वे प्रमाणं, न तु श्रुतिरिति सूत्रकाराऽऽशयो लक्षणकरणेन ज्ञायत इति नैयायिका वर्णयन्ति । अधिकं प्रकाशेऽनुसन्धेयमिति दिक् ।

विज्ञानेन्द्रभिक्षुमतमाहुः—'**अन्ये पुनरि**'ति । '**श्रुत्यनुवादकमि**'ति । सूत्रमिति शेषः । सूत्रमनुमानोपष्टम्भकश्रुत्यनुवादकमित्यर्थः । तथा चास्मिन्सूत्रे **यतो वा इमानि भूतानि**

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

इत्यर्थः । तत्तद्रूपैकदेशिनोः प्रत्येकमतमनूद्य दूषयन्ति—'**केचिदि**'त्यारभ्य '**प्रमाणमित्यन्तेन** । **अनुमानमि**'ति । केवलव्यतिरेक्यनुमानमस्मिन् पक्षे । लिङ्गस्यैव करणत्वाऽभ्युपगमात् । '**श्रुती**'ति ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

वदन्ति—'**केचिदत्रे**'त्यादिना । जन्मादिसूत्रस्य हेतुनिरूपकत्वादनुमानत्वमित्यर्थः । '**लक्षणत्वादि**'ति । जगज्जन्मादिकारणत्वलक्षणादित्यर्थः । लक्षणं ह्यसाधारणो धर्मः । गोः सास्नादिवत् । सचेतरभेदसाधकः । तथा च संसारिव्यतिरिक्तः परमात्मा । जगज्जन्मादिकारणत्वादित्यनुमानम् । '**अनुमानमिती**'ति अनुमाननिरूपकवाक्यस्याप्यनुमानत्वव्यवहारादस्य सूत्रस्यानुमानत्वमित्यर्थः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

अनुमानं केवलव्यतिरेक्यनुमानम् । तथा हि 'जन्माद्यस्य यत' इत्यनेन हेतुसाध्यप्रदर्शनात् ब्रह्म इतरभिन्नास्तित्ववत् जगज्जन्मादिकर्तृत्वात् यन्नैवं तन्नैवमिति बोध्यम् । **श्रुत्यनुवादकं** 'यतो

कमाहुः । सर्वज्ञत्वाय श्रुत्यनुसार्यनुमानञ्च ब्रह्मणि प्रमाणमिति । तत्तु 'तन्त्वौपनिषदं पुरुषं पृच्छामी'ति केवलोपनिषद्वेद्यत्वादुपेक्ष्यम् । अनधिगतार्थगन्तृत्वात्प्रमाणस्य ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

दमनुमानमपीत्याहुः । अनुवादप्रयोजनमाहुः—'**सर्वज्ञत्वाये**'ति । ननु श्रुतिसत्त्वेऽनुमानस्य किं प्रयोजनमित्यत आहुः—'**श्रुत्यनुसारी**'ति । यथा श्रुत्या जगज्जन्मादिकारणत्वप्रदर्शनेन तस्य सर्वज्ञत्वादिकं सिध्यति तथा तदनुसार्यनुमानेनापि तत्सिद्धौ दार्ढ्यमेव भवेदिति भावः । एवं मतद्वयमुक्त्वा निराकुर्वन्ति—**तत्त्विति** । **तं त्वौपनिषदं पुरुषं पृच्छामीति** श्रुतेस्तस्य केवलोपनिषद्वे-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

जायन्त इति विषयवाक्यम् । तेन च केवलं कर्तृत्वमेव बोध्यते, न तु जगदुपादानादिकारणज्ञानत्वम् । तदभाव ईश्वरस्य सर्वज्ञता न स्यादित्येतदर्थं श्रुतिबोधितकर्तृत्वहेतुना जगदुपादानाऽभिज्ञत्वं साधनीयम् । तच्चेत्थम् । ब्रह्म पक्षीकृत्य जगदुपादानादिगोचरापरोक्षज्ञानेच्छाकृतिमत्त्वं साध्यते । जगत्कर्तृत्वाद्धेतुः । कुलालवत् । कुलालस्य घटकर्तृत्वमस्ति घटाद्युपादानमृत्तिकाचक्रचीवरादिज्ञानमप्यस्तीति तस्य यथा तद्विषयकज्ञानवत्त्वं तथेश्वरस्यापि जगदुपादानविषयकज्ञानेच्छाकृतिमत्त्वस्य सत्वात्सर्वज्ञत्वं सर्वशक्तिमत्त्वं च सिद्ध्यतीति भावः । **सर्वज्ञत्वाये**ति । ईश्वरस्य सर्वज्ञत्वसिद्ध्यर्थमित्यर्थः । '**श्रुत्यनुसार्यनुमानमि**'ति । यथाऽऽदौ धूमप्रत्यक्षे जातेऽनन्तरं वह्न्यनुमितिः कर्तुं शक्यते । एवं श्रुत्या कर्तृत्वशाब्दबोधे जातेऽनन्तरं सर्वज्ञत्वानुमितिः कर्तुं शक्यत इति श्रुत्यनुसारित्वमनुमानस्येत्यर्थः । '**अनुमानं चे**'ति । सर्वज्ञत्वे सर्वशक्तिमत्त्वे चानुमानं प्रमाणम् । कर्तृत्वे च श्रुतिः प्रमाणमिति चकारार्थः ।

एवं च नैयायिकमते सूत्रे विषयवाक्यमेव नास्ति केवललक्षणमुक्तम् । तेन च ब्रह्मण्यनुमानमेव प्रमाणं श्रुतिस्पर्शोऽपि नास्ति । भिक्षुमते तु यतो वेति विषयवाक्यं वर्तते, परन्तु तेन विना कर्तृत्वरूपहेतुज्ञानाऽभावेऽनुमितिर्न भविष्यतीत्यनुमानोपष्टम्भकमेव सूत्रमिति रहस्यम् । तन्मतद्वयमेकोक्त्यैव दूषयन्ति—'**तंत्वि**'ति । '**औपनिषदमि**'ति । बृहदारण्यके शाकल्यब्राह्मण इदं वाक्यम् ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

यतो वा इमानि भूतानीत्यादिश्रुत्यनुवादकमत्रलक्ष्म । हीत्याद्यनुषज्यते । अनुमानस्य ब्रह्मप्रमाणत्वाऽभावमाशङ्क्याहुः—'**श्रुत्यनुसारी**'ति । '**तत्त्वि**'ति । पूर्वोक्तं द्वयमप्यनुमानम् । श्रुत्यनुसारित्वात्तस्योपेक्षानर्हत्वमाशङ्क्याहुः—'**अनधिगते**'ति । श्रुत्यनुसारिणस्तस्य तथात्वाभावान्न तत्त्व-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

'**अन्ये पुनरि**'त्यादि । यथा ब्रह्मणि श्रुतिः प्रमाणं तथा श्रुत्यनुवादकमनुमानमपि प्रमाणमित्याहुः । प्रयोजनमाहुः—'**सर्वज्ञत्वाये**'ति । श्रुतिर्हि जगज्जन्मादिकारणत्वं प्रदर्श्य ब्रह्मणः सर्वज्ञतां साधयति । तथा तदनुसार्यनुमानमपि जगज्जन्मादिकारणत्वं साधयत्सर्वज्ञत्वं साधयतीत्यर्थः । एवमनूद्य दूषयन्ति–'**तत्तु तन्त्वौपनिषदं पुरुषं पृच्छामी**'त्यादिना । **औपनिषदमि**ति विशेषणेनोपनिष-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

वा' इतिश्रुत्यनुवादकम् । **सर्वज्ञत्वाय** सर्वकर्तृत्वस्य सर्वज्ञतां विनाऽसम्भवेन सर्वज्ञत्वसिद्धये इत्यर्थः । तन्मतद्वयं दूषयन्ति—'**तत्त्वि**'त्यादिना । **केवले**ति तुशब्देनोपनिषदतिरिक्तवेद्यत्वनिरासात्

मननिदिध्यासनयोः श्रवणाङ्गत्वम् । सन्देहवारकत्वाच्छास्त्रस्याऽपि तदङ्गत्वमिति ॥ २ ॥

॥ इति प्रथमाध्याये प्रथमे पादे द्वितीयं जन्माद्यधिकरणम् ॥

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

द्यत्वेनाऽनुमानस्याऽनवसरपराहतत्वात् । यथाकथंचित्तदवगतिसाधनत्वाऽभ्युपगमेऽपि न तस्य प्रामाण्यम् । श्रुत्येकसमधिगतत्वेन प्रमाणलक्षणाऽभावात् । तदेवाऽऽहुः—'**अनधिगते**'ति । ननूपनिषन्मात्रवेद्यत्वे श्रवणस्यैव तत्साधनत्वं नान्यस्येति पर्य्यवस्यति । तथा च मननिदिध्यासनयोरपि श्रुतौ तदवगतिसाधकत्वोक्तेस्तत्राऽपि प्रामाण्याऽनुपपत्तिरित्यत आहुः—'**मनने**'ति । नहि तयोः

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

'**पुरुषमि**'ति । उपनिषन्मूलप्रमाणकं पुरुषमित्यर्थः । '**केवले**'ति । ब्रह्मणो यावत्प्रमाणाऽगोचरत्वेऽपि प्रतिप्रसवेनोपनिषद्वेद्यत्वार्थं केवलपदम् । तेन च विश्वरूपदर्शने[1], **धातुः प्रसादादि**तिश्रुत्या मननादिद्वारा दर्शनमपि **आत्मा वारे द्रष्टव्य** इतिश्रुत्या प्रतिपाद्यत इति नानुमानवेद्यत्वमिति भावः । '**उपेक्ष्यमि**'ति । एकेन श्रुतिं विहायाऽनुमानवेद्यत्वमपरेण च श्रुतिसहकारेणाऽनुमानवेद्यत्वमुक्तमिति मतद्वयमपि दूरतस्त्याज्यमित्यर्थः ।

अथैवं येन श्रुतिप्रामाण्यमेव न स्वीक्रियते तादृशबाह्यं प्रति किं वक्तव्यमिति चेत् । मैवम् । नानायुक्तिप्रसारणशीलानां बाह्यानां निराकरणार्थमेव त्वदीयं मतम् । न तु ब्रह्मणि प्रामाण्यसिद्ध्यर्थम् । एवं च वेदप्रामाण्यमभ्युपगच्छता त्वयाप्युपनिषद्वेद्यत्वं स्वीकर्तव्यम् । तथा च ब्रह्मणः प्रमाणान्तरावेद्यत्वादनुमानप्रसर एव नास्तीत्यलमधिकेन । '**अनधिगतार्थे**'ति । न अधिगतः अनधिगतः अज्ञातः । एतादृशो योऽर्थस्तत्र गन्तृत्वात्तद्विषयकबोधजनकत्वादित्यर्थः । **प्रमाणस्य** अनुमानादिप्रमाणस्येत्यर्थः । तथा च श्रुतिसिद्धेऽर्थे नानुमानं प्रमाणमिति भावः । नचैवं सर्वज्ञत्वसिद्धिर्न स्याच्छ्रुत्या कर्तृत्वस्यैव बोधितत्वादिति वाच्यम्? **ब्रह्मणा विपश्चिता, यः सर्वज्ञः सर्ववि**दित्यादिना सर्वज्ञताबोधनात् । ननु युक्तिभिरनुचिन्तनं मननं, युक्तयश्चानुमानरूपा इति मननोपयोगित्वाच्च

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

मिति भावः । ननु **मन्तव्य** इत्यादिश्रुतौ मननस्याऽपि ब्रह्माऽवगतिसाधकत्वोक्तेः कथमनुमानाऽप्रामाण्यमित्यत आहुः—'**मनने**'ति । न हि ते स्वातन्त्र्येण तद्गन्तृणी किन्तु श्रवणस्यैव फलोपकार्यङ्गभूते इति नोक्तदोषाऽवसरः ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

त्प्रतिपाद्यत्वं, **यतो वाचो निवर्तन्त** इत्यनेन मनोवागगम्यत्वमुक्तमत उभयोरवैयर्थ्याय प्रमाणान्तराऽगम्यत्वमुपनिषद्गम्यत्वं साधनीयम् । तथा चौपनिषदमित्यस्योपनिषदेकप्रतिपाद्यत्वमिति सिध्यति स्म । एवं सत्यनुमानस्य प्रामाण्यं वदन्तोऽनायासेन प्रत्युक्ताः । ननु केवलानुमानस्याप्रामाण्येऽपि श्रुत्यनुसारिणोऽनुमानस्य कुतो न प्रामाण्यमित्याकाङ्क्षायामाहुः—'**अनधिगतार्थगन्तृत्वा**-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

केवलोपनिषद्वेद्यत्वमुक्तमित्यर्थः । '**अनधिगते**'त्यादि । तथा चानधिगतार्थगन्तृत्वरूपं प्रामाण्यं वेद एवास्ति नतु अनुमाने इत्यर्थः । ननु ब्रह्मण उपनिषदतिरिक्तावेद्यत्वे मननिदिध्यासनयोर्ब्रह्मावग-

---

१ इवेति कदाचित्स्यात् । २ 'आत्मावारे' इति श्रुत्या मननं विधीयते । तच्च 'धातुःप्रसादा'दिति श्रुत्युक्तभगवत्प्रसादसहकृतेन[2] मननेन दर्शनमुच्यते तेनाऽनुमानं ब्रह्मणि न प्रमाणमिति भावः ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

स्वातन्त्र्येण तद्धन्तृत्वमस्ति किन्तु श्रवणस्यैव फलोपकार्यङ्ग इति न किञ्चिद्दूषणमित्यर्थः । एवं मनननिदिध्यासनयोः श्रवणाङ्गत्वेन, स्वातन्त्र्येण फलसाधकत्वं निराकृत्य शास्त्रस्याऽपि सूत्रकारकृतस्य तथैव तन्निराकरणायाह—**'सन्देहवारकत्वादि'**ति ।

इति द्वितीयं जन्माद्यधिकरणं सम्पूर्णम् ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

कथमनुमानस्य निरास इत्यत आह—**'मनने'**ति । **'श्रवणाङ्गत्वमि'**ति । श्रवणेन कृत्वात्मदर्शने जननीये मननादीनां सहकारित्वमित्यर्थः । एवंच मननोपयोगित्वेनाऽनुमानस्यावश्यकत्वमिति भावः । नन्वेवं चेदनुमानेनैव मननसिद्धौ वेदान्तमीमांसाशास्त्रं व्यर्थमित्यत आह—**'सन्देहे'**ति । श्रवणानन्तरं सन्देहे सति मननं न सम्भवति । शास्त्रस्य सन्देहवारकत्वादित्यर्थः । **'तदङ्गत्वमि'**ति । मननाङ्गत्वमित्यर्थः । शास्त्रस्यापीत्यपिकारेणाऽनुमानस्य सङ्ग्रहः । एवं च मनने सहकारिकारणत्वमेवाऽनुमानस्य बोद्धव्यमिति सर्वमनवद्यम् । इति द्वितीयाधिकरणम् ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ननु शास्तीति शास्त्रमिति व्युत्पत्त्या तद्धन्तृत्वात्कथं केवलोपनिषद्वेद्यतेत्यत आहुः—**'शास्त्रस्ये'**ति । तन्मननश्रवणमेव वा ।

इति द्वितीयं जन्माद्यधिकरणम् ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

त्प्रमाणस्ये'ति । श्रुत्यनुसारिणोऽनुमानस्य श्रुत्यधिगतार्थगन्तृत्वादप्रामाण्यमित्यर्थः । ननु केवलोपनिषद्वेद्यं ब्रह्म **मन्तव्यो निदिध्यासितव्य** इति श्रुतौ ब्रह्मप्रमितौ मननस्य विहितत्वात् । मननं हि युक्तिभिरनुचिन्तनम् । युक्तयस्तु पूर्वोक्तानुमानरूपाः । अतोऽनुमानमपि ब्रह्मणि प्रमाणं कुतो न भवतीत्याकाङ्क्षायामाहुः—**'मनननिदिध्यासनयोः श्रवणाङ्गत्वमि'**ति । ब्रह्मप्रमितौ ह्युपनिषच्छ्रवणमेव साधनत्वेनोक्तम् । मनननिदिध्यासनयोस्तु श्रवणाङ्गत्वेनोपकारकत्वमतो ब्रह्म तूपनिषदेकवेद्यमित्यर्थः । ननूपनिषदेकवेद्यत्वे मीमांसायाः किंप्रयोजनमित्याकाङ्क्षायामाहुः—**'सन्देहवारकत्वादि'**त्यादि ।

इति द्वितीयं जन्माद्यधिकरणम् ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

तिसाधनत्वोक्तिर्व्यर्था स्यादत आहुः—**मननेत्यादि** । **श्रवणाङ्गत्वं** श्रवणेन ब्रह्मप्रमितौ जननीयायां सहकारिकारणत्वमित्यर्थः । **शास्त्रस्य** व्याससूत्ररूपशास्त्रस्य । **तदङ्गत्वं** श्रवणाङ्गत्वम् ॥ २ ॥

॥ इति प्रथमाध्याये प्रथमपादे द्वितीयं जन्माद्यधिकरणम् ॥

अयमर्थः—ये केचन मननं व्याजीकृत्यानुमानमपि ब्रह्मणि ब्रह्मधर्मे वा सर्वज्ञत्वे प्रमाणत्वेनाभ्युपगच्छन्ति ते रूपान्तरेण वेदस्यैवाप्रामाण्यं स्वीकुर्वन्ति । कथमितिचेत्—तथावादी प्रष्टव्यः श्रुत्या ब्रह्म निःसंदेहं ज्ञातं न वा । ज्ञातं चेदधिगतार्थज्ञापकत्वादप्रमाणमेव निष्प्रयोजनं च त्वदभिमतमनुमानं तस्मिन् । अथ न ज्ञातं निःसंदिग्धं वा ज्ञातं चेदज्ञापकत्वादसंदिग्धाज्ञापकत्वाद्वा श्रुतेरप्रामाण्यम् । ननु श्रुतिमात्रशरणानां मननविधेरेवं प्रामाण्यापहतिर्भवति इति चेत् । न । मननं हि जीवस्य मनोदोषमपाकृत्य श्रवणस्योपकरोति न ब्रह्मणो ब्रह्मज्ञानस्य वा । तस्मात् श्रवणकर्तुरन्तःकरणदोषापाकरणेन श्रवणस्यैवाङ्गत्वं मननस्य । न तु ब्रह्मणि प्रमाणम् । ब्रह्म तु वेदेनैव निःसन्दिग्धं ज्ञातम् । केवलन्त्वनुमाने स्वमनोमालिन्यमपनीयते मननेन मन्दमध्यमाधिकारिणोः । संशोद्धा ।

तृतीयं समन्वयाऽधिकरणम्।

तत्रैतत् स्यात्। तत्र किं समवायि, निमित्तं, कर्तृ, वा? किमतो यद्येवम्?। एवमेतत् स्यात्। यद्येकमेव स्यात्तदा क्रियाज्ञानशक्त्योर्निरतिशयत्वं भज्येत। मृदादिसाधारण्यं

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

एवं जन्मादिसूत्रं व्याख्यायैकदेशिमतद्वयं निराकृत्य सूत्रान्तरमवतारयितुमाह—'**तत्रे**'ति। शास्त्रस्य ब्रह्मकारणत्वनिश्चायकत्वे सति। **एतदग्रे**। उच्यमानं संशयरूपमेव ज्ञानं स्यात्। तथा च कुतो निश्चय इति भावः। कथमित्याकांक्षायां तत्स्वरूपमाहुः—'**तत्र किं समवायि निमित्तं कर्तृ वे**'ति। तत्र शास्त्रे। उक्तमिति शेषस्त्रिष्वपि सम्बध्यते। ननु त्रिरूपत्वे किं बाधकमित्याहुः—

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

पूर्वाधिकरणे कार्यलक्षणेन ब्रह्मणि सामान्यतो जगत्कारणत्वं प्रतिपादितमिदानीं विशेषरूपेण समवायि कारणत्वप्रतिपादकं समन्वयाधिकरणमवतारयन्ति—'**तत्रैत**'त्स्यादित्यादिना। **तत्र** शास्त्रे। **एतत्** वक्ष्यमाणम्। **स्यात्** विचार्यं स्यात्। वक्ष्यमाणमेवाऽऽहुः—'**तत्र किमि**'ति। **तत्र** यतो वेति श्रुतौ। '**कर्तृ वे**'ति। कुलालवत्कारणं वेत्यर्थः। तथा च श्रुतौ ब्रह्म जगतः समवायिकारणं निमित्तकारणं कर्तृकारणं वा प्रतिपादितमिति विचार्यं स्यादिति पूर्वेणान्वयः। तदिति प्रथमान्तपाठे तद्ब्रह्म समवायिकारणं वेति विचार्यं स्यादित्यर्थः। अस्मिन्पाठे ब्रह्मेति प्रतिपादितमिति पदद्वय—

केनचिद्विरचिता वेदान्तचन्द्रिका।

एवं सप्रमाणं ब्रह्मणो लक्षणं निर्णीयोक्ताकारविधां निर्वक्तुमग्रिमाधिकरणमवतारयन्ति—'**तत्रैतदि**'ति। तत्र कारणत्वाङ्गीकृतौ एतद्विनिगमनाविरहाद्वक्ष्यमाणसंशयफलपर्यवसानात्मकं दूषणं स्यादित्यर्थः। तमेव संशयं प्रदर्शयन्ति—'**तत्रे**'ति। अत्र ब्रह्मेतिशेषः। अत्रोट्टङ्कन्ते—'**किमि**'ति। **यद्येवंविधः संशयस्तर्ह्येत** ईदृशसंशयात्किमनिष्टमित्यर्थः। नह्यासु विधासु कयाप्येकविधया कारणत्वं ह्रियते, अत एका काऽपि ग्राह्येति भावः। अत्रोत्तरमाहुः—**एवमिति**। वक्ष्यमाणप्रकारेण वक्ष्यमाणमनिष्टं स्यादित्यर्थः। तदेवोद्धाटयन्ति—'**यद्येकमि**'ति। समवायि निमित्तं वा कर्तृत्वं वा।

श्रीलालूभट्टकृता गूढार्थदीपिका।

'**यद्येकमेव स्यादि**'ति। समवाय्येव, निमित्तमेव, कर्त्रेव, वा स्यादित्यर्थः। '**क्रियाज्ञानशक्त्योरि**'त्यादि। यद्येकमेव स्यात्तदा तु मृदादावप्येकस्य समवायिकारणत्वादेः साधिका

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

पूर्वोक्तरीत्या जन्माद्यधिकरणं निर्णीय सूत्रान्तरमवतारयन्ति—**तत्रे**त्यादि। **तत्र** जगत्प्रति ब्रह्मणः कारणत्वे। **एतत् स्यात्** वक्ष्यमाणसंशयविषयत्वं स्यादित्यर्थः। **तत्र** संशयविषयकोटीनां मध्ये संशयकोटिगणनामाहुः—'**समवायी**'त्यादि। उक्तसंशये किं दूषणमित्याहुः—'**किमत**' इति। यद्येवं संशयोऽतः को दोष इत्यर्थः। '**एवमि**'त्यादि। वक्ष्यमाणप्रकारो दोषः स्यादित्यर्थः। दूषणमेवाहुः—'**यद्येकमि**त्यादिना। **एकं** कुलालवत्कर्तृ दण्डवन्निमित्तं मृत्पिण्डवत्समवायि एतेषां अन्य-

---

१ समन्वयो नाम ब्रह्मणः सर्वत्र जगति अस्तिभातिप्रियरूपेण सम्यगनुवृत्तत्वम्। ननु वेदान्तानां ब्रह्मण्यन्वय इति। तस्य द्वितीयाधिकरणेनैव सिद्धत्वात्।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

'किमत'इति । **यद्येवमे**कस्यैव त्रिरूपत्वम् । अतः किं किं दूषणमित्यर्थः । तत्रोत्तरमाहुः—**'एवमेतत्स्यादि'**ति । **एवमु**च्यमाने **एतद्बा**धकं स्यादित्यर्थः । किं बाधकमित्याकांक्षायां गूढाभिसन्धिमुद्धाटयति—**'यद्येकमेवे'**ति । यदि समवायि निमित्तं कर्तृ वैकमेव ब्रह्म स्यात्तदा ब्रह्मणः क्रियाज्ञानशक्त्योर्निरतिशयत्वं व्यापकत्वं भज्येतेत्यर्थः ।

अयमर्थः—ब्रह्मणः सैन्धवघनवदेकरसत्वेन क्रियाज्ञानशक्त्योः सर्वत्रैव व्याप्तत्वेन समवायित्वांशे तदनङ्गीकारेऽस्मदादिवत्प्रादेशिकत्वाऽऽपत्त्या निरतिशयत्वं सर्वस्मिन्नपि व्याप्तत्वं भज्येतेत्यर्थः । दूषणान्तरमप्याहुः—**'मृदादी'**ति । मृदादिसाधारण्यं, कृतकत्वेन सावयवत्वेन चाऽनित्यत्वं भवेदित्य-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

स्याऽध्याहारो नास्तीति लाघवम् । अत एव प्रकाशे श्रीपुरुषोत्तमैः प्रथमान्तपाठ एवाऽऽदृतः । शङ्कते—**'किमतो यद्येवमि'**ति । यद्येवं संशयः स्यात्तर्हि । **अतः** अस्मात् संशयात् किं भविष्यति न किमपीत्यर्थः । तथा च श्रुत्या ब्रह्मणि सामान्यतो जगत्कारणताज्ञाने जाते लक्षणं प्रमाणं च ज्ञातमेवातःपरं संशयेन किं कर्तव्यं विचारेण तन्निरासे च किं फलं भविष्यति न किमपीति भावः । उत्तरयन्ति—**'एवमेतत्स्यादि'**ति । **एवम**नेन प्रकारेण वक्ष्यमाणविचारेणेत्यर्थः । **एतत्** दोषनिवृत्तिरूपं फलं स्यादित्यर्थः । विचारमेवोपपादयन्ति—**'यद्येकमि'**ति । सर्वेषु समवायिनिमित्तादिषु कारणेषु मध्ये एकं वक्तव्यम् । तत्र दण्डादिवन्निमित्तं वा प्रयोज्यवत्कर्तृ वा समवायि वेति त्रयाणां मध्ये एकं स्यादित्यर्थः । **तदा** निमित्तत्वकर्तृत्वयोः स्वीक्रियमाणे—**'क्रियाज्ञानशक्त्योरि'**ति ब्रह्मणि निमित्तत्वे स्वीक्रियमाणे क्रियाशक्तेः, प्रयोज्यकर्तृत्वस्वीकारे ज्ञानशक्तेश्चेतरनैरपेक्ष्यरूपं निरतिशयत्वं भज्येतेत्यर्थः । तथा च यथा निमित्तकारणीभूतदण्डे स्वतन्त्रा क्रिया नास्ति, यथा वा प्रयोज्यकर्तरि कुलाले प्रयोजककुलालपितृनिष्ठं कर्तृत्वज्ञानमादायैव कर्तृत्वज्ञानं तथेतरसापेक्षज्ञानं ब्रह्म-

केश्चिद्विरचिता वेदान्तचन्द्रिका ।

अत्रायं भावः—यदि मृत्सुवर्णादिवत्समवायित्वं यदि वा दण्डचक्रादिवन्निमित्तत्वं, यदि वा कुलालादिवत्कर्तृत्वं, तदा तयोर्निरतिशयत्वं सर्वत्र सदैकरसत्वेन यत्सर्वव्याप्तत्वं, तद्धीयेत । समवायित्वाद्यंशे ज्ञानाऽसम्भवात् । क्रियाया अपि परायत्तत्वात्कर्तृत्वांशेऽपि ज्ञानकर्मेन्द्रियैरेव तत्प्राकट्यात् । तयोः प्रादेशिकत्वं स्यात् । दूषणान्तरमाहुः—**'मृदादी'**ति । **साधारण्यं** सावयवत्वं विकृतत्व-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

शक्तिरस्त्येवेति तत्साधारण्यं ब्रह्मणोऽपि स्यादिति निरतिशयत्वं ब्रह्मनिष्ठक्रियाज्ञानशक्त्योरपगच्छेदित्यर्थः । तथा च **परास्य शक्तिर्विविधैव श्रूयत** इति श्रुत्युक्तं ब्रह्मशक्तिषु परत्वं विवि-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

तरदेव स्यादित्यर्थः । तथा सति दूषणमाहुः—**'क्रियाज्ञाने'**त्यादि । तथा चोक्तत्रिविधकारणानां मध्ये यद्येकं कारणं ब्रह्म भवेत्तदा तेषामितरकारणसमवधानं विना कार्यजनकत्वं न स्याद्ब्रह्मणोपि । इत्थं च क्रियाज्ञानशक्तिमत्त्वेन यन्निरतिशयत्वमितरनैरपेक्ष्येण कार्यजननसामर्थ्यं तद्भज्येतेत्यर्थः । ब्रह्मणः समवायिकारणत्वे दूषणान्तरमाहुः—**'मृदादी'**त्यादि । **साधारण्यं** ब्रह्मणो मृत्तुल्यतयाऽनि-

च स्यात् । मतान्तरवत् । कथमेवं सन्देहः यावता 'यतो वा इमानी' त्यादिभ्यो निःस-न्देहश्रवणात् ? । एवं हि सः, पञ्चमी श्रूयते यत इति । पञ्चम्यास्तसिरिति । 'आत्मन'

गोस्वामिश्रीमन्मुरलीधरविरचिता अणुभाष्यव्याख्या ।

र्थः । ननु समवायित्वेऽभ्युपगम्यमानेऽनित्यत्वप्रसक्तौ किं विनिगमकमित्यतो दृष्टान्तेन तत्साधयन्ति— **'मतान्तरवदि'**ति । यथा सांख्यमते प्रधानस्यैव समवायित्वं न पुरुषस्य । यत्परिणामि तद्विकृतत्वात्सावयवत्वाच्चाऽनित्यमिति मृदादौ दृष्टम् । तन्न्यायेन ब्रह्मणोऽप्यनित्यत्वप्रसङ्गो दुर्निवारः स्यादित्यर्थः । अधुना सूत्रान्तरमवतारयितुं तत्स्वप्रवृत्तिजनकं सन्देहमेव दृढीकर्तुमुपक्षिपन्ति— **'कथमेवमि'**ति । एवमेवंप्रकारकः सन्देहः । **कथं** कथमुपपद्यत इत्यर्थः । तत्र हेतुमाहुः— **'यावते'**ति । यतो वेत्यादावुत्पत्त्यादित्रयाऽधिष्ठानत्वनिरूपणेन निःसन्दिग्धमेव समवायित्वस्य श्रवणादित्यर्थः । संशयबीजोद्घाटनेन तं समर्थयन्ति— **'एवं हि स'** इत्यारभ्य **'सुतरां सन्देह'** इत्यन्तेन । **सः** संशयः । **'एवं'** वक्ष्यमाणप्रकारेण । तमेवाऽऽहुः— **'पञ्चमीति'** । ननु पञ्चम्यां सामान्यतः कारणमात्रबोधनात्समवायित्वं को निवारयेदित्यत आहुः— **'पञ्चम्यास्तसिरि'**ति । तसेरपादानाऽर्थकपञ्चमीविषय एव

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ण्यपि स्यादिति भावः । ननु समवायिकारणत्वमेवास्तु इत्यत आहुः— **'मृदादिवदि'**ति । **'मतान्तरवदि'**ति । यथा साङ्ख्यमते मृद्विकारत्वं घटे, मृत्तिकायां विकारित्वम् । तथा ब्रह्मण्यपि विकारित्वं स्यादित्यर्थः । एवं चैतद्दोषनिवारणार्थं विचारः कर्तव्य इति भावः । एवंरीत्या विचारे प्रसक्तेऽधिकरणाङ्गसंशयमाहुः— **'कथमि'**त्यादिना । **'एवमि'**ति । समवायि निमित्तकारणं कर्तृ वेत्येवंरूपः सन्देहः कथमित्यर्थः । ननु कुतो न भवतीत्यत आह— **'यावते'**ति । यावत्पर्यन्तमित्यर्थः । वाक्यश्रवणानन्तरमपि सन्देहतादवस्थ्यं प्रतिपादयन्ति— **'एवं ही'**ति । **स** सन्देहः । भवतीत्यध्याहारः ।

केश्चिद्विरचिता वेदान्तचन्द्रिका ।

मनित्यत्वमनाप्तकामत्वं परस्परसापेक्षत्वं कार्योत्पादने नैयायिकादिमतवद्भवेत् । अत्र नोदकमाहुः— **'कथमि'**ति । **एवं** पूर्वोक्तविधया । **'निःसन्देहे'**ति । **यतो** वेत्यादिसम्पूर्णवाक्यार्थपर्यालोचनया समवायित्वस्य निःसन्देहश्रवणात् । उत्तरमाहुः— **'एवं ही'**ति । **सः** संशयः ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

यत्वं च न संगच्छेत । दूषणान्तरमाहुः— **'मृदादि साधारण्यं च स्यान्मतान्तरवदि'**ति । यथा मृत्तिकाघटस्य समवायिकारणमेव । दण्डो निमित्तमेव । कुलालः कर्तैव । तथा ब्रह्माप्येकमेव स्यात्तदा मृदादितुल्यता स्यात् । तत्र दृष्टान्तः— **'मतान्तरवदि'**ति । मतान्तरे ब्रह्मणः कर्तृ-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

त्यत्वं सावयवत्वं च स्यादित्यर्थः । तत्रोपष्टम्भकमाहुः— **'मतान्तरव'**दिति । यथा च सांख्यैः पुरुषस्य परिणामित्वमेतद्दोषादेव न स्वीक्रियते प्रकृतेश्च सावयवत्वात्स्वीक्रियते । नैयायिकमतमादाय तु कपालतुल्यतया द्रव्यसमवायिकारणतायां ब्रह्मणोऽनित्यत्वमपि स्यादित्यर्थः । अग्रिमाधिकरणघटकं संशयं दृढीकुर्वन्ति— **'कथमि'**त्यादिना । **एवं** ब्रह्म कारणं न वेत्याकारकः । **यावता** निश्चयेन । **'निःसन्देहे'**त्यादि— कारणतासन्देहनिर्गमनं येन स्यात्तादृशकारणतायाः श्रुतिवाक्येभ्यो निश्चयादित्यर्थः । **एवं**

इत्यपि पञ्चमी । निमित्तत्वे न सन्देहः । पञ्चम्या निमित्तत्वकथनात् । उपादानत्वे कर्तृत्वे च सन्देहः। तद्वाचकाश्रवणात् । कल्पनायां प्रमाणाभावात् । समवायित्वे पुनः सुतरां सन्देहः । एवं प्राप्त आह—

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

विहितत्वेन विश्लेषविशिष्टस्यैव तस्य प्रतीतेर्न समवायित्वं किन्तु निमित्तत्वमेवेत्यर्थः । नन्वत्र तसिश्रवणेऽपि **'आत्मन आकाशः सम्भूत'**इत्यत्र साधारण्येनैव पञ्चमीश्रवणात्कारणत्वमात्रमेव प्रतीयतामित्यत आहुः—**'आत्मन इत्यपी'**ति। अपादानार्थ इत्यर्थः। सम्भवत्येकवाक्यत्वे वाक्यभेदस्याऽनुचितत्वेनैकवाक्यत्वार्थं तत्राऽपि तथा कल्पनीयमित्यर्थः। तदेतत्सर्वमभिसन्धायोक्तं—**'निमित्तत्वे न सन्देहः। पञ्चम्यां निमित्तत्वकथनादि'**ति। ननु तर्हि कुत्र सन्देह इत्यत आहुः—

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

कथं भवतीत्यत आह—**'पञ्चमी'**ति । यतो वेति वाक्ये पञ्चम्युक्ता । **तस्माद्वा एतस्मादि**ति वाक्ये साक्षाद्ब्रह्मवाचकादात्मपदादपि पञ्चमी । **'आत्मन'** इति । **निमित्तत्वे** पञ्चम्या निमित्तत्वरूपार्थवाचकत्वे **'न सन्देह'** इति । सन्देह एव नास्तीत्यर्थः । **'कथनादि'**ति । घण्टाघोषा-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ननु पञ्चम्या सामान्यतः कारणतामात्रबोधनाद्भवति सम्भावना समवायित्वस्यापीत्यत आहुः—**'पञ्चम्या'** इति । तसेरपादानार्थकपञ्चमीविषय एव विधानाद्विश्लेषविशिष्टस्यैव कारणत्वस्य प्रतीतेर्न समवायित्वमपि तु निमित्तत्वमेवेति भावः। नन्वत्र तसिश्रवणेऽप्यात्मन **आकाशः सम्भूत** इत्यत्र साधारण्येनैव पञ्चम्यभिधानादस्तु कारणत्वमात्र [विमानेस्तुं तथात्व] मित्यत आहुः—**'आत्मन इती'**ति। हेतावित्यर्थः। **'निमित्तत्व'** इति । गूढाभिसन्धिमुद्घाटयन्ति—'उपा-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

त्वमात्रमवगच्छन्ति नैयायिकादयस्तद्वत्स्यात् । साङ्ख्यमते प्रकृतेः समवायित्वमेव तद्वत्स्यादित्यर्थः । प्रकृते ब्रह्ममीमांसाशास्त्रे तु समवायिकारणत्वं, निमित्तकारणत्वं, कर्तृत्वं च, ब्रह्मण्येवेति बोद्धव्यम् । **'कल्पनायामि'**ति । अद्वैतश्रुत्यनुरोधेनोपादानत्वकल्पनायाम् । **यतो वा इमानी**त्यादौ निमित्तत्वव्याप्योपादानत्वकल्पनायामित्यर्थः । तथा च पञ्चम्या निमित्तत्वकथनेऽप्यद्वैतश्रुत्येकवाक्यताकरणे **यतो वा इमानी**त्यादावुपादानरूपात् यतो निमित्ताद्भूतानि जायन्त इत्यर्थो लभ्यत इत्यर्थः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

वक्ष्यमाणप्रकारेण। **सः सन्देहः**। **तसिरितीति**। तथाचाश्वतः पतितः स्वर्गतः पतितः दण्डाद्धत इत्यादौ पञ्चम्या अपादानत्वशुद्धनिमित्तकारणत्वयोरेव बोधनादितिभावः । ननु 'यतो वे'तिश्रुतौ तसेः सत्त्वेपि 'तस्माद्वा एतस्मादि'त्यत्र तस्याश्रवणात् कारणत्वान्तरमेव पञ्चम्या बोध्यतामित्याक्षेप एकवाक्यतया तत्रापि निमित्तकारणताबोधकतां व्यवस्थापयन्ति—**'आत्मन'** इत्यादिना। **निमित्तत्वेने**ति। निमित्तत्वेन रूपेण निमित्तकारणं बोधयतीत्यर्थः । **निमित्तत्वकथनात्** ब्रह्मणो निमित्तकारणत्वबोधनादि-

१ इत्यादिः भूयानशुद्धोऽलग्नः पाठ आसीत्परमपरपुस्तकाभावादस्माभिः परित्यक्तः ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

'उपादानत्वे कर्तृत्वे चे'ति । तत्र हेतुमाहुः—**'तद्वाचके'**ति । नहि यतो वेत्यादावुपादानत्वस्य कर्तृत्वस्य वा वाचकं किञ्चिदस्ति । पञ्चम्या सामान्यतः कारणमात्रस्य प्रतिपादनात् । ननु **निर्विशेषं न सामान्यमि**ति नियमात्सामान्ये विशेषस्याऽपि सत्वात्सामान्यवाचकस्याऽपि विशेषवाचकत्वे न कश्चिद्विरोध इत्याशङ्क्याहुः—**कल्पनायामि**ति । सामान्यपरस्य विशेषपरत्वकल्पनायामित्यर्थः । **'प्रमाणाऽभावादि'**ति । विनिगमकाऽभावादित्यर्थः । ननु**'यतो वे'**त्यादावुत्पत्त्यादित्रयकारणत्वोक्तेः कर्तृत्वमेव तस्येति विनिगमनाऽस्तीत्यत आहुः—**'समवायित्व'**इति । कदाचित्तत्र यथाकथञ्चिद्विनिगमनायामपि समवायित्वे तदभावात्पूर्वोक्तदूषणप्रसक्तेश्च सुतरामेव सन्देह इत्यर्थः । ननु तर्हि व्यतिरेकनिश्चय एव स्यान्न संशय इति चेत् । न । **निर्विशेषं न सामान्यमि**तिव्याप्तेः सामान्ये विशेषमात्रस्य सम्भाव्यमानत्वेन सन्देहसम्भवात् । तथा चैवमेवंप्रकारेण सन्देहे प्राप्ते शास्त्रस्य सन्देहवारकत्वात्तन्निराकरणाऽर्थं सूत्रकार आह—

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

दित्यर्थः । एवं पञ्चम्या निमित्तत्वे सन्देहो नास्ति, परन्तु ब्रह्मणि निमित्तकारणत्वस्वीकारे क्रियाशक्तिनिरतिशयित्वभङ्गरूपदूषणस्य प्रागुक्तत्वात्कारणतासन्देहतादवस्थ्यमिति भावः । ननु मास्तु निमित्तत्वमन्यकारणत्वमस्त्वित्यत आहुः—**'उपादानत्व'**इति । **'अश्रवणादि'**ति । विभक्तिपदयोर्मध्य एकस्याप्यश्रवणादित्यर्थः । ननु कल्प्यत इत्यत आहुः—**'प्रमाणे'**ति । **'सुतरामि'**ति । साङ्ख्यमतरीत्या विकारित्वदूषणग्रस्तत्वात्कारणतासन्देहत्वपर्यवसानमित्यर्थः । **'एवं प्राप्त'** इति । श्रुतौ तु कारणतोक्ता । परन्तु एतासां कारणतानां मध्य एकापि कारणता वक्तुं न शक्यत इति । ब्रह्म कारणं भवति न वेत्येवं संशये प्राप्त इत्यर्थः । **'आहे'**ति सिद्धान्तमाहेत्यर्थः । सूत्रमाहुः—

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

दानत्व' इति । तत्र हेतुः—**'तद्वाचके'**ति । **'कल्पनायामि'**ति । उपादानत्वकल्पनायाम् । ननु तदभावनिश्चय एव कुतो न स्यात्कथं संशय इति चेन्न—**निर्विशेषं न सामान्यमि**ति । व्याप्तेर्विशेषस्यापि सम्भवात्स इति निगर्वः । तथा चैवं समवायित्व एव संशयपर्यवसाने तमपाकर्तुं सूत्रकार आह—

श्रीलालूभट्टकृता गूढार्थदीपिका ।

'प्रमाणाऽभावादि'ति । अन्यथानुपपत्तिरूपप्रमाणाऽभावात् । अद्वैतश्रुतेः प्रपञ्चमिथ्यात्वेन यतो वेत्यादौ निमित्तत्वस्य दण्डादिनिष्ठनिमित्तस्वीकारेणाऽप्युपपत्तेरिति भावः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

त्यर्थः । **तद्वाचकेत्यादि** । कर्तृत्वसमवायिकारणत्वयोर्वाचकपदाश्रवणादित्यर्थः । ननु तन्तुभ्यः पट इतिप्रयोगस्यापि बाधकाभावेन सम्भवाद्ब्रह्मणः 'तस्माद्वा' इतिपञ्चमीतः समवायिकारणत्वमपि कल्प्यमित्यत आहुः—**'कल्पनाया'**मित्यादि । **सुतरां संदेहः** । सावयवत्वानित्यत्वयोरापत्त्या सुतरां सन्देह इत्यर्थः । **एवं प्राप्ते** ब्रह्मणि कर्तृत्वसमवायिकारणत्वयोरभाव इति पूर्वपक्षे प्राप्ते इत्यर्थः । **आह** समाधानरूपं सूत्रमाहेत्यर्थः ।

१—निमित्तत्वेति युज्यते ।

तत्तु समन्वयात् ॥ ३ ॥

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । निमित्तत्वस्य श्रुतिसिद्धत्वान्मतान्तरनिराकरणत्वेनाग्रे वक्ष्यते । तत् ब्रह्मैव समवायिकारणम् । कुतः? । समन्वयात् । सम्यगनुवृत्तत्वात् । अस्ति-

---

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

तत्तु समन्वयात् । ननु तत्र सामान्यरूपेणैव कारणत्वस्य प्रतीयमानत्वान्निमित्तत्वमपि विचारणीयमेवेति कथमुपादानत्वमेव विचार्यत इत्यत आहुः—'**निमित्तत्वस्ये**'ति । अपादानपञ्चम्या विश्लेषस्योपस्थितत्वान्निमित्तत्वं तु व्यक्तमेव श्रुतिसिद्धमिति नाऽत्र विचार्यते । अत एवात्र द्वितीयाऽध्याये ब्रह्मणो निमित्तत्वमभ्युपेत्य काणादादिमतानां जीवाऽदृष्टाऽऽदिनिमित्तत्वप्रतिपादकानां निराकरणं करिष्यति सूत्रकारः । सूत्राऽवयवान्व्याचक्षते—'**तदि**'ति । समवायिकारणमिति शेषः । हेतुं पृच्छति—'**कुत**' इति । तदेवोपपादयन्ति—'**समन्वयादि**'ति । नामरूपाऽऽत्मके सर्वस्मिन्कार्यजातेऽस्तित्वादीनि प्रतीयन्ते ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

तत्तु समन्वयादिति । नन्वस्मिन्नधिकरणे पूर्वपक्षो न दृश्यत इत्यत आहुः—'**तुशब्द**' इति । '**पूर्वपक्षव्यावृत्त्यर्थ**'इति । पूर्वपक्षस्याऽवसर एव नास्तीति तन्निवृत्त्यर्थं तुशब्द इत्यर्थः । तेन कारणताविचारो विषयः । तत्संशयः । पूर्वपक्षस्तु न । अस्त्येवेति सिद्धान्तः । उपोद्घातः सङ्गतिरिति चतुष्टयाङ्गमिदमधिकरणं सूचितम् । ननु ब्रह्मैव निमित्तकारणमिति पूर्वपक्षः कुतो न स्वीक्रियते इत्यत आहुः—'**निमित्तत्वे**'ति । '**श्रुतिसिद्धत्वादि**'ति । तथा च तन्न निराकर्तुं शक्यत इति भावः । नन्वेवं चेत्तर्हि तस्य स्वीकारः किमर्थमित्यत आह—'**मतान्तरे**'ति । तटस्थनिमित्तकारणता यैः स्वीक्रियते तन्मतनिराकरणत्वेनेत्यर्थः । **वक्ष्यते** द्वितीयाध्याय इति शेषः । सूत्रार्थमाहुः—'**तदि**'ति । ब्रह्मणोऽधिकारलभ्यत्वात्सूत्रस्थतत्पदस्य कारणपरत्वमाहुः—'**ब्रह्मैव सम-**

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

'**तत्तु समन्वयादि**'ति । '**पूर्वपक्षे**'ति । संशयानपायादकारणत्वपक्षम् । ननु निमित्तत्वस्यापि सिद्धत्वात्कथं केवलं समवायित्वमेवोच्यत इत्यत आहुः—'**निमित्तत्वस्ये**'ति । अग्रे

श्रीलालूभट्टकृता गूढार्थदीपिका ।

तत्तु समन्वयात् । तद्ब्रह्मैव समवायिकारणम् । तत्र हेतुः समन्वयात् । '**सम्यगनुवृत्तत्वादि**'ति । अस्तिभातिप्रियत्वेन सर्वं प्रतीयते । तत्राऽस्तीति सदंशः । भातीति चिदंशः । प्रिय

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

तत्तु समन्वयात् ॥ ३ ॥ **पूर्वपक्षव्यावृत्त्यर्थः** अकर्तृत्वासमवायिकारणत्वरूपपक्षव्यावृत्त्यर्थः । ननु तुशब्दो विशेषावधारणपूजाव्यावृत्तिपादपूरणाप्यर्थहेतुषु दृष्ट इति कथं व्यावृत्त्यर्थ एवात्र गृह्यत इत्यत आहुः—'**मतान्तरे**'त्यादि । **मतान्तरं** व्यावृत्त्यतिरिक्तार्थोपादानरूपं मतान्तरम् । **निराकरणत्वेन** निराकरणं यथा स्यात्तेन प्रकारेण **अग्रे** 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' इत्यत्र 'तु' शब्दस्येतरार्थत्वनिरासो वक्ष्यत इत्यर्थः । **ब्रह्मैव** 'सत्यं ज्ञानमनन्तं ब्रह्मे'तिश्रुतिप्रतिपादितं ब्रह्मैव । **समवायिकारणं** नामरूपात्मकप्रपञ्चस्य समवायिकारणम् । **सम्यगि**त्यादि कार्यमात्रे सम्यक्सम्बद्धत्वादित्यर्थः । एतदेवोपपादयन्ति—'**अस्ती**'त्यादीना । ननु ब्रह्मधर्मास्तित्वादीनां कार्ये-

भातिप्रियत्वेन सच्चिदानन्दरूपेणाऽन्वयात्। नामरूपयोः कार्यरूपत्वात्। प्रकृतेरपि स्वमते

गोस्वामिश्रीमुरलीविरचिता अणुभाष्यव्याख्या।

तानि च तत्कारणनिष्ठाऽस्तित्वादिनारब्धा(?)इति मन्तव्यम्। उपादानगुणानां कार्यगुणाऽऽरम्भकत्वस्य सर्वसम्मतत्वात्। तच्च **'सत्यं ज्ञानमनन्तं ब्रह्मे'**त्यादिभिर्ब्रह्मैव भवतीति तदेवोपादानमित्यर्थः। नन्वस्तित्वादिवत्त्रैगुण्यस्याऽपि कार्ये प्रतीयमानत्वात्त्रिगुणं प्रधानमेव कथं नोपादानकारणमित्यत आहुः—**'प्रकृतेरपी'**ति। ब्रह्मणः सर्वकारणकारणरूपत्वेन प्रधानमपि तत्कार्यम्। भगवतः सदंशादाविर्भूतत्वात्। अत एव 'सदंशेन जडा अपी'ति। एवं च यथा घटादौ मृदादिधर्माणां प्रतीयमानत्वेऽपि न ब्रह्मण उपादानत्वे काचित्क्षतिः। तेषामवान्तरकारणत्वेन मूलकारणनिराकरणाऽसम्भवात्। तथा प्रधानस्यापि कारणत्वेऽपि ब्रह्मकारणत्वे न काचिदनुपपत्तिरित्यर्थः। ननु कार्येऽस्तित्वादिवत्परि-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

वाय्यिकारणमि'ति। एवकारेण प्रकृतेर्व्यवच्छेदः। **'सम्यगनुवृत्तत्वादि'**ति। जगति ब्रह्मण। सम्यगनारोपिताऽनागन्तुकरूपेण, पटे तन्तुवदनुस्यूतत्वादित्यर्थः।

ननु पटे तु तन्तोरभिव्याप्तिर्दृश्यते, ब्रह्मणस्तु प्रपञ्चे केन रूपेणाभिव्याप्तिरित्यत आहुः—**'अस्ती'**ति। प्रपञ्चे यदस्तित्वादित्रयं भासते तत्सच्चिदानन्दरूपब्रह्माऽन्वयादेवेत्यर्थः। ननु नामरूपयोरप्यन्वयो दृश्यत इति मायाया अप्यन्वयोऽस्तीत्यत आहुः—**'नामरूपयोरि'**ति। एतयोः कर्मणोरप्युपलक्षकत्वं बोध्यम्। **त्रयं वा इदं नामरूपं कर्मे**ति श्रुतेः। **कार्यरूपत्वात्** जगदुत्पत्त्यनन्तरं प्रतीयमानत्वेन जन्यत्वात्। तथा **त्वाऽनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति**श्रुत्या, लोके च घटो रसनं तमेव रूपं नाम कथम(?)त्र दृश्यत इति भावः ननु सत्वरजस्तमसामनुवृत्तिदर्शनेन प्रकृतेरेव समन्वयः कुतो न स्वीक्रियत इत्यत आहुः—**'प्रकृते-**

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

द्वितीयेध्याये। सूत्रं व्याकुर्वन्ति—**'तदि'**ति। इतरव्यवच्छेदकोऽयमेवकारः। तद्धेतुः—**'समन्वयादि'**ति। हेत्वर्थं विशदयन्ति—**'सम्यगि'**ति। तत्त्वं चाऽनारोपिताऽनागन्तुकरूपेण सर्वत्र विद्यमानत्वम्। तदेव दर्शयन्ति—**'अस्ती'**त्यादि। अस्तित्वादिरूपं यत्सच्चिदानन्दत्वं तेन रूपेण सर्वत्र कार्यजातेऽन्वयात्। नहि ब्रह्मव्यतिरेकेण कस्यचिदप्यस्तित्वं स्वतोस्ति। नन्वेवं नामरूपयोरपि सर्वसमन्वयात्तयोरपि स्यादुपादानत्वमित्याशंक्याहुः—**'नामरूपयोरि'**ति। जीवरूपेण सर्वस्य व्याकरणात्। ननु प्रकृत्यात्मकानां सत्वादिगुणानां सर्वानुवृत्तेस्तदुपादानकमेवेदं स्यादित्यत आहुः—

श्रीलालूभट्टकृता गूढार्थदीपिका।

इत्यानन्दांश इति सर्वं सच्चिदानन्दात्मकमेवेति ज्ञेयम्। नन्विदं ब्रह्मेति प्रत्ययाऽभावात् घटपटादौ घटोऽस्ति पटोऽस्तीति प्रत्ययाद्घटपटादयः पृथगेव सन्त इति न ब्रह्मणः समन्वय इत्याशङ्क्याऽऽहुः—**'नामरूपयोः कार्यरूपत्वादि'**ति। नामरूपात्मकं जगत्कार्यं जन्यम्। स्वकारणजनितसत्तारूपत्वात्। न पृथक् सार्वदिकसत्तावत्। प्रतीयते तु सत्तामात्रम्। न तु जन्यसत्ता। अतः सत्तामात्रं यत्प्रतीयते तत्कारणनिष्ठमेवेति ब्रह्मणः समन्वयो ह्यबाधितः। **'स आत्मानꣳ स्वयमकुरुत स सर्वं**

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

न्वयवत् प्रकृतिगुणसत्त्वादीनामपि कार्येन्वयात्तस्या एव प्रपञ्चोपादानत्वमस्त्वत आहुः—**'प्रकृते'**रिति

तदंशत्वात् । अज्ञानात्परिच्छेदाप्रियत्वे । ज्ञानेन बाधदर्शनात् । नानात्वं त्वैच्छिकमेव ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

च्छेदाऽप्रियत्वयोरपि प्रतीतेस्तादृशधर्मवदेव कारणं कस्मान्न भवतीत्यत आहुः–'**अज्ञानादि**'ति । '**एतदात्म्यमिदं सर्वं**' '**स आत्मानँ स्वयमकुरुते**'त्यादिभिः सर्वस्याऽपि कार्यजातस्य ब्रह्मरूपत्वेनाऽवान्तरकारणेष्वपि तयोरशक्यवचनत्वादज्ञानकार्ये एवेति मन्तव्यम् । न च तयोर्मूलकारणधर्मत्वमेवाङ्गीकर्त्तव्यमिति वाच्यम् । तस्याऽनित्यत्वप्रसङ्गेन तत्कारणापेक्षायामनवस्थापत्तेर्दुःपरिहरत्वात् । अज्ञानकृतत्वे विनिगमकमाहुः–'**ज्ञानेने**'ति । गर्भस्थित एव हि वामदेवः सिद्धज्ञानत्वेन

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

रपी'ति । '**तदंशत्वादि**'ति । **वाङ्मनोगोचरातीतं द्विधा समभवद्बृहत् । तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका । ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयत**' इत्येकादशस्कन्धीयभगवद्वचनैरंशत्वे सिद्धे कार्यत्वे नाऽऽगन्तुकत्वानुवृत्तत्वं नास्तीति भावः ।

ननु प्रपञ्चे कस्यचिद्दुःखं कस्यचित्सुखमिति देशत, एकस्यैव कदाचिद्दुःखं कदाचित्सुखमिति कालतः, परिच्छेदो दुःखं च दृश्यते, परिपूर्णस्य ब्रह्मणः समन्वये सति तदुभयं न स्यादित्यत आहुः—'**अज्ञानादि**'ति । परिच्छेदोऽप्रियत्वं चाऽज्ञानेनानुभूयत इत्यर्थः । ननु कथमिदं ज्ञायत इत्यत आहुः—

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

'**प्रकृतेरपी**'तिं । **स्वमते** व्यासमते । **तदंशत्वाद्**ब्रह्मांशत्वात् । **वाङ्मनोगोचरातीतं द्विधा समभवद्बृहत् । तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिके**त्येकादशीयवाक्यात् । ननु न यदि कार्येऽन्वयः प्रकृतेस्तर्हि कथं परिच्छेदाप्रियत्वे तत्राहुः—'**अज्ञानादि**'ति । प्रतीयेते इति शेषः । ब्रह्मत्वेन ज्ञानाभावात् । '**ज्ञानेने**'ति । ब्रह्मत्वेन ज्ञानेन परिच्छेदाऽप्रियत्वयोर्बाधदर्शि-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

भवति पुरुष एवेदँ सर्व'मित्यादिश्रुतेः । तथा च नामरूपात्मकस्य जगतो ब्रह्माऽभिन्नत्वेन न पृथक्सत्ता किन्तु ब्रह्मरूपत्वाद्ब्रह्मण एव सर्वत्र समन्वय इति भावः । ननु जगति त्रैगुण्यप्रतीतेः प्रकृतिसमवायिकारणकत्वमेवास्त्वित्याशङ्क्याऽऽहुः—'**प्रकृतेरपि स्वमते तदंशत्वादि**'ति । **प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहमि**त्येकादशवाक्यात्प्रकृतेर्ब्रह्मांशत्वम् । तथा च प्रकृतिसमवायिकारणकत्वस्वीकारेऽपि ब्रह्मसमवायिकारणकत्वं न हीयत इत्यर्थः । ननु सर्वत्र व्यापकत्वाभावः प्रतीयते । अतो न सर्वस्य ब्रह्मतेत्याशङ्क्याऽऽहुः—'**अज्ञानात्परिच्छेदाप्रियत्वे**' इति । अविद्यामोहितबुद्धेरविदुषो व्यापकत्वाऽभावः । किन्तु व्यापकत्वतिरोधानम् । ततश्च न ब्रह्मत्वहानिरिति भावः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

तथा च चैत्रादिकर्तृके कार्ये ब्रह्मणः कर्तृत्वमिवोपादानत्वेपि बाधकाभावः । इत्थं चेतरोपादनकेपि ब्रह्मोपादानकत्वमव्याहतमेवेतिभावः । **तदंशत्वात्** ब्रह्मांशत्वात् । '**सदंशेन जडा अपी**'त्यनेन सदंशात् प्रकृतेरप्युत्पत्तेरित्यर्थः । ननु प्रपञ्चे परिच्छेदाप्रियत्वयोरपि भानात् तयोरप्युपादानब्रह्मधर्मता स्यादत आहुः—'**अज्ञाना**'दित्यादि । अन्यथा गर्भस्थो वामदेवो '**अहं मनुरभवं सूर्यश्चे**'ति न वदेत् । 'सर्वं खल्विदं ब्रह्म' 'एतदात्म्यमिदं सर्वमि'तिश्रुतिश्च न वदेत् । **ज्ञानेन** ब्रह्मत्वेन सकलपदार्थानां

जडजीवान्तर्यामिष्वेवैकैकांशप्राकट्यात् । कथमेवमिति चेत् । न । सद्रूपे घटरूपक्रियास्विव

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

परिच्छेदाऽभावं पश्यन् **'अहं मनुरभवं सूर्यश्चे'**त्यादिना सर्वरूपत्वं स्वस्यैव ब्रुवन् परिच्छेदं निराकरोति । तथाऽप्रियत्वमप्यज्ञानकृतमेव **'न ह वै सशरीरस्य सतः प्रियाऽप्रिययोरपहतिरस्ती'**ति देहाऽध्याससहितस्य प्रियाऽप्रियसंस्पर्शमुक्त्वा **'अशरीरं शरीरे वा वसन्तं न प्रियाप्रिये स्पृशत'**इति तस्यैव पश्चात्तद्रहितस्य प्रियाऽप्रियस्पर्शाऽभावं दर्शयन्ती तयोरज्ञानकार्यत्वमेव श्रुतिर्निरूपयति । यतो ब्रह्मांशत्वेन नित्यशुद्धमुक्तस्वभावस्याऽध्यासमन्तरेण सशरीरत्वं तत्कृते प्रियाऽप्रियत्वे ततोज्ञानमन्तरेणाऽशरीरत्वं च वक्तुं शक्यम् । यतोऽज्ञानं ज्ञानस्यैव निवर्तकमिति व्याप्तेः सर्वसम्मतत्वात् । तस्मान्न कारणधर्मता तयोर्वक्तुं शक्येति भावः । ननु परिच्छेदस्याऽब्रह्मधर्मत्वे **'एकोऽहमि'**त्यादिना ब्रह्मणो नानात्वं कथमुच्यत इति चेत्तत्राऽऽहुः—**'नानात्वमि'**ति । तत्र नानात्वं तु **'एकोऽहं बहु स्यामि'**त्यादिना रमणाऽर्थत्वादैच्छिकमेव । तेन विना तदसम्भावात् । कथं तदित्याकांक्षायामाहुः—**'जडजीवान्तर्यामिष्वि'**ति । जडे सदंशः प्रकटः । इतरयोरनुद्भू-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

'ज्ञानेने'ति । आत्मानन्दज्ञानेनेत्यर्थः । ननु प्राकृतिकं नानात्वमपि नादरणीयमित्यत आहुः—**'ऐच्छिकमि'**ति । बहु स्यामिति श्रुतेरिति शेषः । ननु प्रपञ्चे कया रीत्याऽऽन्वय इत्यत आहुः—'जडे'ति ।

केश्चिद्विरचिता वेदान्तचन्द्रिका ।

नात् । नन्वेवं प्रकृत्यन्वयाऽभावे नानात्वानुपपत्तिरित्यत आहुः—**'नानात्वमि'**ति । **'एकोऽहं बहुस्या'**मितिश्रुतेः । तत्र हेतुः—**'जडे'**ति । सच्चिदानन्दरूपस्य सदैकरसस्य । ननु ब्रह्मण एकैकांशेन

श्रीलालूभट्टकृता गूढार्थदीपिका ।

ननु घटपटाद्यनेकपदार्थरूपस्य नानात्वं प्रतीयते न ब्रह्मत्वम् । ब्रह्मणस्त्वेकत्वादेकमेवाद्वितीयं **ब्रह्म नेह नानास्ति किञ्चने**तिनानात्वनिषेधादित्याशङ्क्याऽऽहुः—**'नानात्वं त्वैच्छिकमेवे'**ति । **'एकोऽहं बहु स्यामि'**ति श्रुतेर्बहुभवनेच्छया प्रादुर्भूतं यन्नानात्वं तत्त्वन्योन्याऽभावरहितव्यक्तिबहुत्वरूपम् । न ह्येकस्य नानात्वमन्योन्याऽभावमवगाहते । अत एकस्य नानात्वमैच्छिकं, स्वेच्छया जातं न त्वन्योन्याभावावगाहीत्यर्थः । अत एव श्रुतौ **'एकोऽहं बहु स्या'**मित्येकस्य बहुभवनमुक्तं नत्वेकोऽहं बहु कुर्यामिति करणमुक्तम् । एकस्य केन प्रकारेणैच्छिकं नानात्वमित्याकाङ्क्षायामाहुः—**'जडजीवान्तर्यामिष्वि'**त्यादि । जड एकस्य सदंशस्य प्राकट्यम् । जीवे चिदंशस्य

भगवदीश्रीमदिच्छारामप्रणीतः प्रदीपः ।

ज्ञानेन । **बाधदर्शनात्** परिच्छेदाप्रियत्वयोर्बाधदर्शनादित्यर्थः । ननु 'तस्मादेकाकी न रमते द्वितीयमैच्छदि'त्यादिश्रुतिभिः रमणार्थं 'एकोहं बहु स्यामि'त्यादिश्रुत्युक्तं नानात्वं भगवता स्वीकृतं तच्च परिच्छिन्नत्वं विना सकलपदार्थानां प्रत्येकं व्यापकत्वे न सम्भवत्यत आहुः—**नानात्वमिति** । परिच्छिन्नतया नानातत्तद्व्यक्तित्वैरेकस्मिन् ब्रह्मण्यनुभूयमानं नानात्वम् । **ऐच्छिकं** स्वस्य रमणार्थमभेदांशे व्यापकत्वांशे च जीवानां दृष्ट्यावरणसम्पादनं स्वेच्छया तत् कृतमित्यर्थः । ऐच्छिकत्वमेवोपपादयन्ति—'जडे'त्यादिना । तथा च जडजीवान्तर्यामिषु प्रत्येकं सच्चिदानन्देति त्रिरूपत्वसत्त्वेपि जडे सदंशस्य प्राकट्यं चिदानन्दांश इच्छयाऽऽवरणम् । एवं जीवे चैतन्यांशस्याधिक्यात् सदानन्दांश ऐच्छिकावरणम् ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

तत्वम् । तस्माज्जडपदवाच्यत्वम् । जीवे चिदंश उद्भूतः । सदानन्दयोरनुद्भूतत्वम् । यद्यपि सदंशोऽप्युद्भूत एव तथापि चिदंशस्य तदपेक्षयाऽप्युद्भूतत्वाज्जीवपदप्रयोगः । तथाऽन्तर्यामिण्यपि त्रयाणामुद्भूतत्वेऽप्यानन्दांशस्येतराऽपेक्षयोद्भूतत्वादन्तर्यामित्वमित्यनुसन्धायोक्तं—**जडजीवान्तर्यामिष्वेकैकांशप्राकट्यादि**ति । अन्यथा जड एकांशस्य प्राकट्येऽपि जीवाऽन्तर्यामिणोर्द्वयोस्त्रयाणां च प्राकट्यात्तथोक्तिरनुपपन्नैव स्यात् । ननु ब्रह्मण एकरूपत्वेन कथमनेकरूपत्वापादकैकैकांशप्राकट्यकरणं सम्भवतीत्याशङ्क्य कैमुतिकन्यायेन निराकुर्वन्ति-'**कथमेवमिति चेन्ने**'ति । यथा घटे तद्रूपे तत्क्रियायां च सदंशस्योद्भूतत्वेऽपि यथा घटे घटः सन्निति सत्ता प्रतीयते न तथा रूपे । यथात्र रूपे तत्प्रतीतिर्न तथा क्रियायामिति तारतम्येन सदंशस्यैकस्याऽविर्भावः प्रत्यक्षसिद्धः । तथा जड एव

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

जडे सदंशो जीवे चिदंशोऽन्तर्यामिण्यानन्दांशोऽनुभूयत इत्यर्थः । शङ्कते—'**कथमि**'ति । जडजीवान्तर्यामिरूपप्रपञ्चे सच्चिदानन्दरूपब्रह्मणोऽन्वयसत्व एकांशस्य प्राकट्यमन्यांशस्य तिरोहितत्वं कया रीत्यैवमङ्गीक्रियत इत्यर्थः । अत्र समाधानमाहुः—'**ने**'ति । **सद्रूप** अस्तीतिप्रत्ययविषय एकस्मिन्नर्थे । **घटरूपक्रियासु** द्रव्यगुणकर्मसु । '**तारतम्येने**'ति । त्रिष्वेकैकांशप्राकट्यरूपतारतम्येन । सदंशस्येति शेषः । '**जडेऽपी**'ति । भानत्वादीत्यादिपदेन प्रियत्वपरिग्रहः । यथा घटः सन्, रूपं सदित्यादिप्रतीत्याऽस्तीति विषयीभूतेर्थे विद्यमानस्य सदंशस्य द्रव्यगुणकर्मस्वाविर्भावः स्वीक्रियते,

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

प्राकट्यमसम्भावितम् । तेन वा कथं नानात्वमित्याशयेनाहुः—'**कथमि**'ति । आशङ्कां निराकुर्वते—'**ने**'ति । तद्विशदयन्ति—'**सद्रूप**'इति । घटः सन् घटोऽस्तीति प्रत्ययात्सद्रूपे ब्रह्मणि घट इति नाम, कम्बुग्रीवाद्यवयवादिविशिष्टत्वरूपमाकारो वाय्वादिवशात्स्पन्दनादिक्रिया । एतेष्विव सद्रूपस्य ब्रह्मणस्तारतम्येन तत्तत्वेन गुणित्वादिना च गुणप्रधानभावेन चाविर्भाव इव सद्रूपेऽपि जडे, घटो भाति घटो भात इति भातत्वप्रतीतेर्हेतोः सच्चिदान्दांशानां तारतम्येन गुणप्रधानभावेन सच्चिदानन्दात्मकस्य ब्रह्मणः सदाद्येकैकांशेन प्रतीत्याऽन्यथाऽनुपपत्तिबलादाविर्भावोऽङ्गीकर्तव्य इत्यर्थः । अत्राऽऽदिपदेन प्रियत्वं बोध्यम् ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

प्राधान्येन प्राकट्यम् । अन्तर्यामिण्यानन्दांशस्य प्राधान्येन प्रादुर्भाव इत्थं वैचित्र्यान्नानात्वमिति हार्दम् । एकरसे ब्रह्मणि नानात्वप्रयोजकोऽसौ तारतम्येनाऽऽविर्भावो न युज्यत इत्याशङ्क्य निराकुर्वन्ति—'**कथमेवमि**'त्यादिना । दृष्टान्तेन तारतम्यस्य युक्तत्वं साधयन्ति-'**सद्रूप**' इत्यादि । ब्रह्मणः सदंशरूपे घटपदार्थे घटे तद्रूपे, तत्क्रियासु, सदंशस्य प्राकट्येऽपि, घटे यथा घटः सन्निति सत्ता प्रतीयते तथा घटरूपे सत्ताप्रत्ययो न भवति । यथा घटरूपे यादृक् सत्वं प्रतीयते, न तथा घटक्रियायां

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

एवमन्तर्यामिण्यानन्दांशस्योद्भूतत्वेनानन्दतुल्यत्वाभावात्सच्चिदंश ऐच्छिकावरणमित्येवं बोध्यमित्यर्थः । ननु सदैकरसस्य ब्रह्मणः कथं पूर्वोक्तरीत्या वैचित्र्येणानुभव इत्याशङ्क्य कैमुतिकन्यायेन समाधानमाहुः—**कथमि**त्यादि । **एवं** उक्तरीत्या वैलक्षण्येन । **सद्रूपे** इत्यादि । तथाचैक एव सदंशो घटरूपक्रियेति त्रिभिः प्रकारैः प्रकटो जातस्तत्रैकस्यैव सदंशस्य घटत्वरूपत्वक्रियात्वधर्माणां परस्परं विरुद्धत्वेनैव भानं

तारतम्येनाविर्भाववज्जडेऽपि भानत्वादिप्रतीतेस्तारतम्येनाऽऽविर्भावोऽङ्गीकर्तव्यः । भगवदिच्छाया नियामकत्वात् । नच साधारण्येन सर्वजगत्प्रति परमाण्वादीनामन्वयः सम्भवति ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

भानत्वादिप्रतीतेरपि कदाचित्सत्वाच्चिदाविर्भावोऽपि तारतम्येनाऽवश्यमभ्युपेयः । तथा चैकस्मिन्नेव पदार्थे यत्रैवं व्यवस्था तत्र त्रिष्वपि तथाऽऽविर्भावे किं वक्तव्यमिति कैमुतिकन्यायो ज्ञेयः । ननु जडे चिदाविर्भावः कथमिव स्यादिति चेत्तत्राऽऽहुः—'**भगवदिच्छाया**'इति । अत एवा'**ऽस्पन्दनं गतिमतां** पुलकस्तरूणामि'त्यादिकं संगच्छते । '**ता आप ऐक्षन्ते**'त्याद्यपि । अत्राऽप्येवकारार्थो ज्ञेयः ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

तथा जडेऽपि ब्रह्मांशयोः चिदानन्दयोरप्याविर्भावोऽङ्गीकार्य इति भावः । नन्वेवं चेत्तर्हि घटः सन्निति सामानाधिकरण्यप्रतीतिवत् ज्ञानं घट इति प्रतीतिः कुतो न जायत इत्यत आह—'**भगवदि**'ति । जडे ज्ञानांशस्य क्रीडार्थमिच्छया तिरोहितत्वान्न तादृशप्रतीतिरिति भावः । उच्चनीचभावादीनामाविर्भावोऽपि क्रीडार्थमिच्छयेत्येकादशस्कन्धे स्पष्टमिति सर्वमनवद्यम् ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

एवं च सति सदात्मके जडे सदंशः प्रधानं चिदानन्दांशौ गुणभूतौ तिरोभूतावाच्छन्नाविति यावत् । अनुभवाऽविषयत्वं तिरोभावः । एवं चिदात्मके जीवेऽपि चिदंशप्रधानमितरौ गुणभूतौ । यद्यपि सदंशोऽपि प्रधानं तथापि चित्प्राधान्येन तत्प्रतीतेस्तथा । आनन्दांशस्तु तिरोहितः । अन्तर्यामिणि तु त्रयमपि प्रकटम् । तथाप्यानन्दप्राधान्येनैव तयोः प्रतीतिविषयत्वं बोध्यम् । आनन्दः प्रीतिरेव । ननु जडे भातत्वेन ज्ञानविषयतास्ति । ननु ज्ञानम् । तत्कथं गुणभावेनापि तद्वत्त्वमिति चेत् । न । **पुत्रेति तन्मयतया तरवोऽभिनेदुरिति, त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन्नि**त्यादिवाक्यैरभिनन्दनादेरुक्तत्वात् । नह्यभिनन्दनं, विना ज्ञानं भवति । **ता आप ऐक्षन्ते**तिश्रुतेश्च । जडादिषु सदादीनां तारतम्येनाऽऽविर्भावे कारणत्वेन भगवदिच्छैवेत्याहुः–'**भगवदि**'ति । सा **चैकोऽहं बहु स्यामि**त्याकारिका ज्ञेया । परमाणूनां

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

सत्त्वप्रतीतिः । तथा चैकस्मिन् संदश एव प्रतीतितारतम्यं, तदा सच्चिदानन्दांशेषु तारतम्येनाऽऽविर्भावे

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

नतु सामानाधिकरण्येन । तथा सति सच्चिदानन्देतित्रयाणां परस्य वैलक्षण्ये भाने किं चित्रमिति कैमुतिको बोध्यः । **भानत्वादी**ति । 'ता आप ऐक्षन्त' 'चक्षुरब्रवीत्' 'अस्पन्दनं गतिमतां पुलकस्तरूणामि' त्यादाविवेत्यर्थः । '**तारतम्येने**'त्यादि । सदादित्रिषु एकैकांशप्राकट्यरूपतारतम्येन । **आविर्भावः** प्रत्यक्षयोग्यता । **नियामकत्वात्** तरतमभावे नियामकत्वात् । ब्रह्मणः सर्वजगत्प्रति समवायिकारणत्वं अस्तिभातिप्रियत्वादिरूपजगति ब्रह्मणः समन्वयं चोपपाद्येतरस्य जगत्प्रत्युपादानत्वं न सम्भवतीत्याहुः—'**नचे**' त्यादिना । **साधारण्येन** सकलकार्यान्वयिकारणधर्मेण । **सर्वजगत्प्रति** कार्यद्रव्यगुणक्रियासमुदायरूपजगत्प्रतीत्यर्थः । **अन्वयः**; मृत्सुवर्णकार्येषु मृत्सुवर्णानामिव भानमित्यर्थः ।

एकस्मिन्ननुस्यूते सम्भवत्यनेककल्पनाया अन्याय्यत्वात् । लोके कर्तृविशेषवदुपादानविशे-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

यद्वा । **ननु** तारतम्येनाऽऽविर्भावे को हेतुरित्यत आहुः—'**भगवदिच्छाया**' इति । '**तस्मादेकाकी न रमते**' '**एकोऽहं बहु स्याम्**' '**लोकवत्तु लीलाकैवल्यमि**'त्यादिभिरात्मारामस्य पूर्णकामस्य प्रयोजनाऽन्तराऽभावाद्रमणेच्छैव नियामिकेति भावः । वैचित्र्यं विना तदसम्भवात् । तस्य च तारतम्याऽधीनत्वात् । एवमेकरूपत्वेऽपि ब्रह्मणि नानात्वं समर्थयित्वा तस्यैवोपादानत्वं नान्यस्येति वक्तुमितरेषु तदनुपपत्तिमाहुः—'**न च साधारण्येने**'ति । नहि परमाणूनां प्रकृतेर्वा सर्वस्मिन्प्रपञ्चेऽन्वयः कदाचिदपि सम्भवति । आकाशादौ परमतस्य वक्तुमशक्यत्वात् । ननु कार्ये हि कारणानामन्वयः । तथाच पृथिव्यादिषु चतुर्ष्वपि तदन्वयस्य निष्प्रत्यूहत्वात्कथं नाऽन्वय इत्याशङ्क्याऽऽहुः—'**एकस्मिन्नि**'ति । नहि परमाणूनामपि सामान्यरूपेणाऽन्वयः सम्भवति । सजातीयानामेवाऽऽरम्भकत्वस्याऽभ्युपगम्यमानत्वात् । तथाच '**एकमेवाऽद्वितीयमि**'त्यादिभिर्ब्रह्मण एवैकत्वात्तदन्वयस्यैव वक्तुमुचितत्वेनाऽनेकतत्कल्पनस्य गौरवग्रस्तत्वेनाऽन्याय्यत्वम् । नन्वनेकेषामन्वयस्य कथमन्याय्यत्वमिति चेत् । न । द्वितीयाऽध्याये **महद्दीर्घवद्ध्रस्वपरिमण्डलाभ्यामि**त्यादिना

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

अत्र समवायिकारणपरमाणुसमन्वयवादी नैयायिकः शङ्कते—'**न चे**'ति । समाधानमाहुः—'**एकस्मिन्नि**'ति । ब्रह्मणीति शेषः । नन्वनेकेषु समवायित्वं न स्वीक्रियते चेत्तन्त्वादीनां पटसमवायित्वं न स्यादित्यत आहुः—'**लोके**'ति । '**कर्तृविशेषवदि**'ति । कुलालादिलोकेशान्तकर्तृ-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

समन्वयेऽनुपपत्तिं दर्शयन्ति—'**नचे**'ति । साधारण्यं हि कारणतावच्छेदकविशेषधर्माऽनाक्रान्तत्वम् । आकाशादौ तदभावात् पार्थिवादीनां तेषां कालादावपि तथा । आदिना प्रकृत्यादेः संग्रहः । ननु नायं दोषः । सजातीयानामेव तेषां सजातीयेषु कार्येष्वन्वयस्याऽनुभवसिद्धत्वात् । आकाशादौ तु कार्यत्वस्यैवाऽनभ्युपगमादित्यत आहुः—'**एकस्मिन्नि**'ति । एकस्मिन्ब्रह्मणि **तत्सृष्ट्वा तदेवानुप्राविश**'दितिश्रुत्या सिद्धे अनुस्यूते सम्भवति, अर्थात्समवायित्वे सम्भवति सत्यनेकेषां परमाणूनां समवायित्वकल्पनस्य गौरवग्रस्तत्वात् । नन्वेवमपि सति मृत्तन्त्वादिभिरेव घटपटाद्युत्पत्तेरन्वयव्यतिरेकाभ्यां तेषामेव तत्त्वमुचितं, न त्वदृष्टस्य ब्रह्मण इत्यत आहुः—'**लोक**'इति । यथा कुलालादेः कर्तृत्वेपि

श्रीलालूभट्टकृता गूढार्थदीपिका ।

का वाऽनुपपत्तिरिति भावः । '**लोके कर्तृविशेषवदि**'ति । घटनिरूपितं कर्तृत्वं यथा कुलाले भवदपि ब्रह्मणि घटकर्तृत्वं नापनुदति । तथा मृदादौ घटसमवायिकारणत्वं सत्यपि न ब्रह्मणि घटसमवायि-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

परमाणवादीत्यादिपदेन दिक्कालयोर्ग्रहणम् । ननु पार्थिवादिपरमाणुचतुष्टयस्य प्रत्येकं पृथिवीजलादौ समन्वयोऽस्त्येवेत्यत आहुः—**एकस्मिन्नि**त्यादि । एकस्मिन् ब्रह्मण्यनुगत उपादाने सम्भवति सत्यनेकोपादानकल्पनाया गौरवेणान्याय्यत्वादित्यर्थः । ननु यत्रयत्र कार्यत्वं तत्रतत्र ब्रह्मोपादानकत्वमिति विनियतान्वयो न सम्भवति घटपटादौ कार्यत्वे मृदाद्युपादानकत्वस्य च सत्त्वेन ब्रह्मोपादानकत्वस्य चाभावेन व्यभिचारादित्यत आहुः—'**लोके**' इत्यादि । तथा च लोके तत्तत्कार्यं प्रति तत्तत्कुलालादि-

षग्रहणेपि न ब्रह्मणि व्यभिचारः । अलीकप्रतीतेऽस्तित्वादिप्रतीतावपि सम्यगन्वयाऽभा-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

निराकरिष्यमाणत्वात् । ननु घटादौ मृदादीनामुपादानत्वं प्रत्यक्षतो दृष्टम् । न ब्रह्मणः । तथाच कथं तस्य सम्यगनुवृत्तत्वमित्याशङ्क्य निदर्शनेन समाधानमाहुः—**लोके कर्तृविशेषवदि**ति । यथा प्रत्यक्षतो दृष्टमपि कुलालादिकर्तृत्वं न ब्रह्मकर्तृत्वोपघातकम् । तथोपादानविशेषस्य मृदादेरिन्द्रियेण ग्रहणेऽपि ब्रह्मणि न व्यभिचारः । उपादानत्वस्येति शेषः ।

ननु शुक्तिरजतादावप्यस्तित्वादिप्रतीतेस्तत्राऽपि ब्रह्मणः समन्वयः कस्मान्न भवतीत्याशङ्क्याह—'**अलीकप्रतीत**'इति । यदलीकं सत्सत्त्वेन प्रतीतं तस्मिन्नित्यर्थः । तत्राऽस्तित्वादिप्रतीतेस्तदव्यवहितोत्तरक्षण एव 'नेदं रजतमि'ति बुद्ध्या बाधदर्शनेन प्रातिभासिकत्वात् । तद्व्यतिरिक्ताया एव तस्यास्तत्साधकत्वान्न ब्रह्मकार्यत्वम् । अस्तित्वादिप्रतीतेः समन्वयस्य व्यभिचारः साहचर्यनियमाऽभावश्च

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

विशेषवदित्यर्थः । '**उपादाने**'ति । तन्तुपरमाण्वादीनां प्रकृत्यन्तानां ग्रहणेऽपीत्यर्थः । '**न ब्रह्मणि व्यभिचार**' इति । ब्रह्मणः सर्वनियन्तृत्वेन समवायित्वेन च कारणत्वव्यभिचारो नास्तीत्यर्थः । ननु भ्रमे स्वाप्निकप्रतीतौ चास्तित्वप्रतीतिर्जायत इति ब्रह्मणोऽन्वयस्तत्रापि स्यादित्यत आहुः—'**अलीके**'ति । '**प्रतीते**'ति । रजतादाविति शेषः । '**सम्यगि**'ति । अन्वये सम्यक्त्वं नाम, अनारोपितानागन्तुकरूपेणान्वयत्वम् । जागरणोत्तरं विशेषदर्शनोत्तरं स्वाप्निकराज्यस्य भ्रमीयरजतस्य च बाधदर्शनात् । स्वाप्निके भ्रमीयरजतादौ च सत्ताऽऽरोपितेति तत्र न ब्रह्मकार्यत्वम् । अथ च तादृश-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

न ब्रह्मणः कर्तृत्वव्यभिचारस्तथा मृत्तन्त्वाद्युपादानग्रहणेपि नोपादानत्वव्यभिचारः । ननु यद्यस्तीति प्रत्ययबलाद्ब्रह्माऽन्वयाङ्गीकारेण ब्रह्मकार्यत्वं तदा शुक्तिरजतादावस्तित्वप्रतीतेस्तदन्वये तथात्वं स्यादित्यत आहुः—'**अलीक**'इति । अलीकं सद्यत्प्रतीतं तस्मिन् रजतादावस्तित्वादिप्रतीतिबलान्न तदन्वयेन तत्कार्यत्वं वक्तुं शक्यम् । न वा तत्र भगवतोस्तित्वव्यभिचारः । तथाज्ञाने स्वस्यैव बाधात् । स्वेच्छया स्वस्यैव बहुरूपेण भवनानन्तरं स्वप्रवेशाभावादित्यर्थः । तथाच तत्र रजतत्वाऽऽरोपादस्तित्वस्यारोपः ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

कारणत्वाऽभाव इति हार्दम् । तदाहुः—'**उपादानविशेषग्रहणेऽपि न व्यभिचार**' इति । उपादानत्वस्य न व्यभिचार इत्यर्थः । नन्वस्तिप्रत्ययो रज्जुभुजङ्गादावप्यस्ति, ततस्तत्रापि ब्रह्मसमन्वयः कुतो नाङ्गीक्रियत इत्याशङ्क्याऽऽहुः—'**अलीकप्रतीत**'इत्यादि । अलीकं यत्सत्वेन प्रतीतं तस्मि-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

विशेषकर्तृसत्त्वेपि यथा ब्रह्मणः कर्तृत्वमुरीक्रियते तथा तत्तद्घटादिकार्येषु कपालादिविशेषोपादानसत्त्वेपि ब्रह्मोपादानकत्वस्य सत्त्वान्न व्यभिचार इत्यर्थः । **ब्रह्मणि** ब्रह्मोपादानकत्वस्य । ननु यत्रयत्रास्तित्वप्रियत्वाद्यन्वयस्तत्रतत्र ब्रह्मोपादानकत्वरूपं ब्रह्मकार्यत्वमितिनियमाङ्गीकारेऽलीकप्रतीतस्वाप्निकरथरथयोगपथादौ मायाकार्येऽस्तित्वप्रियत्वयोः सत्त्वात्तत्र ब्रह्मोपादानकत्वरूपब्रह्मकार्यत्वस्यासत्त्वाद्व्यभिचार इत्यत आहुः-**अलीकेत्यादि । सम्यगित्यादि** । जागरणोत्तरं तत्रास्तित्वादिप्रतीतेर्बाधादबाधिता-

वान्न कार्यत्वव्यभिचारौ । तस्माद्ब्रह्मण एव समवायित्वम् । एतत्सर्वं श्रुतिरेवाह—'स आत्मानः स्वयमकुरुते'ति । निमित्तत्वं तु स्पष्टमेव सर्ववादिसम्मतम् ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

नास्तीत्यर्थः । उक्तमर्थमुपसंहरति—'**तस्मादि**'ति । नन्वेतस्याः प्रतिभासिकत्वमेव कुतो नेत्याशंक्य तन्निरासाय श्रुतिसंवादमाहुः—'**एतत्सर्वमि**'ति । तथा चोक्तश्रुत्यनुरोधात्सर्वस्य ब्रह्मरूपत्वेनाऽस्तित्वादिप्रतीतिः प्रामाणिकी । विकल्पप्रतीतिस्तु वाचारम्भणमात्रत्वादप्रमाणम् । या पुनः श्रुतिसिद्धा, सा तु प्रमाणमेवेति तत्त्वम् । ननु यथोपादानत्वं सोपपत्तिकं प्रतिपादितं तथा निमित्तत्वमपि कुतो नेत्यत आहुः—'**निमित्तत्वमि**'ति । सांख्यादीनां काणादादीनां च सर्वेषां वादिनां सम्मतम् । सांख्यानां मते प्रकृतेर्जडत्वाच्चैतन्योपरागेणैव प्रकृतेः कार्योत्पत्तेरभ्युपगमात् । काणादानामपि मते परमाण्वादिसंघट्टने तस्य कारणत्वात् । तथा च विप्रतिपत्त्यभावान्न भिन्नतया सोपपत्तिकं निरूपणीयमित्यर्थः ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

कार्यतानिरूपिता कारणता, ब्रह्मणि नास्तीति, कार्यलक्षणस्य व्यभिचारोऽपि नास्तीत्यर्थः । उपसंहरन्ति—'**तस्मादि**'ति । प्रपञ्चे प्रकटानां सच्चिदानन्दानामेवाऽविर्भावादित्यर्थः । अत्र प्रमाणमाहुः—'**एतदि**'ति । '**आहे**'ति । एकस्यैव कर्तृत्वं कर्मत्वमाहेत्यर्थः । '**स आत्मानमि**'ति । अत्र श्रुतावात्मपदस्वारस्यादविकृतपरिणामवाद एव सम्मतः । आत्मनो विकाराभावादिति भावः । ननु समवायिकारणत्वं ब्रह्मणः प्रतिपादितं परन्तु निमित्तकारणत्वं श्रुतिर्वदतीत्यत्र किं कर्तव्यमत आहुः—'**निमित्तमि**'ति । '**संमतमि**'ति । केषाञ्चिन्मते केवलं निमित्तकारणं ब्रह्म । अस्माभिस्तु श्रुतिर्वदतीत्येतदर्थं निमित्तवदुपादानकारणत्वं ब्रह्मणः स्वीक्रियत इति सर्वसम्मतमिति भावः । एतेन सर्वविधा कारणता ब्रह्मण्यस्तीति क्रियाज्ञानशक्त्योर्निरतिशयित्वभङ्गो नास्तीति सूचितम् ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ननु वास्तवं तदिति भावः । उपसंहरन्ति—'**तस्मादि**'ति । उक्तयुक्तिभ्यः । अन्यत्र समवायित्वस्य वक्तुमशक्यत्वादेवकारोऽन्यव्यवच्छेदकः । ननु प्रयोजकत्वादिरूपेण कर्तृबहुत्वसम्भवेपि प्रत्यक्षविरुद्धत्वान्न समवायिबहुत्वसम्भव इत्यत आहुः—'**एतदि**'ति । ब्रह्मातिरिक्तस्य समवायित्वनिषेधः । ब्रह्मण एव समवायित्वम् । नानात्वमितरनिरपेक्षत्वं कार्यस्य सच्चिद्रूपत्वं चात्र **सर्व**पदार्थः । तामेव श्रुतिं दर्शयन्ति—**स आत्मानमिति** । उक्तार्थास्तदात्मस्वयंपदैर्ज्ञेयाः । ननु कारणत्वविचारे निमित्तत्वस्यापि विचारः कुतो न कृत इत्यत आहुः—'**निमित्तत्वं त्वि**'ति । तथा च तत्र विप्रतिपत्त्यभा-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

न्नित्यर्थः । '**सम्यगन्वयाभावादि**'ति । अबाध्यप्रत्ययजनकान्वयाऽभावादित्यर्थः । '**न कार्यत्वव्यभिचारावि**'ति । कार्यत्वं नास्ति, व्यभिचारश्च नास्तीत्यर्थः । अलीकप्रतीते शुक्तिरजतादौ

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

न्वयाभावादित्यर्थः । **न कार्यत्वेत्यादि** । तथा च तत्रास्तित्वरूपहेतोरेवाभावात् ब्रह्मकार्यत्वमपि न ब्रह्मकार्यत्वस्यास्तित्वे व्यभिचारोपि नेत्यर्थः । ब्रह्मणः समवायिकारणत्वं निगमयन्ति—'**तस्मा**'दित्यादि । **निमित्तत्वं** ब्रह्मणः कार्यमात्रं प्रति निमित्तकारणत्वमित्यर्थः ।

१—अयं वादो भूमिकायां द्रष्टव्यः ।

केचिदत्र शास्त्रयोनित्वपूर्वपक्षनिराकरणाय तत्तु समन्वयादिति योजयन्ति । तत्पूर्व-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

एवं समन्वयसूत्रं सोपपत्तिकं व्याख्याय तत्र विनिगमनार्थं मतान्तरीयं व्याख्यानमनूद्य दूषयति– **केचिदि**त्यारभ्य **'समन्वयसूत्रं वक्तव्यमि'** त्यन्तेन । **अथातो ब्रह्मजिज्ञासेति** ब्रह्मजिज्ञासां प्रतिज्ञाय किं तदित्याकांक्षायां जन्मादिसूत्रे तल्लक्षणमुक्त्वा सर्वज्ञत्वं सर्वशक्तित्वं च समर्थितं तदेव दृढीकर्तुं पुनः शास्त्रयोनित्वादिति प्रयुक्तवान् । शास्त्रस्य ऋग्वेदादिलक्षणस्य योनिः कारणम् । शास्त्रं वा योनिः कारणमिति प्रतिपादितमिति शेषः । तथा च शास्त्रप्रमाणकत्वात्सर्वज्ञत्वं सर्वशक्तित्वं च दृढीकृतमित्यर्थः । ननु शास्त्रस्य तत्प्रतिपादकत्वे सर्वमेतद्भवेत्तदेव तु कथमिव वक्तुं शक्यते । यतः क्रियार्थस्यैवाऽबाधितानधिगतासन्दिग्धार्थप्रतिपादकत्वेन स्वार्थे प्रामाण्यस्य वक्तुं शक्यत्वादक्रियार्थानां स्वार्थेऽप्रामाण्यसम्भवात्तदुपपत्त्यर्थं क्रियासमवायिकर्तृदेवतादिप्रकाशकत्वेन विधिनैकवाक्यतां सम्पाद्य प्रामाण्यस्य पूर्वकाण्डेऽभ्युपगतत्वात्तन्न्यायेन वेदान्तानामपि भूतार्थोपदेशिनामक्रियार्थत्वात्पूर्वकाण्डोक्तकर्मसमवायिकर्तृदेवतादिप्रकाशकत्वेन स्वप्रकरणगतोपासनाविषयसमर्थकत्वेन वा प्रामाण्यस्योपपत्तेर्न स्वार्थे तद्वक्तुं शक्यमिति कथं शास्त्रप्रमाणकत्वं ब्रह्मणो वक्तुं शक्यमित्यतः शास्त्रयोनित्वादिति स्वरूपाऽसिद्धो हेतुरित्याशंकां मनस्यभिसन्धाय तदेव समर्थयितुं सूत्रकारस्तत्तु समन्वयादिति सूत्रं प्रयुक्तवान् । शास्त्रयोनित्वं तु अन्यत्रसिद्धवस्तुप्रतिपादकानां स्वार्थपरत्वाऽभावेऽपि वेदान्तानामक्रियार्थानामपि स्वार्थे सम्यगन्वयस्य वक्तुं शक्यत्वात् । **तरति शोकमात्मविदित्यादौ**

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ननु समवायिकारणत्वं नाम समवायसम्बन्धाऽवच्छिन्नकारणत्वम् । एवं च समवायस्याऽभेदसम्बन्धातिरिक्तत्वात्सम्बन्धस्य च द्विनिष्ठत्वात्प्रपञ्चब्रह्मणोरभेद इदं न संगच्छत इति चेत् । न । अस्मन्मते समवायस्य समन्वयरूपत्वेनाऽभेदस्वरूपत्वमेव वक्तव्यम् । तस्य बहु स्यामितीच्छोत्तरं द्विनिष्ठत्वं संगच्छते । यथा हिरण्यं कुण्डलमित्यत्र हिरण्याऽभिन्नं कुण्डलमित्यर्थेऽभेदस्य द्विनिष्ठत्वं तद्वदत्रापि मन्तव्यम् । अत एवोक्तमभियुक्तैः—**कार्यरूपेण नानात्वमभेदः कारणात्मना । हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदे**ति, सर्वमनवद्यम् । अत्र सर्वेषां मतानामनुवादनं खण्डनं च प्रकाशेनुसन्धेयम् ।

अत्र सूत्रे रामानुजाचार्यादीनां मतमनूद्य खण्डयन्ति–**'केचिदि'**त्यादिना **'ब्रह्मणः समवा-**

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

वान्न तद्विचारविषय इति भावः । अत्र मतान्तरीयपूर्वपक्षसिद्धान्तादर्शावनूद्य, स्वसिद्धांतदार्ढ्याय दूषयितुमुपक्रमन्ते—**'केचिदि'**त्यादि । **अत्र** शास्त्रयोनित्वादिति सूत्रे । **'पूर्वपक्षे'**ति । **दृष्टो हि तस्यार्थः**-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

ब्रह्मकार्यत्वं नास्ति । ब्रह्मसमन्वयस्य व्यभिचारः साहचर्यनियमाभावः । यत्र यत्रास्तित्वप्रतीतिस्तत्र तत्र ब्रह्मसमन्वय इत्याकारकस्य नियमस्याऽभावो नास्ति । अलीकप्रतीतस्य शुक्तिरजतादेरवास्तवत्वेन लक्ष्यत्वाभावान्नास्तीत्यर्थः । मतान्तरीयं व्याख्यानमनूद्य दूषयन्ति—**'केचिदि'**त्यादिना ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

स्वोक्तसिद्धान्तं दृढीकर्तुं मतान्तरव्याख्यानान्यनूद्य दूषयितुमाहुः–**'केचि'**दित्यादि । **समन्व-**

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

यित्वाय समन्वयसूत्रं वक्तव्यमि'त्यन्तेन । '**पूर्वपक्षनिराकरणाये**'ति । शास्त्रयोनित्वसूत्रे यः पूर्वपक्षस्तन्निराकरणायेत्यर्थः ।

पूर्वपक्षस्तु पूर्वोत्तरकाण्डरूपो वेदः सर्वोऽपि क्रियापर एव । तत्र विधिघटितं वाक्यं मुख्यं क्रियापरम् । अन्यानि वाक्यानि कानिचित्तदङ्गबोधकानि कानिचिदर्थवादवाक्यानि क्रियाप्राशस्त्यबोधकानि । एवंच सर्वोऽपि वेदः क्रियाप्रतिपादक एव, न ब्रह्मप्रतिपादक इति कथं सूत्रे ब्रह्मणि जगत्कर्तृत्वं शास्त्रप्रमाणत्वप्रतिपादकमिति । ननु **आत्मा वारे द्रष्टव्यः आत्मेत्येवोपासीते**त्यादिविधिवाक्यानां ब्रह्मोपासनाङ्गब्रह्मज्ञानप्रतिपादकानामन्येषामपि वाक्यानामुत्तरकाण्डेऽपि सत्वाद्ब्रह्मप्रतिपादकत्वमपि वेदस्य सम्भवतीति चेत् । न । तथापि विधिना उपासनानुकूला क्रिया विधीयते, अन्येषां च वाक्यानां तदङ्गध्यानार्थं ब्रह्मज्ञानप्रतिपादनपरत्वेनैव निर्वाहे, कारणताया न प्रमाणत्वम् । **यतो वेति** वाक्यं ध्यानविधौ प्राशस्त्यबोधकमिति ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

इदमत्र ज्ञेयम् । शास्त्रयोनित्वादित्यनेन ब्रह्मणः शास्त्रप्रमाणकत्वं निरूपितम् । तन्न सम्भवति । वेदान्तानां प्रामाण्यस्यैव दुरुपपादत्वात् । स्वार्थे प्रामाण्यं हि क्रियार्थस्यैव । अबाधितानधिगताऽसन्दिग्धार्थप्रतिपादकत्वात् । अत एव क्रियासमवायिकर्तृदेवतादिप्रकाशकत्वेनाऽक्रियार्थानां विधिनैकवाक्यतां सम्पाद्य, प्रामाण्यं पूर्वकाण्डे प्रतिपादितम् । एवमक्रियार्थानां वेदान्तानामपि स्वप्रकरणगतोपासनाविषयसमर्पकत्वेन प्रामाण्यान्न स्वार्थे प्रामाण्यमिति, तत्रोक्तस्य ब्रह्मणः कथं शास्त्रयोनित्वमित्युत्सूत्रपूर्वपक्षः । एवं पूर्वपक्षे, तत्तु समन्वयादिति सूत्रकार आह--शास्त्रयोनित्वं अस्ति ब्रह्मणः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

यसूत्रं वक्तव्यमित्यन्तेन ग्रन्थेन । प्रथमसूत्रे ब्रह्मजिज्ञासाप्रतिज्ञाकरणे किं ब्रह्मपदवाच्यमितिजिज्ञासोत्पत्तौ जातायां जन्मादिसूत्रेण ब्रह्मलक्षणमुक्त्वा ब्रह्मणि सर्वज्ञत्वसर्वशक्तिमत्त्वयोः समर्थनं कृतम् । एतद्द्वयदृढीकरणार्थमेव पुनः शास्त्रयोनित्वादित्युक्तवान् सूत्रकारः । शास्त्रस्य वेदरूपस्य योनित्वात् कारणत्वादित्यर्थः । शास्त्रे वेदे प्रतिपादकतासम्बन्धेन योनित्वं कारणत्वं वा यस्येत्यर्थः । शास्त्रोक्तसर्वकारणतावदिति सिद्धम् । एतच्चोक्तं सर्वं तदा सिद्ध्येद्यदि क्रियाप्रतिपादकभिन्नानां सिद्धार्थानां वेदान्तवाक्यानां स्वार्थे प्रामाण्यं स्यात् । तदेव तु न । तेषां क्रियाप्रतिपादकत्वाभावात् । तस्मात्पूर्वकाण्डे क्रियार्थानां कर्मसम्बन्धप्राशस्त्यकर्तृदेवतादिप्रकाशनद्वारा विधिनैकवाक्यतया प्रामाण्यं यथोरीकृतं तथा सिद्धार्थानां वेदान्तवाक्यानामपि कर्मसम्बन्धकर्तृदेवतादिप्रकाशनद्वारा क्रियावाक्यैकवाक्यतयैव प्रामाण्यमुपासनाविध्येकवाक्यतया प्रामाण्यं न तु स्वातन्त्र्येण स्वार्थेपि प्रामाण्यम् । इत्थं च 'यतो वा इमानी'त्यादिशास्त्रोक्तकारणत्वेन सर्वज्ञत्वसर्वशक्तिमत्त्वयोरसिद्ध्या शास्त्रयोनित्वादित्यत्रोपष्टम्भको हेतुरसिद्ध इति पूर्वपक्षे प्राप्ते मतान्तरीयाणां समाधानसूत्रम्--**तत्तु समन्वया**दिति । तेषां मते सूत्रार्थस्तु **तत्तु** ब्रह्मणो वेदान्तोक्तकारणत्वन्तु **समन्वयात्** सिद्धार्थे योग्यत्वेन सम्यगन्वयात् 'तरति शोकमात्मवित्' 'ज्ञानादेव हि कैवल्यं' 'ब्रह्मैव सन् ब्रह्माप्येती'त्यादौ ब्रह्मणो वेदान्तैकसमधिगम्यत्वेन तत्प्रापकसाधनफलादिप्रतिपादकतया पुरुषार्थपर्यवसानेन वेदान्तानां स्वार्थे प्रामाण्याभ्युपगमान्न क्रियात्वाकाङ्क्षा तेषां प्रामाण्यार्थमिति समाधानमाहुः ।

पक्षसिद्धान्तयोर्द्वयोरप्यसङ्गतत्वादुपेक्ष्यम्। तथाहि—जैमिनिर्धर्मजिज्ञासामेव प्रतिज्ञाय तत्प्र-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

भूतार्थज्ञानस्यैव पुरुषार्थसाधकत्वस्य प्रतीयमानत्वात्। ब्रह्मणः श्रुत्येकसमधिगम्यत्वेन प्रामाण्यस्याऽपि वक्तुं शक्यत्वाच्च। नाऽपि कर्मसमवायिकर्तृदेवतादिप्रकाशनार्थत्वं स्वप्रकरणगतोपासनार्थत्वं वा वक्तुं शक्यम्। एकत्वविज्ञानस्य द्वैतविज्ञाननाशकत्वात्स्वातन्त्र्येण फलसाधकत्वाच्चेत्यादि सिद्धान्तितं कैश्चित्। तत्तु पूर्वपक्षसिद्धान्तयोर्द्वयोरप्यसङ्गतत्वादुपेक्ष्यमित्यर्थः। तदेतदाहुः—'**तथा ही**'ति।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

अत्र समाधानं समन्वयसूत्रम्। तत्र समन्वय इत्यस्य सम्यक्प्रतिपाद्यतयान्वयः समन्वयः। तथा च **सत्यं ज्ञानमनन्तं ब्रह्मे**त्यादिवाक्येषु निरतिशयानन्दरूपं ब्रह्मैव प्रतिपाद्यत इति शास्त्रप्रमाणकत्वं ब्रह्मणः सिद्धम्। एवं चैतादृशं निरतिशयानन्दरूपब्रह्मप्राप्त्युपायभूतब्रह्मज्ञानप्रतिपादनपरं **ब्रह्मविदाप्नोति परमि**ति वाक्यम्। ब्रह्मज्ञानार्थ**मात्मानमेव लोकमुपासीते**त्यादिनोपासना विधीयत इति सर्ववेदान्तवाक्यानां मोक्षोपायप्रतिपादकत्वं निरवद्यमिति।

ननु कथं पूर्वपक्षसिद्धान्तयोरसङ्गतत्वमित्यतः प्रथमं पूर्वपक्षासङ्गतिमाहुः—'**तथा ही**'त्यादिना।

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

कर्मावबोधमिति, आम्नायस्य क्रियार्थत्वादित्यादिसूत्रैः शास्त्रस्य धर्मप्रमाणत्वे सिद्धे कथं शास्त्रप्रमाणकं ब्रह्मेति पूर्वपक्षनिराकरणाय योजयन्ति—सिद्धान्तत्वेनेति शेषः। '**तदि**'ति। तत्सूत्रस्य तथायो-

श्रीलालूभट्टकृता गूढार्थदीपिका।

सिद्धवस्तुप्रतिपादकानामपि वेदान्तानां स्वार्थे समन्वयात्। '**तमेव विदित्वा अतिमृत्युमेति तरति शोकमात्मवि**'दित्यादौ सिद्धवस्तुज्ञानस्य पुमर्थसाधकताप्रत्ययात्। पुरुषार्थसाधकवाक्यस्य स्वार्थे प्रामाण्याङ्गीकारात्। श्रुत्येकसमधिगम्यस्य ब्रह्मणोऽधिगतार्थत्वाऽभावात् तद्वक्तॄणां वेदान्तानां प्रामाण्यस्य भेरीघोषेण सिद्धत्वात्। न चोपनिषदां कर्मसमवायिकर्तृदेवताप्रकाशनार्थत्वम्। न वा स्वप्रकरणगतोपासनार्थत्वम्। अपि तु '**तरति शोकमात्मवि**'दित्यादिभिर्ब्रह्मज्ञानस्य स्वातन्त्र्येण फलसाधकत्वात्तन्निरूपकाणामस्ति स्वार्थे प्रामाण्यमिति सिद्धान्तितं कैश्चित्। तत्तु पूर्वपक्षसिद्धान्तयोर्द्वयोरप्यसङ्गतत्वादुपेक्ष्यमित्यर्थः। तदुपपादयन्ति—'**तथाही**'त्यादिना। यदुक्तमाम्नायस्य सर्वस्य क्रियार्थत्वेन पुरुषार्थसाधकत्वादक्रियार्थानां कर्मसमवायिपदार्थप्रकाशनद्वारा प्रामाण्यस्य पूर्वतन्त्रे सिद्धत्वात्तन्न्यायेनात्राऽप्यक्रियार्थानां वेदान्तानां प्रकारणान्तरोक्तक्रियासमवाय्यर्थनिरूपकतया स्वप्रकरणोक्तोपासनार्थत्वेन वा पुमर्थपर्यवसायित्वेन प्रामाण्याऽभावस्तथासति तदुक्तब्रह्मणो न शास्त्रयोनित्वमित्युत्सूत्रपूर्वपक्षरचनम्। तत्तु न युक्तम्। अक्रियार्थानां स्वार्थे प्रामाण्याऽभावो, विध्येकवाक्यत्वेन प्रामाण्यमित्यादिनिर्णयस्य पूर्वकाण्ड एवाऽङ्गीकारात्। उत्तरकाण्डे तु नायं निर्णय इत्याहुः—'**जैमिनिर्हि धर्मजिज्ञासामेवे**'त्यादिना। जैमिनिर्धर्मजिज्ञासां प्रतिज्ञाय धर्मलक्षणमुक्त्वा धर्मप्रति-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

तद्दूषयन्ति—'**तत्पूर्वपक्षे**'त्यादिना। वाद्युक्तं पूर्वपक्षसिद्धान्तनिर्वचनम्। उपेक्षाबीजमाहुः—'**तथाही**'त्यादि। **धर्मजिज्ञासामेवे**त्येवकारेण ब्रह्मजिज्ञासानिराकरणमुक्तम्। **तत्** यज्ञादिरूपं कर्म। तथा 'चाम्नायस्य क्रियार्थत्वात् आनर्थक्यमतदर्थानामि'तिसूत्रात्कर्मप्रतिपादकस्य पूर्वकाण्डस्य प्रयो-

तिपादकस्य पूर्वकाण्डस्य समन्वयमाह । अवान्तरवाक्यानां प्रकारशेषत्वात् । नच सर्व-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

'**जैमिनिरि**'त्यारभ्य '**मूर्खा एवे**'त्यन्तेन। पूर्वपक्षस्यो'**त्तरवादिनोऽपी**'त्यारभ्य '**सूत्रेण सिद्ध**'-मित्यन्तेन सिद्धान्तस्य चासङ्गतत्वप्रदर्शनं भाष्ये ज्ञेयम् । यदुक्तमाम्नायस्य सर्वस्यैव पुरुषार्थत्वेन क्रियार्थत्वादक्रियार्थानां कर्मसमवायिपदार्थप्रकाशनद्वारेण प्रामाण्यस्य पूर्वतन्त्रे सिद्धत्वात्तन्न्यायेनाऽत्रापि वेदान्तानामप्यक्रियार्थानां प्रकरणान्तरोक्तक्रियासमवाय्यर्थप्रतिपादकत्वेन स्वप्रकरणोक्तोपासनार्थत्वेन वा पुरुषार्थपर्यवसायित्वेन प्रामाण्यस्य वक्तव्यत्वात्कथं ब्रह्मणः शास्त्रयोनित्वं सिद्ध्यतीत्युत्सूत्रं पूर्वपक्षरचनम् । तन्नोपपद्यते । यतो जैमिनिरथातो धर्मजिज्ञासेति धर्मजिज्ञासां प्रतिज्ञाय द्वितीयेन धर्मलक्षणमुक्त्वा तत्प्रतिपादके पूर्वकाण्डे तदतिरिक्तपदार्थनिरूपणस्य दृढत्वात्कथं तस्य सर्वांशेन तत्प्रति-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

तत्प्रतिपादकस्य धर्मप्रतिपादकस्य । समन्वयं धर्मे प्रतिपाद्यप्रतिपादकभावसम्बन्धम् । अवान्तरवाक्यानां ह्यर्थवादमन्त्रादिरूपाणाम् । '**प्रकारशेषत्वादि**'ति । धर्मप्रकाराङ्गत्वादित्यर्थः । तथा च धर्मे प्रकारीभूतं यत्कर्मस्तवनं, तत्प्रकाशकानामर्थवादवाक्यानामथ च धर्मे प्रकारीभूतं यद्रव्यदेवतादि, तत्प्रकाशकानां मन्त्रादीनां च धर्माङ्गत्वमेवेति सर्वस्य पूर्वकाण्डस्य धर्म एव समन्वय इति भावः । शङ्कते-'**नचे**'ति । नहीत्यर्थः ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

जनम् । तामेवाऽसङ्गतिं दर्शयन्ति-'**तथाही**'त्यादिना। '**पूर्वकाण्ड**'स्येति । अत्र धर्म इति शेषः। '**अवान्तरे**'ति । स्वप्रकरणगतानामक्रियार्थानामपि मन्त्रार्थवादादीनां प्रकारेतिकर्तव्यतातच्छेषत्वद्रव्यदेवतादिप्रकाशनद्वारा । अतः पूर्वस्य सर्वस्याऽपि धर्म एव सम्बन्धः। ननु **वायुर्वा** इत्याद्यर्थवादवत्कर्तृस्वरूपोपासनोपास्यप्रतिपादकतयोत्तरस्याऽपि धर्म एव समन्वय इति सर्वस्याऽप्याम्नायस्य क्रियापरत्वमक्षुण्णमेवेत्यत आहुः—'**न चे**'ति । अत्र यतस्तथा स्यादिति शेषः । अन्यथा वेदार्थजिज्ञासेत्येवमेवोक्तं स्यात् । तत्र हेतुमप्याहुः— '**यत**'इति । अन्यथा जिज्ञासान्तरं न वदेदित्याशयः ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

पादके पूर्वकाण्डे तदतिरिक्तनिरूपणस्य प्रतीयमानत्वात्सर्वांशेन धर्मप्रतिपादकत्वं न सम्भवतीति तदुपपत्तये स्वप्रकरणस्थानामेव सिद्धार्थप्रतिपादकानामवान्तरवाक्यानां प्रयोगविधिशेषत्वेन धर्मे समन्वयमुपपादितवान् । तदाहुः—'**अवान्तरवाक्यानामि**'त्यादि । अतः पूर्वकाण्डे धर्मप्रतिपादको यो न्यायः स प्रकरणान्तरेणाऽऽपादयितुं शक्यः । प्रकरणान्तरे धर्मेतरस्यैवाऽर्थस्य ब्रह्मणः प्रतिपादित-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

गविधिशेषतया सर्वेषां पूर्वकाण्डीयवाक्यानां कर्मणि समन्वयमाहेत्यर्थः। कथं प्रयोगविधिशेषतया सर्वेषां कर्मणि समन्वय इत्यत आहुः—**अवान्तरे**त्यादि । **अवान्तरवाक्यानां** मन्त्रार्थवादरूपवाक्यानामित्यर्थः । **प्रकारशेषत्वात्** यज्ञसाधकसाधनसमुदायमध्यपातादित्यर्थः । तथा च पूर्वकाण्डीयवाक्यानां धर्मे समन्वयप्रतिपादनेनैव धर्मजिज्ञासाया विषयसिद्धेर्दर्शनान्नाप्राकरणिकवेदान्तवाक्यानां सिद्धार्थप्रतिपादनोपक्षीणानां धर्मे समन्वयाकाङ्क्षागन्धोपीति भावः । नन्वाम्नायस्य क्रियार्थत्वा-

स्मिन् वेदे धर्म एव जिज्ञास्यः। तद्गुरुणैव व्यासेन ब्रह्मजिज्ञासायाः प्रतिज्ञातत्वात्। सन्देहमात्रवारकत्वाज्जिज्ञासयोः। न त्वलौकिकार्थसाधकत्वम्। तथा सति वेदानामन्याधीनत्वेनाऽप्रामाण्यं स्यात्। वेदजिज्ञासेत्येवोक्तं स्यात्। किञ्च—

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

पादकं सम्भवतीति तदुत्पत्त्यर्थं स्वप्रकरणस्थानामेव सिद्धार्थानामवान्तरवाक्यानां प्रयोगविधिशेषत्वेन समन्वयमुपपादितवान्। न चैतावता प्रकरणान्तरे तदापादनं वक्तुं शक्यम्। तत्र भिन्नस्यैवाऽर्थस्य प्रतिपादितत्वेन तन्न्यायस्याऽत्रापादयितुमशक्यत्वात्। ननूत्तरस्मिन्नपि स एवास्ति नार्थान्तरमित्याशंक्याहुः–'**न च सर्वस्मिन्नि**'ति। तत्र हेतुमाहुः–'**यत**' इति। जैमिनेः कदाचिद्भ्रमसम्भावनायामपि ततोऽप्यधिकतरविज्ञानस्य तदुपदेष्टुर्व्यासस्य तत्सम्भावयितुमशक्यम्। तथा च तेन सर्वज्ञेन भिन्नतयैव ब्रह्मजिज्ञासायाः प्रतिज्ञातत्वात्तेनैव गतार्थत्वे पृथक्तदुक्तिरनुपपन्ना स्यात्तस्मादत्राऽर्थान्तरमेवेति निश्चीयते।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

उत्तरयन्ति—'**तद्गुरुणे**'ति। यदि उत्तरकाण्डं धर्मप्रतिपादकं स्यात्तदा व्यासो ब्रह्मविचारप्रतिज्ञां न कुर्यादित्यर्थः। '**सन्देहे**'ति। मन्दमध्यमयोरित्यादि। '**जिज्ञासयो**'रिति। धर्मब्रह्मजिज्ञासयोरित्यर्थः। '**अलौकिकार्थे**'ति। धर्मब्रह्मप्रमितिसाधकत्वमित्यर्थः। '**तथा सती**'ति। धर्मे ब्रह्मणि च वेदस्य प्रामाण्ये मीमांसाधीने सतीत्यर्थः। ननु कर्मणामग्निहोत्रादिरूपाणां

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

नन्वेवं पूर्वोत्तरकाण्डयोरेव पार्थक्येन तदुभयप्रतिपादकत्वे जिज्ञासाद्वयवैयर्थ्यम्। यदि च पूर्वोत्तरमीमांसयोरेव धर्मब्रह्मरूपाऽऽलौकिकाऽर्थसाधकता तर्हि वैशेषिकादिवत्स्वतन्त्रतया वैदिकाऽनादरणीयत्वं स्यादित्यत आहुः—'**सन्देहे**'ति। नन्वेवं जिज्ञासासहकृतस्यैव वेदस्याऽलौकिकार्थसाधकत्वे प्रोक्षणावहननादिसंस्कारवदलौकिकार्थसाधकत्वं स्यादिति तन्निवृत्तये मात्रपदम्। तदेवाहुः—

श्रीलालूभट्टकृता गूढार्थदीपिका।

त्वात्। तदेवाऽऽहुः—**न च सर्वस्मिन्वेद** इत्यादिना। सर्वस्मिन्वेद उत्तरकाण्डेऽपि धर्म एव कुतो न जिज्ञास्य इत्याकाङ्क्षायामाहुः—'**तद्गुरुणैव व्यासेने**'त्यादि। यद्युत्तरकाण्डेऽपि धर्म एव जिज्ञास्यः स्यात्तदा सर्वज्ञो जैमिनिगुरुर्भगवान् व्यासो ब्रह्मजिज्ञासां न प्रतिजानीत। अतो ज्ञायते सर्वस्मिन्वेदे धर्मो न जिज्ञास्यः। किन्तु पूर्वकाण्डे धर्म उत्तरकाण्डे ब्रह्म जिज्ञास्यमित्यर्थभेदात् प्रकरणभेदात्पूर्वकाण्डव्यवस्था, नोत्तरकाण्डे नेतव्येति हार्दम्। ननु सर्वस्मिन्वेदे धर्म एव जिज्ञास्यः। मीमांसा तु संस्काररूपत्वाद्व्रीह्यादौ प्रोक्षणवदलौकिकार्थसाधिकेति पृथक्प्रतिज्ञापूर्विका कृतिरित्याशङ्क्य समादधते—**सन्देहमात्रवारकत्वाज्जिज्ञासयोर्नत्वलौकिकार्थसाधकत्वमिति**। दृष्टे सम्भव-

भगवदीश्रीमदिच्छारामप्रणीतः प्रदीपः।

त्सर्वस्मिन्नेव वेदे धर्मो विचारणीय इत्यत आहुः—**नचेत्यादि**। **सर्वस्मिन्** उत्तरकाण्डेपि। **धर्म एवे**त्येवकारेण ब्रह्मविचारनिरासः। **नचेत्यत्र** हेतुः—**तद्गुरुणेत्यादि**। तथा च शिष्यस्य कदाचिद्भ्रमोपि सम्भाव्येत नतु तादृशसर्वज्ञगुरोरिति तादृशेन व्यासेन ब्रह्मविचारप्रतिज्ञायाः पृथक्कृतत्वादुत्तरकाण्डस्य ब्रह्मण्येव समन्वयो नतु कर्मणि। उत्तरकाण्डस्यापि कर्मणि समन्वयाङ्गीकारे तु व्यासीयपृथग्जि-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

ननु जिज्ञासयोः संस्काररूपत्वेन व्रीह्यादौ प्रोक्षणादिवदलौकिकार्थसाधकत्वात्पार्थक्येन प्रतिज्ञेत्याशंक्य निराकुर्वन्ति—'**सन्देहमात्रे**'ति । जिज्ञासापदस्य विचारार्थकत्वेऽपि सामान्यरूपत्वेन सन्देहप्रयोजनसूचकत्वेन सन्देहमात्रवारकत्वं तस्य फलम् । तस्य शब्दशेषत्वेन फलान्तरासाधकत्वमिति ज्ञापनाय मात्रपदम् । दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वात् । विपक्षे बाधकमाहुः—'**तथा सती**'ति । अलौकिकार्थसाधकत्वे सति तत्संस्कृतस्यैव वेदस्य पुरुषार्थपर्यवसायित्वादनपेक्षत्वलक्षणं प्रामाण्यं व्याहन्येत । एकार्थप्रतिपादकत्वे दूषणान्तरमाहुः—'**वेदजिज्ञासे**'ति । जिज्ञासासंस्कृतस्यैव तस्य पुरुषार्थत्वात्प्रोक्षणादिवत्सकृत्कृतस्यैतत्साधनत्वाद्वेदजिज्ञासेत्येतावतैव

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

भिन्नत्वात्तत्तद्रूपक्रियापरत्वं वेदस्य कुतो नोच्यत इत्यत आहुः—'**वेदे**'ति । जैमिनेरिदं यद्यभिप्रेतं स्यात्तदेदृशं प्रतिज्ञावाक्यं ब्रूयादित्यर्थः । तथा च पूर्वकाण्डं धर्मपरमिति भावः । **नन्वाम्नायस्य क्रियार्थत्वादि**ति जैमिनिसूत्रे प्रवृत्तिरूपक्रियापरविधिवाक्यस्य वेदत्वमुक्तम् । मन्त्रार्थवादानामपि विधिशेषत्वम् । उत्तरकाण्डेऽपि धर्मरूपोपासनाविधिरस्ति । तच्छेषत्वं ब्रह्मप्रतिपादकानां वाक्यानाम् । एवं च सर्वोऽपि वेदः प्रवर्तनारूपक्रियापर इत्यत आहु—'**किञ्चे**'ति । सर्वस्याऽग्निहोत्रादिकर्मण

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

'**न त्वि**'ति । विपक्षे बाधकमाहुः—'**अन्यथे**'ति । अप्रामाण्यं सापेक्षत्वरूपं ज्ञेयम् । नापि सर्वस्मिन्नपि वेदे ब्रह्मार्थ इति व्यासाशयः । तथा सति वेदजिज्ञासेत्येव ब्रूयादिति हृदि कृत्वाऽऽहुः—'**वेदे**'ति । यद्यपि '**सर्वे वेदा यत्पदमामनन्ति, वेदैश्च सर्वैरहमेव वेद्य**'इतिश्रुत्या स्मृत्या तथा वक्तुं शक्यमेव तथापि पूर्वकाण्डे ब्रह्मण एव धर्मत्वेन प्रतिपाद्यता । न तु तत्त्वेनेति, न सर्वस्य ब्रह्मत्वेन ब्रह्मप्रतिपादकत्वम् । स्मृत्याशयस्तु धर्मो न वस्त्वन्तरं किन्तु मदात्मक एवेति । अतःपरं प्रकारान्तरेणाऽपि तयोर्द्वयोरप्यसङ्गत्वमुपपादयन्ति—'**किञ्चे**'त्यादि '**न कोपि दोष**'इत्यन्तेन । अत्र तन्मते पूर्वपक्षस्त्वित्थम्—

श्रीलालूभट्टकृता गूढार्थदीपिका ।

त्यदृष्टकल्पनाया अन्याय्यत्वात् । कुतो नालौकिकार्थसाधकत्वमित्याकाङ्क्षायामाहुः—'**तथा सती**'त्यादि । '**अन्याधीनत्वेने**'त्यादि । अन्याधीनत्वेनेति, मीमांसाधीनत्वेनेत्यर्थः । मीमांसाभ्यां संस्कृता एव वेदाः फलदातार इत्यङ्गीकारे वेदानामन्याधीनत्वापत्तावन्यनिरपेक्षं प्रामाण्यं न स्यादित्याशयः । मीमांसायाः संस्कारकत्वाङ्गीकारे दूषणान्तरमाहुः—'**वेदजिज्ञासेत्येवोक्तं स्यादि**'ति । संस्कारार्थं मीमांसाकृत्यंगीकार एकयैव मीमांसया चारितार्थ्ये । **अथातो वेदजिज्ञासे**त्येकामेव प्रतिज्ञां कुर्यादित्यर्थः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

ज्ञासाप्रतिज्ञाया वैयर्थ्यमेव भवेदिति भावः । ननु प्रोक्षणादिसंस्कारसंस्कृतव्रीहीणामिव जिज्ञासापदवाच्यविचारसंस्कृतानां वेदानामलौकिकार्थसाधकत्वमिति संस्कारार्थमेव वेदान्तानां व्यासजिज्ञासा जैमिनिजिज्ञासायाः पूर्वकाण्डसंस्कारार्थत्वादित्यत आहुः—**सन्देहमात्रे**ति । तथा च पूर्वोत्तरजिज्ञासाद्वयस्यापि वेदार्थसन्देहनिरसनमेव प्रयोजनं नतु वेदसंस्कारसम्पादनमपि । इदमेवाहुः—**नत्वि**त्यादिना । **अलौकिकार्थसाधकत्वं** वेदस्यालौकिकार्थसाधकत्वोपयोगिसंस्कारसम्पादकत्वमित्यर्थः । **तथा**

साधनं च फलं चैव सर्वस्याऽऽह श्रुतिः स्फुटम् ।
न प्रवर्तयितुं शक्ता तथा चेन्नरको न हि ॥

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

चारितार्थ्ये पार्थक्येन तद्वयकरणमनर्थकमेव भवेदित्यर्थः । यदुक्तं प्रवर्तनापराणामेव वाक्यानां पुरुषार्थत्वात्प्रमाकरणत्वाच्चाऽतत्पराणां तदेकवाक्यतया प्रामाण्यमिति तदसङ्गतमित्याहुः–'**किं चे**'ति । प्रवर्तकत्वे वाक्यानां तथा वक्तुं शक्यम् । नत्वेतदस्ति तदाहुः—'**साधनं च फलं चे**'ति । ब्रह्मवादाऽतिरिक्तेषु मतेषु शब्दश्रवणाऽनन्तरभाविन्यां प्रवृत्तौ शब्दस्य करणत्वमभ्युपगम्यते । काकतालीयतया पूर्वभावो न हेतुत्वसाधकः । ननु दृश्यते ममेष्टं ममेदं कार्यमिति ज्ञानानन्तरमेव प्रवृत्तिरिति तज्ज्ञानजनने वाक्यस्यैव हेतुत्वात्कथं न शब्दस्य प्रवर्तकत्वमित्यत आहुः–'**साधनं च फलं चे**'ति । **श्रुति**र्विधिवाक्यं, सर्वस्याऽपि स्वर्गादेर्योगादेश्च,

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ननु प्रवृत्तिनिवृत्तिप्रयोजनपरत्वाच्छास्त्रप्रमाणकमपि ब्रह्म **योऽपहतपाप्मा, सोन्वेष्टव्यः स विजिज्ञासितव्य आत्मावारे द्रष्टव्यः श्रोतव्य** इत्यादिप्रतिपत्तिविधिविषयतयैव समर्प्यते शास्त्रेण । **वायव्यं श्वेतमालभेते**त्यादिविधिशेषतयैव, **वायुर्वै क्षेपिष्ठे**त्याद्यर्थवादा अर्थवन्त एवं ज्ञानविधिशेषतयैव सर्वे वेदान्ताः '**सत्यं ज्ञानमनन्तं ब्रह्मे**'त्यादयोऽर्थवन्तो भवेयुः । इतरथा कर्तव्यविध्यननुप्रवेशे वस्तुमात्रकथने, हानोपादानासम्भवात्**सप्तद्वीपा वसुमती**तिवाक्यवदानर्थक्यं स्याद्वेदान्तानाम् । यथा स्वर्गादेः साधनमग्निहोत्राद्येवममृतत्वसाधनं ब्रह्मज्ञानमिति । **अत्र समाधिप्रकारस्त्वेवम्।** कर्मब्रह्मविद्याफलयोर्वैलक्षण्यान्नैवं वक्तुं शक्यम् । तथाहि–मनुष्यत्वादारभ्य ब्रह्मान्तेषु शरीरवाङ्मनोजन्यधर्माधर्मफले शरीरोद्ग्रहणपूर्वकं प्रियाप्रियरूपे विषयेन्द्रियसंयोगजन्ये श्रुतिस्मृतिन्यायसिद्धे एव । '**न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ती**'तिश्रुतेः । **अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत** इतिश्रुत्या प्रियाप्रियस्पर्शनप्रतिषेधान्मोक्षाख्यस्याऽशरीरत्वस्य न चोदनालक्षणधर्मकार्यत्वं वक्तुं शक्यम् । न चाशरीरत्वमेव धर्मकार्यम् । तस्य स्वाभाविकत्वात् । **अशरीरं शरीरेष्वनवस्थेष्ववस्थित**मितिश्रुतेः । अन्यच्च यदि कर्तव्यशेषत्वेनोपदि-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

सति वेदानां संस्काराधीनतया लौकिकार्थबोधकत्वाङ्गीकारे सति । **अन्याधीनत्वेन** संस्काराधीनप्रमाजनकत्वेन । **अप्रामाण्य**मितरानधीनप्रमापकत्वरूपानधिगतार्थगन्तृत्वरूपं प्रामाण्यं वेदानां न स्यादिति भावः । जिज्ञासाद्वयस्यापि संस्कारार्थत्वे दूषणमाहुः—'**वेदे**'त्यादिना । तथा च व्रीह्यादिषु सकृत्संस्कारस्य यथा लौकिकार्थसिद्ध्युपयोगित्वं तथाथातो वेदजिज्ञासेत्येकजिज्ञासयैव पूर्वोत्तरकाण्डयोरलौकिकार्थसाधनोपयोगिसंस्कारसम्भवेन जिज्ञासाद्वयकृतेर्वैयर्थ्यादिति भावः । अथ प्रवर्तकविधिवाक्यानामेव प्रवर्तकत्वं पुरुषार्थोपयोगित्वं प्रमापकत्वं च तदितरवाक्यानां च तदेकवाक्यतयोक्तार्थेषूपयोगित्वमिति सिद्धान्तात्कथं सिद्धार्थप्रतिपादकवेदान्तवाक्यानां स्वातन्त्र्येण प्रामाण्यमित्येतद्दूषयन्ति—'**किञ्चे**'त्यादिना । **साधनं** चेत्यादि । **सर्वस्य** पूर्वकाण्डे कर्मण उत्तरकाण्डे ज्ञानस्येत्यर्थः । तथा चेष्टसाधनताधीसाध्या प्रवृत्तिः फलं च सर्वत्रैवोपपन्नं न कोपि विधेर्विशेष इत्यर्थः । ननु विधेः प्रवर्त-

१ शक्येत्यपिपाठः

प्रवर्तकस्तु सर्वत्र सर्वात्मा हरिरेव हि ।
यज्ञ एव हि पूर्वत्र बोध्यते स्वर्गसिद्धये ॥

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

साधनं यागादिः, फलं स्वर्गादिरिति बोधयति, न तु प्रवर्तयति । तथा सत्यनिष्टसाधने विषभक्षणे युद्धे द्रुपतने पाषण्डमते, मिथ्यात्वेनाऽसाध्येऽपि मोक्षे च प्रवृत्तिर्न स्यात् । प्रवर्तकत्वे दूषणान्तरमाहुः—'**तथा चेदि**'ति । प्रवर्तकत्वे शब्दस्य सर्वानिष्टसाधनेऽविशेषेण प्रवर्तयेदिति न कस्याऽपि नरको भवेत् । अतो दृष्टादृष्टारिष्टदर्शनान्न प्रवर्तकत्वं शब्दस्य । ननु तर्हि कस्य प्रवर्तकत्वं तत्राहुः—'**प्रवर्तकस्तु सर्वत्रे**'ति । ननु भगवत्प्रवर्तनायां भगवतो वैषम्यनैर्घृण्यादिदोषप्रसक्तिः । न हि परमकृपालुर्भगवांस्तथा करोतीति तथा न वक्तुं शक्यमित्यत आहुः—'**सर्वात्मे**'ति । **ऐतदात्म्यमिदं सर्वं स आत्मे**त्यादिभिर्भगवतः सर्वरूपत्वाद्यथासुखं सर्वप्रेरणेऽपि न वैषम्यादिप्रसक्तिः । ननु तर्हि भगवान्स्वात्मानमपि कथमेवं प्रेरयति । समतयापि प्रेरणे समर्थस्तत्राहुः—'**हरिरि**'ति । सर्वासु योनिषु सर्वेषु जीवेषु सुखदुःखयोः समता । पुरुषः स्वभ्रमादेव तारतम्यं पश्यति । अन्यथा ततो विचिकित्सैव भवेत् । तथा च राज्यान्ते नरकं ध्रुवमित्यादीनि कथं सङ्गतानि भवेयुः । राजदण्डादेरप्यविषयत्वाऽऽपत्तिश्च । फलस्य स्वरूपस्य च सर्वत्र समत्वेऽखण्डं **कृष्णवत्सर्वमि**त्याद्युपपत्तिर्हिशब्देन द्योत्यते ।

ननु भगवत एव प्रवर्तकत्वेऽर्थवादादीनां वैयर्थ्यमेव भवेदित्यत आहुः—'**यज्ञ एव ही**'ति ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

एव । '**नरके**'ति । वेदे प्रवर्तकनिवर्तकवाक्यश्रवणानन्तरं शुभकर्मण्येव प्रवृत्त्या नरको न स्यादित्यर्थः । **सर्वत्र** काण्डद्वये । '**सर्वात्मे**'ति । **एष त आत्माऽन्तर्यामी**तिश्रुत्या, सर्वान्तर्यामी **एष एव साधु कर्म कारयती**तिश्रुत्या, प्रवर्तको हरिरित्यर्थः । '**यज्ञ एवे**'ति । सिद्धाव-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

श्येत, तेन च कर्तव्येन साध्यश्चेन्मोक्षोभ्युपगम्येत तदा मोक्षस्याऽनित्यताऽऽपत्तिर्धर्मजन्यस्वर्गादिवदेव स्यात् । नित्यश्च मोक्ष इति श्रुतिसिद्धम् । अतोऽनुष्ठेयफलविलक्षणं ब्रह्मविद्याफलं मोक्षाख्यं नित्यसिद्धमेवेति सिद्धम् । तस्मान्न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्त इति । तत्र पूर्वपक्षस्यैवाऽयुक्तत्वेनाऽसङ्गतत्वात्तदुत्तरस्य त्वसङ्गतत्वं सुतरां भवतीतिपूर्वपक्षस्यैवाऽयुक्ततयाऽसङ्गतत्वं प्रदर्शयन्ति-'**साधनं चेति**'। '**सर्वस्ये**'ति । साधनस्य फलस्य चेत्यर्थः । तथाच सर्वस्य फलस्य पशुपुत्रादिमोक्षान्तस्य साधनं यागज्ञानादिकमाह । सर्वस्य साधनस्य यागज्ञानादेः फलं स्वर्गादिमोक्षं चाऽऽहेति संबन्धः । अथवा सर्वस्य फलस्य कामितस्य पूर्वोक्तस्यैव साधनं पूर्वोक्तमाहेति । फलं त्वनूद्योद्देश्यतयैवाऽऽहेत्यर्थः । **श्रुतिरग्निहोत्रं जुहुयात्स्वर्गकामो, ब्रह्मविदाप्नोति परमि**त्यादिः ।

ननु शब्दश्रवणानन्तरमेव प्रवृत्तिदर्शनात्कथं न श्रुतेः प्रवर्तकत्वमित्यत आहुः—'**तथा चेदि**'ति । प्रवर्तकत्वे । हिर्हेतौ । स्यादितिशेषः । ननु श्रुतिमन्तरा कोऽवापरः प्रवर्तक इत्यत आहुः—'**प्रवर्त**-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

कत्वमेव विशेष इत्यत आहुः—**न प्रवर्तयितुमिति** । **तथा चेत्** 'न निषिद्धमाचरे'दित्यादिविधीनां प्रवर्तकत्वे । ननु विधेरप्रवर्तकत्वे कः प्रवर्तक इत्यत आहुः—**प्रवर्तकस्त्वि**त्यादि । ननु हरेः प्रवर्तकत्वे

सिद्ध एव हि सर्वत्र वेदार्थो वेदवादिनाम् ।
मन्त्राणां कर्मणां चैव दर्शनश्रवणाच्छ्रुतौ ॥

गोस्वामिश्रीमन्मुरलीधरविरचिता अणुभाष्यव्याख्या ।

पूर्वतन्त्रे स्वर्गसाधनत्वेन यज्ञ एव बोध्यते । स च **यज्ञो वै विष्णुरि**ति श्रुतेर्भगवद्रूप इति तद्बोधकस्याऽपि सिद्धार्थबोधकत्वमस्तीति का कथाऽर्थवादानां सिद्धार्थबोधकत्वे । नह्यर्थवादानां रोचनार्थत्वेन तत्प्रवर्तकत्वम् । तथा सत्यनाप्तत्वं स्यात् । ननु सिद्धवस्तुप्रतिपादने निष्प्रयोजनत्वमेव भवेदिति चेत् । न । कर्मसमवायिपदार्थयाथात्म्यज्ञानजननेन सप्रयोजनत्वात् । स्वरूपज्ञानपूर्वकमेव कृतस्य कर्मणः फलसाधकत्वात् । अत एव **वायुर्वै क्षेपिष्ठे**त्यादिना क्षिप्रकारित्वविशिष्टज्ञानपूर्वकं **वषट्कारो विधेय** इत्युक्तं भवति । तथा **वषट्कारो वै गायत्रियै शिरोच्छिनत्तस्यै रसः परापतत्स पृथिवीं प्राविशत्स खदिरोऽभवदि**त्यादिना खदिरस्वरूपं तादृशमेव ज्ञात्वा यूपे पशुबन्धनं फलाय नाऽन्यथेति स्वरूपमात्रप्रतिपादकत्वेऽपि न निष्प्रयोजनत्वमिति भावः । तावतैव प्रवर्तकत्वाभ्युपगमे बाढमिति ब्रूमः ।

ननु **न कलञ्जं भक्षये**दित्यादौ लिङा भक्षणस्येष्टसाधनत्वाऽबोधनान्न नरकादेरनुपपत्तिः । निषेधस्य प्राप्तिपूर्वकत्वादिति चेत् । न । तस्य रागत एव प्राप्तत्वेन लिङाद्यर्थत्वाऽभावात् । ननु यागो नाम देवतोद्देशेन द्रव्यत्यागात्मिका मानसी क्रिया । तथा च कथं तस्य भगवद्रूपत्वमित्यत आहुः— '**सिद्ध एव ही**'ति । कैव कथा यज्ञस्य वेदवादिनां वेदाभिज्ञानां वेदार्थः सर्वोऽपि सिद्ध एवाऽस्ति । सर्वस्य भगवद्रूपत्वात् । ननु प्रत्यक्षतः कृतिसाध्ये कर्मणि कथं सिद्धत्वमित्याशङ्क्य तत्र विनिगमकमाहुः—**मन्त्राणामि**ति । श्रुतौ तत्तदुपाख्यानेषु ऋषीणां मन्त्राणां वैदिकानां कर्मणां च

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

कस्त्वि'ति । '**सर्वत्रे**'ति विहितनिषिद्धयोः । नन्वेवं वैषम्यनैर्घृण्ये स्यातां भगवति । तत्राहुः— '**सर्वात्मे**'ति । अत्रोपपादयन्ति—वैषम्यनैर्घृण्येनेति सूत्रे । नन्वेवं विधिवाक्यवैयर्थ्यं तत्राहुः— '**यज्ञ एवे**'ति । स्वर्गादिकामनायां यज्ञादिरेवानुष्ठेयस्तत्साधनत्वेनेति बोध्यम् । न तु यागादौ प्रवृत्तिर्वाक्येन सम्पाद्यते । तथा च यागादौ भगवदिच्छाविषयत्वेष्टसाधनत्वबोधनार्थमेव वेदे प्रवृत्तेर्न वेदवैयर्थ्यमिति भावः । इदानीं प्रसङ्गात् पूर्वकाण्डार्थयागादिकर्मणां ब्रह्मात्मकतया नित्यत्वं वदन्तो वेदस्य साध्यार्थपरतां दूषयन्ति—'**सिद्ध एवे**'त्यादिना । **सर्वत्र** पूर्वोत्तरकाण्डयोर्वेदार्थे कर्मज्ञाने । **वेदवादिनां** वेदैकनिष्ठानाम् । तत्र हेतुमाहुः—'**मन्त्राणामि**'ति । कृतिश्चेति चकारः सिद्धतुल्यत्वमित्य-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

वैषम्यनैर्घृण्ये स्यातामत आहुः—**सर्वात्मेति** । **पूर्वत्र** पूर्वकाण्डे । **सिद्ध एवेति** । तथा च 'यज्ञो वै विष्णु'रितिश्रुतेर्यज्ञस्यैव सिद्धत्वम् । का कथेतरेषाम् ? नन्वेवं चेदर्थवादानां प्राशस्त्यज्ञानसम्पादनद्वारा प्रवर्तकत्वव्याघात इति चेत् । न । अर्थवादैः सिद्धार्थैर्यादृशं यस्य स्वरूपमुक्तं तादृक् तत्स्वरूपज्ञानपूर्वककर्मकरण एव फलं नान्यथेति स्वरूपबोधन एवार्थवादानामुपयोगात् । यथा 'वषट्कारो वै गायत्रियै शिरोच्छिनत्तस्यै रसः परापतत् स पृथिवीं प्राविशत् स खदिरो भवदि'त्याद्युक्तखदिरस्वरूपज्ञानपूर्वकं यूपनिर्माणेन पशुनियोजनाद्यनुष्ठान एव यज्ञात् फलमित्येवं नियमात् । सिद्धत्वमेवोपपादयन्ति—'**मन्त्राणा**'मित्यादिना । मन्त्राणां दर्शनं 'स एतं कसर्णीरः काद्रवेयो मन्त्रमपश्यत्, एतं दीक्षितवादमपश्यत्'इत्यादौ बोध्यम् । तथा

कृतिश्च सिद्धतुल्यत्वं वेदः स्वार्थे च सन्मतः ॥

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

सर्वत्र दर्शनं श्रूयते । यदि तेषां सिद्धत्वं न स्यात्तदा दर्शनस्य श्रवणं कथमुपपद्येत । तस्मात्साध्यत्वेन प्रतीतावपि न कश्चिद्विरोध इति भावः । ननु तस्य सिद्धत्वे कथं तिङादिभिः कृतिप्रतीतिरत आहुः—'**कृतिश्चे**'ति । यागस्य भगवद्रूपत्वात्सिद्धत्वेऽपि ध्यानादिभिर्भगवन्मूर्तेराविर्भाववदाधानादिक्रियाभिस्तदाविर्भावात्सिद्धस्य घटादेस्तुल्यत्वं कृत्वा ज्ञाप्यते । यत्किञ्चिद्भेदसत्त्व एव तुल्यत्वस्य वक्तव्यत्वात् । निर्गलितमर्थमाहुः—'**वेद**'इति । सर्वोऽपि **वेदो** विध्यर्थवादादिरूपः । स्वार्थ एव वाचकत्वेन। **सतां** दैत्यावेशरहितानां **मतः** सम्मत इत्यर्थः । कर्मणां ऋषिकर्तृकदर्शनप्रतिपादकान्युपाख्यानानि

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

स्थापन्नानामर्थो यज्ञरूपो विष्णुरेव पूर्वकाण्डे बोध्यत इत्यर्थः । सिद्ध एवेत्येवकारेण यजेतेति तिङन्तार्थभावनारूपक्रियाव्यवच्छेदः । '**मन्त्राणामि**'ति । **स एतं सकर्णीरः काद्रवेयो मन्त्रमपश्यदि**ति श्रुतौ मन्त्राणां **अपश्यन्पुरोडाशं कर्मभूतं सं पतमि**ति श्रुतौ द्रव्याणां दर्शनश्रवणादित्यर्थः । '**कृतिश्चे**'ति । भावनापरपर्याया विधिबोध्याकृतिरित्यर्थः ।

ननु सर्वस्य सिद्धार्थत्वे यज्ञप्रवृत्तिरूपफलबोधकवाक्यानां लिङादिघटितानां निरर्थकत्वमत आहुः—'**सिद्धतुल्यत्वमि**'ति । सिद्धितुल्यत्वमित्यपपाठः । **यजेत स्वर्गकाम** इत्यादिवाक्यानां लिङ्बोध्यकृतेरपि यज्ञरूपसिद्धवदर्थसम्पादकत्वेन क्रीडेच्छाव्यापारत्वेन च सार्थकत्वमिति भावः । इदं च सर्वं **कृतप्रयत्नापेक्षस्त्वि**ति सूत्रे वक्ष्यते । **वेदः** वाक्यरूपो वेदः । **स्वार्थे** शक्त्या लक्षणया वा तत्तद्रूपार्थे । **सम्मतः** प्रमाणीभूतः । सन्मत इत्यपिपाठः । चकारेणार्थवाक्यानां लक्ष-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

स्याग्रेऽन्वेति । '**सिद्धतुल्यत्वमि**'ति । अत्र श्रूयत इति शेषः । तथा च यागविषयिणी कृतिः सिद्धतुल्यत्वञ्चोभयमपि श्रूयत इत्यर्थः । ननु सिद्धत्वे कर्मणां **जुहुयात्स्वर्गकामो ज्योतिष्टोमेन स्वर्गकामो यजेते**त्यादिकृतिश्रवणं विरुध्येतेत्यत आहुः—'**श्रुतौ कृतिश्चेत्यादि**' । होमयागादिविषयणी कृतिर्होमादीनां, सिद्धस्य घटादेस्तुल्यत्वम् । ज्ञापयतीत्यत्र शेषः । तथा च ब्रह्मात्मकत्वेन सिद्धस्याऽपि घटादेर्यथा कर्तृकरणव्यापारेणैवाऽऽविर्भावो यथा वा सिद्धस्यैव भगवद्रूपस्याऽपि ध्यानादिभिरभिव्यक्तिस्तद्वदाधानादिक्रियादिभिरेव भगवद्रूपस्य यागहोमादेरप्याविर्भाव इति । **कृतिः** कृतिबोधकं

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

च प्रजापतेरग्निहोत्रादिकर्मणां मन्त्राणां च श्रुतौ दर्शनं श्रूयते निरूप्यं चाग्रेऽतः सिद्धत्वमुक्तमन्यथा प्रजापतेर्दर्शनोक्तिरनुपपन्नैव स्यादिति भावः। ननु यज्ञादिकर्मणां सिद्धत्वे विधिवाक्यैर्यज्ञादौ प्रवृत्तिरनुपपन्ना स्यादत आहुः—**कृतिश्चे**ति । तथा च यथा ध्यानादिक्रियया भगवत्प्राकट्यं तथाधानादिक्रियया यज्ञात्मनो भगवतः प्राकट्यमिति न क्रियागोचरकृतिवैयर्थ्यमिति भावः। **सिद्धतुल्यत्वं** सिद्धघटादितुल्यत्वं, यज्ञस्य कृतिः सम्पादयतीत्यर्थः । निर्गलितसिद्धान्तमाहुः—**वेद** इति । **स्वार्थे** वेदघटकतत्तत्पदवाच्येर्थे । **सन्मतः** सतां दैत्यावेशरहितानां **मतः** प्रमाणत्वेन सम्मत इत्यर्थः । कर्मणां

१ सम्मत इत्यपि पाठः ।

'प्रजापतिरकामयत प्रजायेयेति' 'स एतदग्निहोत्रं मिथुनमपश्यत्' 'प्रजापतिर्यज्ञानसृजताग्निहोत्रञ्चाग्निष्टोमं च पौर्णमासीं चोक्थ्यञ्चामावास्याञ्चातिरात्रञ्च तानुदमिमीत यावदग्निहोत्रमासीत्तावानग्निष्टोम' इत्यादि । न ह्युपाख्यानानां मिथ्यार्थत्वं बुद्धजन्मनः पुरोक्तं युक्तं वा । तथा सति वेदानामप्रामाण्यमेव स्यात्, मिथ्योपाख्यानप्रतिपादकलोकवत्। तस्मात् पूर्वमीमांसानभिज्ञाः क्रियापरत्वं सर्वस्यापि वेदस्य वदन्तो मूर्खा एव ।

गोस्वामिश्रीमुरलीविरचिता अणुभाष्यव्याख्या ।

दर्शयन्ति—'**प्रजापतिरकामयत**' इत्यारभ्य '**तावानग्निष्टोम**' इत्यन्तम् । ननु विरुद्धार्थप्रतिपादकानां तेषां मिथ्यात्वमेवास्त्वित्यत आहुः—'**नही**'ति । वेदो हि भगवद्रूपस्तस्य मिथ्यात्वं को वा वदेत् । ननु भगवतैवोक्तं नवमावतारेणेति चेत् । न भगवान्हि सर्वकर्ता । भोक्ता च । तथा चाऽऽसुरव्यामोहनमपि तत्कार्यमेव । **एकं भगवतः कार्यमि**तिन्यायात् । नहि तथोक्तौ भगवतः किञ्चिद्बाधकमस्ति । अभोक्तृत्वात् । तथा च बुद्धजन्मतो नवमावतारप्रादुर्भावात्पुरा केनापि वेदेऽक्षरमात्रस्याऽपि मिथ्यात्वं नोक्तमिति न मिथ्यात्वमस्तीति वक्तव्यम् । ननु यद्यदाचरतीतिन्यायात्तदुक्तौ किं बाधकमिति चेन्नेत्याहुः—'**युक्तं वे**'ति । भगवतः सर्वसमर्थत्वेन सर्वकर्तृत्वेन च तथाकृतौ न किञ्चिद्बाधकम् ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

णया प्राशस्त्यार्थे प्रमाणीभूतत्वं वेदस्य बोध्यम् । तेन च पूर्वकाण्डे यज्ञे ब्रह्मणि तात्पर्यात् सिद्ध एव हि सर्वत्र वेदार्थ इति सिद्धम् । यस्यां श्रुतौ दर्शनश्रवणं तादृशश्रुतिमाहुः—'**प्रजापति**'रिति । '**अपश्यदि**'ति । सिद्धस्यैव दर्शनं द्वितीयश्रुतौ । '**उदमिमीत**'ति । कर्मणः सिद्धत्व एवोन्मानसम्भव इति बोध्यम् ।

पूर्ववदुपाख्यानस्य मिथ्यात्वं खण्डयन्ति—'**नही**'ति । बुद्धजन्मनः बौद्धावतारस्य । सम्मतमिति शेषः । पुरोक्तं पुराणेष्वसुरव्यामोहार्थं कृतमित्युक्तम् । '**युक्तं वे**'ति । नहीति पूर्वेणान्वयः । सिद्धार्थे

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

वाक्यं ज्ञापयतीति वार्थो ज्ञेयः । नन्वेवं प्रत्यक्षविरोधाद्वेदार्थो लक्षणयान्यथा ज्ञेय इत्यत आहुः—'**वेद**'इति । स्वार्थो मुख्यवृत्त्या प्रतिपाद्योऽर्थः । कर्मणां दर्शनप्रतिपादकानि वाक्यानि प्रदर्शयन्ति—'**प्रजापतिरि**'त्यादि । ननु दर्शनमात्रेण कर्मणां न सिद्धत्वं सिध्यतीत्यत आहुः—'**प्रजापतिर्यज्ञानि**'ति । सिद्धस्यैव वस्तुनो मानकरणसम्भवात् । ननूपाख्यानानां सत्यार्थकत्वे वेदार्थस्य सिद्धरूपत्वं सिध्येत्तदेव तु नास्तीति कथं तथेत्याशङ्क्याऽऽहुः—'**न ही**'ति । विपक्षे बाधकमाहुः—'**तथा सती**'ति।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

दर्शनप्रतिपादकान्याख्यानानि प्रदर्शयन्ति—'**प्रजापति**'रित्यादिना । ननु सिद्धार्थप्रतिपादकतया पूर्वकाण्डार्थविरुद्धतयोपाख्यानानां मिथ्यार्थप्रतिपादकत्वेन मिथ्यार्थत्वमेवास्तामतो न वेदस्य सिद्धार्थत्वसिद्धिरत—आहुः—'**नही**'त्यादि। ननु बुद्धावतारेण भगवतैव वेदार्थस्य मिथ्यात्वमुक्तमत आहुः—**बुद्धे**त्यादि । **पुरोक्तं** भगवदतिरिक्तेन केनापि पूर्वं वेदार्थमिथ्यात्वं नोक्तमिति भावः । ननु 'यद्यदाचरति श्रेष्ठ' इतिवाक्यादस्माभिरपि तथोच्यते इत्यत आहुः—**युक्तं वेति** । तथा च शिवे गरलस्य ग्रीवाभूषणत्ववदासुरव्यामोहाय भगवतस्तथावचनमपि भूषणमेव पुण्यपापफलभोक्तृत्वाभावात् । जीवानां तु तथाचरण उभयलोकनाश एव स्यादिति भावः । **तथा सति** एकांशेपि वेदानां मिथ्या-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

स्मरारातेर्गरलग्रैवेयकत्ववत् । नह्येतावता जीवस्य तद्युक्तमिति । सर्वनाशजनकत्वात् । नन्वेकत्र विरुद्धांशस्य दृष्टत्वेन तत्र तथोक्तौ न किञ्चिद्बाधकमित्यत आहुः–'**तथा सती**'ति । एकत्राऽनाप्तत्वेऽन्यत्र को वा निवारयेत् । तत्र दृष्टांतमाहुः–'**मिथ्योपाख्याने**'ति । उपसंहरति–'**तस्मादि**'ति । जैमिनिर्हि कर्मतत्त्वज्ञो व्यासशिष्यः कथमपि न तद्विरुद्धं वक्तुमर्हति । परन्त्वाधुनिकाः पूर्वमीमांसाया जैमिनिकृतायास्तात्पर्याऽनभिज्ञाः सन्तः क्रियापरत्वं साक्षात्परम्परया वा सर्वस्य विध्यर्थवादमन्त्रादिरूपस्य वेदस्य वदन्तो बुद्धिहीना एव । सर्वस्यापि वेदस्य तत्तत्स्वरूपमात्रप्रतिपादकत्वात् । तथा

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

उपसंहारमाहुः–'**तस्मादि**'ति । अयं भावः । क्रिया द्विविधा सिद्धा साध्या च । तत्र नामवाच्या पुरुषाऽनपेक्षा सिद्धावस्थापन्ना क्रिया । यथा पाकपदवाच्या । तिङन्तवाच्या पुरुषापेक्षा क्रिया साध्यावस्थापन्ना । यथा पचतीतिपदवाच्या । उक्तं च वैयाकरणभूषणे—**साध्यत्वेन क्रिया यत्र धातुरूपनिबन्धना । सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः** । लक्षणमपि तत्रैवोक्तम् । क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकत्वं सिद्धत्वम् । क्रियान्तराकाङ्क्षोत्थापकतानवच्छेदकत्वं साध्यत्वम् । एवं च प्रकृते सर्वस्य पूर्वकाण्डस्य सिद्ध एव यज्ञरूपोर्थः । सिद्धस्यैव दर्शनं श्रुतौ प्रतिपादित्वात् । मन्त्राणां कर्मणां च तदङ्गत्वमर्थवादवाक्यानामपि स्तावकत्वेन तदङ्गत्वम् । तथा च पूर्वकाण्डं यज्ञपरमुत्तरकाण्डं च ब्रह्मपरमितिरीत्या पूर्वपक्षाऽसङ्गतिर्बोध्या । पूर्वपक्ष्याशयस्तु सर्वस्य वेदस्य लिङर्थप्रेरणापरत्वं प्रेरकत्वं चेति । उभयत्रापि यजेत आत्मेत्येवोपासीतेति लिङ्घटितवाक्यश्रवणात् । अर्थवादमन्त्रादिवाक्यानां विध्येकवाक्यतया प्रामाण्यम् । एवं च यज्ञ उपासनायां च प्रवृत्तिरूपक्रियाया एव मुख्यतया प्रतिपादकत्वं सर्वस्य, न तु ब्रह्मप्रतिपादकत्वमिति ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

तत्र दृष्टान्तः–'**मिथ्ये**'ति । उपसंहरन्ति–'**तस्मादि**'ति । यस्माद्धर्मस्यैव जिज्ञास्यतया, तत्प्रतिपादकपूर्वकाण्डसमन्वयस्य सिद्धरूपस्यैव धर्मस्य च जैमिनेरभिप्रेतत्वम् । तस्मात्स्वाचार्यसिद्धान्तविरुद्धवादित्वेन तत्तात्पर्याऽनभिज्ञास्तथा वदन्तस्तथाभूता एव । एतेन पूर्वपक्षाऽसङ्गतिः प्रदर्शिता भवति ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

एतावता क्रियार्थानामेव पुमर्थपर्यवसायित्वेन स्वार्थे प्रामाण्यमक्रियार्थानां विधिशेषतया प्रामाण्यमित्यादिव्यवस्था पूर्वकाण्ड एव नोत्तरकाण्ड इति शास्त्रयोनित्वपूर्वपक्षोऽसङ्गत इत्यर्थः । यदुक्तं प्रवर्तकानामेव वाक्यानां पुमर्थपर्यवसायित्वात्[1] । '**नचैवं किमनेने**'त्यादिना । 'अनेन कर्मणा किमुत्कृष्टत्वं ज्ञानिनो,

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

र्थत्वे वक्तव्ये सति । **वेदानां** वेदत्वावच्छेदेन वेदानां । **लोकवत्** कदाचिन्मिथ्यावक्तृत्वेन लोकैः प्रतीतः कश्चित्सर्वदा मिथ्यावाद्येवायमिति तदुक्तौ न कोपि प्रामाण्यमुरीकरोति तथा भगवदुक्तवेदेप्येकत्राप्रामाण्यनिश्चये सर्वत्रैव तथा स्यादित्यर्थः । सिद्धान्तमुपसंहरन्ति–'**तस्मादि**'त्यादिना । **पूर्वमीमांसानभिज्ञाः** व्यासशिष्यतत्त्वविज्जैमिनितात्पर्यानभिज्ञाः । **क्रियापरत्वं** कर्मविधायकवाक्यैर्यथाकथञ्चिदेकवाक्यतया सर्वस्य वेदस्य प्रामाण्यम् ।

१—इतःप्रभृति पत्रद्वयात्मको भागस्त्रुटितः । पुस्तकं चैकमेव मिलितम् । तच्च भट्टश्रीबलभद्रशर्मणां सम्प्रदाये निरतिशयप्रीतिभाजाम् । अन्यैस्तु सम्प्रदायनामधारिभिरपि शोधनकर्मणि पुस्तकदानमात्रेणाऽपि नोपकृतम् । हन्त ! ! !

उत्तरवादिनोपि पूर्वाज्ञानमङ्गीकृत्य पूर्वानुपयोगित्वं ब्रह्मज्ञानस्य वदन्तो वेदानभिज्ञाः । 'यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवती'तित्युपनिषज्ज्ञानस्य श्रुतिसिद्धैव कारणता । नच बाधितत्वात् त्यज्यत इति वाच्यम् । ब्रह्मात्मज्ञानवत एव

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

च तन्न्यायेन वेदान्तानामपि क्रियापरत्वं समर्थ्य ब्रह्मणः शास्त्रप्रमाणकत्वं कथं वक्तुं शक्यमिति पूर्वपक्षोऽप्यसङ्गत एवेत्यर्थः । अधुना सिद्धान्तस्याप्यसङ्गतत्वं प्रतिपादयन्ति—'**उत्तरवादिनोपी**'ति । उत्तरस्मिन्ब्रह्मकाण्डे ये वादिनो वादमात्रकर्तारो नतु तत्तात्पर्याभिज्ञास्तेऽपि ब्रह्मज्ञानस्य पूर्वस्मिन्कर्मण्यनुपयोगित्वं वदन्ति । ज्ञानदशायां द्वैतविज्ञानस्योन्मथितत्वेन सकलक्रियाकारकावकाशस्य वक्तुमशक्यत्वात् । ते हि न केवलमुत्तरतात्पर्याऽनभिज्ञाः, किन्तु सर्वस्यापि वेदस्याऽनभिज्ञा इत्यर्थः । तत्र हेतुमाहुः—'**यदेवे**'ति । तथाच नास्ति वचनस्याऽतिभार इति कथं तन्नेति वक्तुं शक्यमिति भावः । ननूक्तमेकत्वविज्ञानेन द्वैतविज्ञानोन्मथनात्कथं क्रियाकारकावकाश इत्यत आहुः—'**नचे**'ति ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

प्रकृतमनुसरामः—एतादृशपूर्वपक्ष्याशयं स्वीकृत्यैव यैः सिद्धान्तितं तदसङ्गतिमाहुः—'**उत्तरे**'ति। '**पूर्वानुपयोगित्वमि**'ति । यज्ञानुपयोगित्वमित्यर्थः । '**ब्रह्मज्ञानस्य वदन्त**' इति । वेदान्तभागस्य धर्मप्रतिपादकत्वमस्तु वा मा वा, परन्तु ततः शुद्धबुद्धमुक्तस्वभावब्रह्मात्मावगतौ सत्यामविद्याजनितक्लेशनिवृत्तौ तस्य सार्थक्यमिति वदन्त इत्यर्थः । छान्दोग्यश्रुत्युपपादनेन वेदानभिज्ञत्वं साधयन्ति—'**यदेवे**'त्यादि '**प्रवृत्तिरि**'त्यन्तम् । **कारणता** सहकारिकारणता । उपनिषदर्थज्ञानेनाविद्यानिवृत्तौ यज्ञे प्रवृत्त्यभावात्सहकारिकारणताया बाध इत्याशयेनाऽऽशङ्कते—'**न चे**'ति। उत्तरयन्ति-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

इदानीं स्वतत्कृतसिद्धान्ताऽसङ्गतिं प्रदर्शयन्ति—'**उत्तरवादिन**' इति । उत्तरमीमांसायां वादकर्तारः । '**पूर्वाज्ञानमि**'ति। **पूर्वस्मिन्** कर्माधिकारे । **अज्ञानं** ज्ञानाभावम् । अत्र हेतुत्वेनेति शेषः । '**पूर्वे**'ति । पूर्वस्मिन् कर्मणि । '**वेदे**'ति । पूर्वोत्तरकाण्डयोस्तात्पर्याज्ञानात्तथेत्यर्थः । अत्र हेतुमाहुः—'**यदेवे**'ति । '**सिद्धैवे**'ति । एवकारेण ज्ञानस्य कर्मण्यपि हेतुत्वाऽङ्गीकारेऽन्योन्याश्रयप्रसक्तिभियाऽकारणत्वक-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

न किमपीत्यर्थः । समाधिमाहुः—**इत्थंभूतत्वाद्यज्ञस्येति** । **यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवती**ति श्रुतेर्ज्ञात्वाज्ञात्वा **च कर्माणि जनोऽयमनुतिष्ठति । विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेदि**ति श्रीभागवतवाक्याच्च वीर्यवत्तरत्वादिरूपोत्कृष्टत्वं ज्ञानसहितकर्मण इति भावः । ननु कर्मणः स्वर्गादिरूपपशुपुत्रादिरूप-

भगवदीयश्रीमदिच्छाराममप्रणीतः प्रदीपः ।

उत्तरवादिन इति । ब्रह्मकाण्डे वादिन एव न तु तत्त्वविद इत्यर्थः । **पूर्वाज्ञान**मिति कर्मस्वरूपाज्ञानमङ्गीकृत्येत्यर्थः । **पूर्वानुपे**त्यादि । कर्मानुपयोगित्वमित्यर्थः । **वेदानभिज्ञा** इति । ते हि न केवलमुत्तरकाण्डार्थानभिज्ञाः किन्तु सर्वस्यैव वेदस्यानभिज्ञा इत्यर्थः । वेदार्थाज्ञाने हेतुमाहुः—'**यदेवे**'त्यादिना । **कारणता** कर्मानुष्ठाने कारणता । **बाधितत्वात्** ब्रह्मज्ञानवतां देहाद्यध्यासाभावेन कर्मानुष्ठानस्य बाधितत्वात् । **त्यज्यते** कर्माधिकारित्वं ब्रह्मज्ञेषु नोरीक्रियत इत्यर्थः । **न च वाच्य**मित्युक्तं तत्र हेतुमाहुः—'**ब्रह्मात्मे**'त्यादि । **ब्रह्मात्मज्ञानवतः** स्वात्मनि ब्रह्माभेदज्ञानवतः । **न**

वसिष्ठादेर्यज्ञाधिकारात् । नचैवं किमनेनेति वाच्यम् । इत्थम्भूतत्वात् यज्ञस्य । किञ्च, कर्मफलवत् ब्रह्मफलस्यापि लौकिकत्वात् । 'य एवं वेद प्रतितिष्ठति अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्येति'। अत्यन्ताविद्यावतो यज्ञानधिकारात्तन्नि-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

तत्र हेतुमाहुः—'**ब्रह्मज्ञानवत एवे**'ति । आदिपदेन जनकादयोऽपि संगृह्यन्ते । ननु ब्रह्मज्ञानवतः कर्माधिकारेण तत्कृतौ कर्मणि कथमुत्कर्षाऽऽधायकत्वमित्यत आहुः—**न चैवमि**ति । तत्र हेतुमाहुः—'**इत्थमि**'ति । यथा ब्रह्म तथा यज्ञोऽपि भगवद्रूपत्वादितिज्ञापनार्थं परस्परोपयोगित्वेन तथादर्शनमिति भावः । ननु **तमेव विदित्वे**त्यादिभिर्ब्रह्मज्ञानस्याऽमृतत्वमेव फलम् । कर्मणस्तु स्वर्गादिकमिति कथं तुल्यत्वमित्यत आहुः—'**किञ्च कर्मफलवदि**'ति । न हि कर्मणो लौकिकमेव फलम् । ज्ञानिकृतस्य तस्य देवयानमार्गेण मुक्तिफलकत्वात् । निष्कामकृतस्याऽऽत्मानन्दसाधकत्वाच्च । तस्य भगवद्रूपत्वात्सर्वसामर्थ्यवत्त्वेन **फलमत उपपत्ते**रिति न्यायेन च सर्वफलदातृत्वमिति ज्ञापनार्थं लौकिकमपि फलं दर्शितम् । तथा ब्रह्मज्ञानस्याऽपि **य एवं वेदे**त्यादौ लौकिकफलसाधकत्वोक्तेर्दृश्यमानत्वेन न साम्याऽनुपपत्तिरित्यर्थः ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ब्रह्मेति । शङ्कते—**न चे**ति । **किमनेने**ति । ब्रह्मज्ञानेनैव सर्वसिद्धौ यज्ञकरणरूपाग्रहेण किमित्यर्थः । उत्तरयन्ति—**इत्थंभूतत्वादि**ति । 'यज्ञो वै विष्णुरि'ति श्रुत्या विष्णुरूपयज्ञस्येत्थंभूतत्वं नाम एतादृश-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ल्पनापक्षः परिहृतो वेदितव्यः । अत्र कारणतापदं ज्ञानं सहकारिकारणताबोधकम् । अत्र श्रुतौ विद्यापदेनाऽऽत्मनि भिदाबाधकं ज्ञानम् । श्रद्धापदेन वेदोक्ता आस्तिक्यबुद्धिः । उपनिषत्पदेन परमात्मस्वरूपविषयकरहस्यज्ञानम् । वीर्यवत्तरमनश्वरफलदम् । तत्कर्म भवतीत्यर्थः । ननु ज्ञानस्य कर्मवृत्तिकारणीभूतार्थित्व[1]

श्रीलालूभट्टकृता गूढार्थदीपिका ।

फलस्य श्रूयमाणत्वात्तुच्छफले कर्मणि ज्ञानसाहित्यमयुक्तमित्याशङ्क्य ज्ञानस्याऽपि तुच्छफलजनकत्वप्रदर्शनेन कर्मणि ज्ञानानुपकारकतां खण्डयन्ति—'**कर्मवद्ब्रह्मफलस्यापी**'त्यादिना । नहि हीनफलदानमात्रेण कर्मणां हीनत्वं भवति । तथा सति हीनफलदातृत्वस्य ज्ञानेऽपि सत्वाज्ज्ञानस्याऽपि तथात्वाऽऽपात इत्यत आहुः—'**ब्रह्मफलस्याऽपि लौकिकत्वादि**'ति । ब्रह्मज्ञानफलस्येत्यर्थः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

चेत्यादि । **किमनेन** मोक्षफलकसिद्धब्रह्मात्मज्ञानवतो यज्ञादिकरणेन किं फल आधिक्यमित्यर्थः । तत्र हेतुमाहुः—**इत्थमि**त्यादि । यज्ञस्य **इत्थम्भूतत्वात्** 'सर्वापेक्षा च यज्ञादिश्रुते'रितिसूत्रात्फलप्रतिबन्धकयज्ञादिकरणप्रारब्धसमापनद्वारा यज्ञादेरपि मोक्षाधिकारसम्पादकत्वेन व्यासाभिप्रेतत्वादित्यर्थः । ननु मुमुक्षूणां यज्ञा नावश्यकाः कर्मफलस्य मनुष्यादिब्रह्मान्तेषु लौकिकस्यैव परमानन्दात्मकस्य श्रवणादित्यत आहुः—**किञ्च कर्मे**त्यादि । **ब्रह्मफलस्य** ब्रह्मज्ञानफलस्य । **अत्यन्ते**त्यादि । अत्यन्ता-

१—एतावद्भागोऽस्माभिर्लब्धः ।

षेधार्थं ज्ञानमुपयुज्यते । नच देहाध्यासस्य कारणत्वम् । 'ब्रह्मार्पणं ब्रह्महवि'रित्यादिस्मृतेः ।

तस्मादन्योन्योपयोगित्वे न कोपि दोषः । क्रियाज्ञानयोः स्वातन्त्र्येण पुरुषार्थसिद्ध्यर्थं भिन्नतया शास्त्रप्रवृत्तिः ।

गोस्वामिश्रीमन्मुरलीधरविरचिता अणुभाष्यव्याख्या ।

ननु ब्रह्मज्ञानस्य केन प्रकारेण कर्मोपयोगित्वमित्यत आहुः—'अत्यन्ते'ति। यद्यप्यविद्यावद्विषयाण्येव शास्त्राणि तथाप्यत्यन्ताविद्यावतो यज्ञाधिकारो नास्ति । तस्य देह एवाऽत्मा । न तदतिरिक्तोऽभिमानी । तथा च देहे गते कस्येदं पारलौकिकं फलमात्मनो नष्टत्वाददृष्टत्वाच्चास्तीति निश्चयोऽपि न वक्तुं शक्यत इतिज्ञानवतः कुत्र यज्ञेष्वधिकारः । तस्माद्वेदान्तैरापाततो देहाऽतिरिक्तात्माऽस्तित्वे प्रतीते यज्ञाधिकारसम्भवात्तज्ज्ञानमत्रोपयुज्यत इत्यर्थः । ननु वेदान्तैः संघाताद्भिन्नत्वेनाऽऽत्मप्रतीतावध्यासस्य निवृत्तत्वात्कथं कर्मकरणमित्यत आहुः—'न चे'ति । तत्र हेतुः—'ब्रह्मार्पणमि'ति । यद्यपि प्रजायेयेत्यादिना, वाचारम्भणं विकार इत्यादिना च वेदान्तानां द्वेधाबोधनप्रकारस्य दृष्टत्वान्नानात्वप्रतीतावपि ब्रह्मावगतेः सम्भवात्कर्मकृतावप्यनुपपत्त्यभावः प्रत्यक्षत एव श्रुतिसिद्धोऽस्ति । तथाप्यधिकं तत्रानुप्रविष्टमित्यनुसन्धाय स्मृत्युपन्यास इति ज्ञेयम् । उपसंहरन्ति—'तस्मादि'ति । नन्वेतयोः पुरुषार्थपर्यवसायित्वेन तुल्यत्वे 'अथातो धर्मब्रह्मजिज्ञासे'ति प्रतिज्ञाय

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ब्रह्मज्ञानवता क्रियमाणे यज्ञे आविर्भावित्वम् । तथैव पुराणेषु श्रूयत इति भावः । ननु श्रुतौ कर्मफलश्रवणात् लौकिकफलमुद्दिश्य कर्मणि प्रवृत्तिर्ब्रह्मज्ञस्यानुचितेत्यत आह—किञ्चेति । ब्रह्मफलस्यापि ब्रह्मज्ञानफलस्यापीत्यर्थः । अत्र श्रुतिसम्मतमाहुः—'य एवं वेदे'ति। भृगुप्रपाठकस्थेयं श्रुतिः। इदानीं देहाध्यासवतः पुरुषस्य यज्ञाधिकारत्वं खण्डयन्ति—अत्यन्तेति। न चेति। न हीत्यर्थः। ब्रह्मार्पणमिति। तथाच 'परे वास्मि सन्यज'इति श्रुतिप्रामाण्यादपि अध्यासस्य कारणता नास्तीत्यपि मन्तव्यम् ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

'लौकिकत्वादि'ति । य एवं वेद प्रतितिष्ठति अन्नवानिति लौकिकफलश्रवणादित्यर्थः । ननु कर्मत्वेन देहाध्यासत्वेन कार्यकारणभावाज्ज्ञाने देहाध्यासस्य नाशात्कथं ज्ञानिनः कर्मप्रसक्तिरित्याशङ्क्य समादधते—'न च देहाध्यासस्ये'त्यादिना । देहाध्यासस्य यज्ञं प्रति कारणत्वं नास्ति । व्यतिरेकव्यभिचारादित्यर्थः । व्यतिरेकव्यभिचारं प्रदर्शयन्ति-'ब्रह्मार्पणं ब्रह्महविरि'त्यादि । 'स्मृतेरि'ति । अर्प्यते हविर्भिः क्षिप्यते येन तत् अर्पणं जुह्वादि, तत् ब्रह्म । हविर्हूयमानं द्रव्यं घृतादि, तदपि ब्रह्म । होमाधिकरणभूतोग्निरपि । ब्रह्मणा ब्रह्मरूपेण यजमानेन । यजमानोऽपि

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

विद्यावतो देहस्यैवात्मत्वेन निर्णयात् यज्ञादिफलस्य च देहोत्तरकालीनत्वेन श्रवणात्कस्य फलं भविष्यतीति बुद्ध्या तादृशस्य यज्ञादावुपेक्षासम्भवेनानधिकारादित्यर्थः । तन्निषेधार्थं अत्यन्ताविद्यावतो यज्ञाद्यधिकारनिषेधार्थम् । कारणत्वं यज्ञादौ कारणत्वम् । ब्रह्मार्पणमित्यादि । तथा च कर्तृकर्मादिसर्वस्मिन्नुपस्करे ब्रह्मत्वेन ज्ञानादेव ब्रह्मात्मफलस्योक्तत्वात् नाध्यासस्य कर्मणि तत्फले वा कारणतेति भावः ।

सिद्धान्तमुपसंहरन्ति—तस्मादिति । तथा च ब्रह्मज्ञानस्य देहात्ममतिनिरासकतया यज्ञादौ यज्ञानां चान्तःकरणशुद्धिद्वारा प्रारब्धसमापनद्वारा वा ब्रह्मविद्यायामुपयोगे न कोपि दोष इति फलितम् ।

किञ्च, वेदान्तवाक्यानामस्मिञ्छास्त्रे समन्वय एव प्रतिपाद्यते सन्देहनिराकरणद्वारा ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

शास्त्रारम्भस्योचितत्वात्कथं भिन्नतया प्रतिज्ञापूर्वकं तत्प्रवृत्तिरित्यत आहुः—'**क्रियाज्ञानयोरि**'ति । स्वरूपज्ञानपूर्वकं कृतस्य कर्मणोऽसम्भावनाविपरीतभावनानिवर्तकात्मज्ञानस्य चान्योन्यनैरपेक्ष्येणाऽपि पुरुषार्थत्वमस्ति, समत्वादिति ज्ञापनार्थं भिन्नतया तत्करणमित्यर्थः । यदुक्तं वेदान्तवाक्यानि तात्पर्येणैतस्यैवाऽर्थस्य प्रतिपादकत्वेन सम्यगनुगतानीति समन्वयस्य सत्त्वाच्छास्त्रयोनित्वं ब्रह्मणः कथमिव नेति वक्तुं शक्यमिति तत्राहुः—'**किञ्चे**'ति । सिद्धवद्धेतुत्वेन निर्देशात्समन्वयोऽनेनैव सिद्धश्चेदस्मिंश्छास्त्रसमन्वयप्रतिपादके सन्देहनिराकरणपूर्वकं समन्वयप्रतिपादनं व्यर्थमेव स्यात् ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

शाङ्करमतेऽप्यन्योन्योपयोगित्वं स्वीकर्तव्यमित्युपसंहरन्ति—**तस्मादि**ति । ननु परस्पराकाङ्क्षत्वेनैकवाक्यत्वादेकशास्त्रत्वमेव स्यादित्यत आह—**क्रिये**ति । **स्वातन्त्र्येणे**ति । धर्मार्थकामरूपे त्रिवर्गे साधनीय

श्रीलालूभट्टकृता गूढार्थदीपिका ।

ब्रह्मैव । हुतं होमोऽपि ब्रह्म । तेन प्राप्तव्यं फलमपि ब्रह्मैव । इत्थं ज्ञानवता निरध्यस्तेनापि यज्ञकरणादध्यासाभावेऽपि यज्ञसत्त्वान्नाध्यासस्य यज्ञं प्रति कारणतेत्यर्थः । नन्वन्योन्योपकारकत्व एकयैव मीमांसया कुतो न चारितार्थ्यमित्याकाङ्क्षायामाहुः—'**क्रियाज्ञानयोरि**'त्यादिना । पूर्वकाण्डप्रतिपाद्यायाः क्रियाया, उत्तरकाण्डप्रतिपाद्यस्य ज्ञानस्याऽन्योन्यसाहाय्यं विनापि पुरुषार्थसाधकता वर्तत इति सूचनाय भिन्नतया मीमांसाद्वयप्रवृत्तिरित्यर्थः । शास्त्रयोनित्वपूर्वपक्षनिराकरणाय समन्वयादिति हेतुरुपन्यस्तस्तं दूषयन्ति—'**किञ्च वेदान्तवाक्यानामि**'त्यादिना । समन्वयरूपस्य हेतोः साधनाय व्यासचरणानां प्रवृत्तिः । हेतोः साम्प्रतमसिद्धत्वादसिद्धहेतुना न साध्यसिद्धिरिति भावः । सिद्धव-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

नन्वेवं पूर्वोत्तरकाण्डयोरेकैकेन फले सम्पादनीये तदन्यस्य सहकारिकारणताकल्पन एकशास्त्रत्वमेव स्यान्न तु पूर्वोत्तरमीमांसेतिशास्त्रद्वयमित्यत आहुः—**क्रिये**त्यादि । **स्वातन्त्र्येणे**ति । निष्कामकर्मानुष्ठानेन मोक्षः सकामस्य च त्रिवर्ग एव फलं निष्कामज्ञानिनो मोक्षः सकामस्य तु प्रजापश्वादिरूपमेव फलमिति तत्र काम्यफले परस्परस्योपयोगाभावो यतोतः स्वातन्त्र्येणेत्यर्थः । **पुरुषार्थसिद्ध्यर्थं** त्रैवर्गिकपुरुषार्थसिद्ध्यर्थम् । इत्थं च तादृशफल उभयोः स्वातन्त्र्यान्नैकशास्त्रतागन्धोपीति भावः ।

एवं पूर्वोक्तग्रन्थेनेतरेषां वेदानभिज्ञत्वं प्रतिपाद्य सूत्रार्थानभिज्ञत्वं प्रदर्शयितुमाहुः—**किञ्च वेदान्ते**त्यादि । अत्र शङ्कराचार्यैः सर्वज्ञसर्वशक्तिमदुत्पत्त्यादित्रितयकर्तृ ब्रह्मेति वेदान्तैरवगम्यत इति प्रतिज्ञाय समन्वयादितिहेतुस्तत्रोक्तः । समन्वयश्च सर्ववेदान्तवाक्यानां तात्पर्यकल्पनया सृष्ट्यादिकर्तृत्वलाभेन । तत्र ब्रह्मपक्षकं सृष्ट्यादित्रितयकर्तृत्वसाध्यकं नानावेदान्तवाक्यसमन्वयहेतुकमनुमानं केवलव्यतिरेकि तेषामभिमतम् । एवं मतान्तरेपि रामानुजादीनां बोध्यम् । इदं च तेषां निरूपणं, पूर्वमीमांसकैः सर्ववेदान्तवाक्यानां कर्मविध्यपेक्षितब्रह्मस्वरूपदेवतासमर्पकत्वेन कर्मविध्येकवाक्यतया प्रामाण्यमुपासनादिविधिशेषतया वा प्रामाण्यमिति पूर्वपक्षितं तत्समाधानाय समन्वयादिति हेतुरुपन्यस्तः सोनुचिततर इति सूत्राज्ञानं बोद्धव्यम् । अनौचित्यमेवोपपादयन्ति—'**अस्मिन्नि**'त्यादिना । व्याससूत्ररूपे शास्त्रे । **समन्वय एव** कर्तृत्वभोक्तृत्वप्रतिपादकवेदान्तानां ब्रह्मणि समन्वय एव । **सन्देहे**ति

तत्कथं सिद्धवद्धेतुत्वेन निर्देशः । अग्रिमवैयर्थ्यं च स्यात् । नच प्रतिज्ञागर्भितहेतुत्वम् । अनुपयोगात् । गौणमुख्यभावे परं विवादः । नच येन रूपेण समन्वयो मतान्तरस्थैर्वि-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

दूषणान्तरमाहुः—'**अग्रिमे**'ति । अग्रिमस्य विरोधनिराकरणस्य समन्वयार्थत्वात्तस्य पूर्वमेव तत्सिद्धौ तद्वैयर्थ्यं दुष्परिहरमेव भवेत् ।

ननु यथा ब्रह्मजिज्ञासेति प्रतिज्ञाय ततस्तस्यैव प्रपञ्चः सर्वस्मिन्नपि शास्त्रे, तथेदमपि समन्वयप्रतिज्ञाप्रतिपादकमिति कुतो वैयर्थ्यमित्याशंक्य निराकुर्वन्ति—'**न चे**'ति । तत्र हेतुमाहुः—'**अनुपयोगादि**'ति । समन्वयादीनां चतुर्णां विचारस्य ब्रह्मजिज्ञासाऽनतिरिक्तत्वात्तत्प्रतिज्ञैव चारितार्थ्ये भिन्नतया तस्या अनुपयोगात् । तस्मात्कर्मब्रह्मणोः परस्परोपयोगित्वादेकरूपत्वाच्च न सिद्धान्तस्याऽपि सङ्गतत्वमिति निर्विवादमेव सर्वं पूर्वोक्तम् । उपादानत्वेऽभ्युपगम्यमाने विवादस्थलं प्रदर्शयन्ति—

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

उभयोः स्वातन्त्र्येणेत्यर्थः । इतःपरं सर्वेषां मते सूत्रानभिज्ञत्वमाहुः—**किंचे**ति । **सिद्धवद्धेतुत्वेने**ति । शङ्कराचार्यैरुत्पत्त्यादित्रयकारणीभूतं ब्रह्म पक्षीकृत्य वेदान्तशास्त्रगम्यत्वं साध्यते । समन्वयादिति हेतुः । तत्र सर्वेषां वेदान्तवाक्यानां ब्रह्मणि तात्पर्यात्समनुगतत्वादिति हेतुवाक्यार्थः । तत्रैवं विचार्यते । सकलशास्त्रसमाप्त्यनन्तरं सन्देहनिराकरणद्वारा सर्वेषां वेदान्तवाक्यानां ब्रह्मणि समन्वयः सिद्धो भविष्यति । आदौ तु तस्यासिद्धत्वात् सिद्धत्वेन हेतुनिर्देशः कथमिति । इदं च सर्वेषां मत एतादृशहेतुनिर्देशस्य सत्वाद्दूषणं बोध्यम् । **वैयर्थ्यमि**ति । अग्रिमग्रन्थे वाक्यानां समन्वय एव साध्यते । सिद्धे सति वैयर्थ्यमिति भावः । ननु यथा प्रतिज्ञा बुद्धिस्थसाध्यग्रन्थविषयिणी तथाऽयं हेतुरपि बुद्धिस्थः प्रतिज्ञागर्भित एवेति सिद्धो हेतुर्न दुष्ट इत्याशयेन शङ्कन्ते—**नचे**ति । प्रतिज्ञागर्भितहेतुत्वं समन्वयं साधयिष्य इति प्रतिज्ञाविषयीभूतहेतुत्वम् । उत्तरयन्ति—**अनुपयोगा**दिति । मोदादि(?)मतनिराकरणं तु हेतुप्रयोगं विना

श्रीलालूभट्टकृता गूढार्थदीपिका ।

न्निर्देशे दूषणान्तरमाहुः—'**अग्रिमे**'त्यादिना । समन्वयस्य सिद्धत्वेऽग्रिमवेदान्तसूत्राणां वैयर्थ्यमित्यर्थः । '**न च प्रतिज्ञागर्भिते**'त्यादि । समन्वयरूपो हेतुः प्रतिज्ञागर्भितः प्रतिज्ञायमानोऽस्यतः साध्यत्वेऽपि सिद्धवन्निर्देशदोषो न, व्यासचरणैः प्रतिज्ञातस्य सिद्धत्वादित्याशङ्क्य समादधते—'**अनुपयो-**

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

उक्तार्थानां ब्रह्मणि सन्देहनिरासायेत्यर्थः । **तत्कथमि**त्यादि । तथा च ब्रह्मणि विरुद्धार्थप्रतिपादकत्वेन प्रतीयमानसकलवेदान्तानां समन्वयनिश्चयार्थमेव व्यासशास्त्रस्य प्रवृत्तिरिति सन्दिग्धः समन्वयः कथं **सिद्धत्वेन** निश्चयविषयत्वेन **निर्दिष्टः** । वादिनं प्रति पूर्वपक्षनिरासकत्वेन प्रयुक्त इत्यर्थः । दूषणान्तरमाहुः—**अग्रिमे**त्यादि । आदावेव समन्वयनिर्णये समन्वयनिर्णयार्थं वक्ष्यमाणाग्रिमशास्त्रस्य वैफल्यं स्यादित्यर्थः । नन्वग्रे करिष्यमाणग्रन्थं बुद्धिस्थीकृत्यायं ग्रन्थो मया क्रियत इतिवदग्रे समन्वयं साधयिष्य इति मनसा प्रतिज्ञाय समन्वयादिति हेतुरुपन्यस्त इत्यत आहुः—'**नच प्रती**'त्यादि । **प्रतिज्ञागर्भितः** अग्रे समन्वयं साधयिष्य इतिप्रतिज्ञाकर्मीभूतः । **अनुपयोगादि**ति । तथा च

१ वादीति स्यात् ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

'गौणमुख्ये'ति। तदुपादानं गौणं प्रकृतिगुणसम्बन्धसहितं, मुख्यं तद्रहितं वेति विवादः कदाचित्सम्भवेत्स त्वीक्षतेरित्यादिभिः परिहृतो भविष्यतीति नाऽनुपपत्तिः काचिदिति भावः।

मतान्तरीयसमन्वये दूषणान्तरमप्याहुः—**'न चे'**ति। अग्र **ईक्षतेर्नाशब्दमि**त्याद्यधिकरणेषु। तत्र ब्रह्मण एव सर्वत्राऽनुस्यूतत्वेनोपादानत्वं सर्वरूपत्वेन तत्तच्छब्दवाच्यत्वं चेति निर्णयः प्रतीयते। यथाऽस्य **लोकस्य का गतिरिति आकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ती**त्यादौ जगत्कारणं भूताकाशो ब्रह्म वेति सन्देहे सूत्रकार आह—**आकाशस्तल्लिङ्गा**दिति। आकाशो जगदुत्पत्त्या-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

न भविष्यतीति तस्य बुद्धिस्थत्व उपयोगाभावादित्यर्थः। **गौणमुख्यभावे**ति। अस्माभिरिव मीमांसकैर्वेदान्तानां ब्रह्मप्रतिपादकत्वं स्वीक्रियत एव। परन्तु पूर्वकाण्डे शेषत्वरूपगौणत्वेनाऽस्माभिस्तु मुख्यत्वेनेत्येवंरूपस्य गौणमुख्यभावे विवादस्य सत्वात्तत्र हेतुप्रयोगस्योपयुक्तत्वम्। ब्रह्मप्रतिपादकत्वे तु विवादाभावात्समन्वयरूपहेतुप्रयोगोऽनुचित इति भावः। **विवाद** इति। नतु ब्रह्मप्रतिपादकत्व इति शेषः। ननु सम्यक् मुख्यत्वेन ब्रह्मप्रतिपादनं समन्वयशब्दार्थः। एवं च हेतुप्रयोगस्यौचित्यमित्यतो दूषणान्तरमाहुः—**न चे**ति। अस्तीत्यनेनान्वितं येन रूपेण यावद्धर्मशून्यत्वेन रूपेण समन्वयः। सर्वेषां वेदान्त-

श्रीलालूभट्टकृता गूढार्थदीपिका।

गादि'ति। समन्वयादिविचाराणां ब्रह्मजिज्ञासाऽनतिरेकात्। ब्रह्मजिज्ञासाप्रतिज्ञयैव चारितार्थ्ये समन्वयप्रतिज्ञाया अनुपयोगादित्यर्थः। तस्मात्तु समन्वयादिति सूत्रं, ब्रह्मण उपादानत्वे यः सन्देहो यश्च पूर्वपक्षस्तन्निराकरणार्थं प्रवृत्तमिति मन्तव्यम्। ननु ब्रह्मणो जगदुपादानत्वं **आत्मान ँ स्वयमकुरुत सहैतावानास**इत्यादिश्रुतिभिः सिद्ध एवाऽस्ति, किमर्थं सूत्रप्रणयनमित्याकाङ्क्षायामाहुः—**'गौणमुख्यभाव'** इत्यादि। गुणसम्बन्धयुक्तं सगुणं ब्रह्म समवायिकारणं तद्रहितं मुख्यं ब्रह्म वा समवायिकारणमिति गौणमुख्यभावे विवाद इत्यर्थः। तथा च ब्रह्मणो मुख्यस्यैवोपादानत्वसाधनार्थं सूत्रकारो भगवान् बादरायण आह—**'तत्तु समन्वयादि'**ति। तद्ब्रह्मैव

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

मीमांसकैः कर्मविध्यपेक्षितकर्मसम्बन्धिब्रह्मरूपदेवताप्रकाशकत्वेन वेदान्तानां कर्मविध्येकवाक्यतया प्रामाण्यं स्वीक्रियते, तत्र तन्मतं दूषयित्वा स्वातन्त्र्येण ब्रह्मणि वेदान्तानां प्रामाण्यं व्यवस्थापयितुमेष हेतुर्भवद्भिरुद्भावनीयः स चासिद्धो वादिविजयाहेतुरित्यनुपयोगादित्यर्थः। तन्मतदूषणार्थं व्यासानां समन्वयरूपहेतुसाधनमित्यप्यप्रयोजकमित्याहुः—**गौणेत्यादि**। तथा च वेदान्तानां ब्रह्मणि समन्वयस्तैरपि स्वीक्रियत एव परं कर्मविधिशेषतया न तु स्वातन्त्र्येणेति तादृशसमन्वयसाधनमपि न व्यासाभिप्रेतमित्यपि दूषणं बोध्यमित्यर्थः। मायावाद्यभिमतसमन्वयस्वरूपं दूषयितुमाहुः—**'न च येने'**त्यादि। तथा च सर्वविशेषशून्ये निर्धर्मके ब्रह्मण्यध्यारोपापवादाभ्यां सर्ववेदान्तानां समन्वयो भवदभिमतः, स च न व्यासविचारगोचरोग्र ईक्षतेर्नाशब्दमित्यारभ्यासमाप्ति सधर्मके ब्रह्मण्येव वेदान्तानां समन्वयस्य व्यासविचारगोचरत्वादित्यर्थः। ननूपादानाभिन्ननिमित्तकारणं ब्रह्मेतिवादिनां सर्वेषामेव मते 'जन्माद्यस्य यतः' 'शास्त्रयोनित्वात्' 'तत्तु समन्वया'दितिसूत्रद्वयेनैव सर्वज्ञत्वसर्वशक्तिमत्त्वजगदुपादानत्वनिमित्तकारणत्वानां ब्रह्मणि सिद्धेरग्रेतनवेदान्तारम्भवैयर्थ्यं, सूत्रद्वयेनैव सर्ववेदान्तसिद्धान्तस्य निश्चया-

चारितस्तथाग्रे सूत्रेषु निर्णयोस्ति । शास्त्रारम्भस्तु प्रथमसूत्र एव समर्थितः । तस्मात् समवायिकारणत्वमेवानेन सूत्रेण सिद्धम् ।

ननु कारणत्वमेवास्तु ब्रह्मणः, किं समवायिकारणत्वेन ? । विकृतत्वञ्च स्यात् । अनर्थरूपत्वेन कार्यस्यायुक्तता च । तस्मादनारम्भणीयमेवैतत्सूत्रमिति चेत्—

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

दिकारणत्वेनोक्तः परमात्मैव । तल्लिङ्गात्तस्यैव ब्रह्मण उपादानत्वेनाऽनुस्यूतत्वादिलिङ्गादित्येवमादिप्रकारेणैव ब्रह्मणः सर्वत्र समन्वयस्य प्रतिपादनान्न मतान्तरीयः समन्वयः सूत्रकारसम्मतोऽस्तीत्यर्थः । नन्वेवं सूत्रद्वयेनैव सर्वज्ञं सर्वशक्ति जगदुपादानकारणं ब्रह्मेतिज्ञानस्य सम्भवादग्रे शास्त्रारम्भोऽनर्थक एव कस्मान्न भवतीत्यत आहुः—'**शास्त्रारम्भ**' इति । शास्त्रस्य सन्देहवारकत्वेन यस्मिन्नेव विषये विशयस्तत्रैव शास्त्रप्रवृत्तिः सार्थिकेति प्रतिज्ञासूत्रव्याख्यान एव समर्थितमित्यर्थः ।

एवं सूत्रार्थं निरूप्योपसंहरति—'**तस्मादि**'ति । यस्मान्मतान्तरीयः समन्वयो न सूत्रकारसम्मतस्तस्मादुपादानकारणत्वमेवानेन सूत्रेणोच्यत इति सिद्धमित्यर्थः । ननु न वयं कारणत्वं व्यासेधामः, किन्तूपादानत्वम् । न ह्युपादानत्वे तत्र कश्चनोत्कर्षः सिद्ध्यति । प्रत्युताऽनिष्टस्यैव प्रसक्तिरित्याह पूर्वपक्षी—'**ननु कारणमि**'ति । यद्विपरिणामि तद्विकृतमिति व्याप्तेः । दूषणान्तरमाहुः—

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

वाक्यानामिति शेषः । मतान्तरस्थैर्मायावादिभिः । **तथा**—तेन रूपेण निर्णयो नास्तीति पूर्वेणान्वयः। तथा चाग्रिमसूत्रेषु सर्वत्र कर्त्रादिरूपेणैव तत्तद्वाक्यानां ब्रह्मप्रतिपादकत्वं निःसन्दिग्धमिति नायं हेतुप्रयोग उचित इति भावः। ननु सर्वत्र श्रुत्या सिद्धार्थ एव प्रतिपाद्यते चेत्तत्र सन्देह एव नोदेतीति शास्त्रारम्भो व्यर्थ इत्यत आहुः-**शास्त्रे**ति । गौणतापत्तिरजिज्ञास्यत्वं चेत्यादिस्थले । उपसंहरन्ति-**तस्मादि**ति । ननु विकाराभावार्थं केवलकारणतास्वीकार एवास्त्वित्याशयेनाऽऽशङ्कते—**नन्विति** । नन्वात्मपदस्वारस्यादेवाविकृतत्वमिति पूर्वमेवोक्तमित्यतो दूषणान्तरमाहुः—**अनर्थे**ति । कार्यस्यानर्थरूपत्वेन विना-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

समवायिकारणम् । कुतः समन्वयात् । अस्ति-भाति-प्रियत्वेन सर्वत्रान्वयात् । इह सर्वत्राऽन्वयोक्त्या शुद्धं ब्रह्मैवोक्तम् । व्यापकत्वनिर्देशात् । ततश्च शुद्धस्य निर्गुणब्रह्मण एव जगत्समवायिकारणतासिद्धिः । अत एव गौणश्चेन्नात्मशब्दादित्यनेन गौणत्वं परिहरिष्यते । '**अनर्थरूपत्वेने**'ति । कार्यस्याऽनर्थरूपत्वेनेत्यर्थः । '**अयुक्तता चे**'ति । समवायिकारणत्वस्याऽयुक्तता चेत्यर्थः । यदि

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

दित्यत आहुः—**शास्त्रारम्भे**त्यादि । तथा च यत्र यत्र विरुद्धवादिसम्पादितो वेदान्तानां ब्रह्मणि समन्वये सन्देहस्तत्र सर्वत्र सन्देहनिरासार्थं सकलव्यासशास्त्रोपयोग इति प्रथमसूत्रविचारे एवास्माभिः समर्थितमिति न वैयर्थ्यशङ्कालेशोपीति भावः । सिद्धान्तमुपसंहरन्ति—'**तस्मा**'दित्यादिना । **तस्मात्** सर्वज्ञत्वसर्वशक्तिमत्त्वयोर्ब्रह्मणि जगत्कारणत्वस्य च वेदसिद्धत्वं तत्र हेतुत्वेन समन्वयादित्यस्योपन्यासः कृतस्तस्य पूर्वोक्तरीत्या दूषितत्वादित्यर्थः । **अनेन सूत्रेण** 'तत्तु समन्वयादि'तिसूत्रेणेत्यर्थः ।

वादी शङ्कते—**नन्वित्यादि** । **किमित्यादि** । समवायिकारणत्वे ब्रह्मणो न कोप्युत्कर्षः सिद्ध्यतीत्यर्थः । **विकृतत्वमिति** । यत्परिणामि तद्विकृतमितिव्याप्तेरित्यर्थः । कपालं दृष्टान्तः । दूषणान्तरमाह—**अनर्थे**त्यादि । ब्रह्मणः समवायिकारणत्वे समवायिकारणस्य च कार्यरूपतेतिसिद्धान्तात्

मैवम् । सर्वोपनिषत्समाधानार्थं प्रवृत्तः सूत्रकारः । तद्यदि ब्रह्मणः समवायित्वं न ब्रूयात् भूयानुपनिषद्भागो व्यर्थः स्यात् । 'इदं सर्वं यदयमात्मा' 'आत्मैवेदं सर्वं' 'स सर्वं भवति' 'ब्रह्म तं परादा'दित्यादि, 'स आत्मानं स्वयमकुरुत' 'एकमेवाद्वितीयं 'वाचारम्भणं विकार' इत्यादि, एवमादीनि वाक्यानि स्वार्थे बाधितानि भवेयुः ।

नन्वेवं निःसन्दिग्धत्वात् कथं सूत्रप्रवृत्तिः ? ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

'**अनर्थे**'ति । कार्यस्याऽनर्थरूपत्वेनोपादानस्याऽपि तदभिन्नत्वेन तद्रूपत्वप्रसक्तेरयुक्तैवोपादानत्वस्येति शेषः । उपसंहरन्ति—'**तस्मादि**'ति । यस्मात्पूर्वोक्तदूषणापत्त्यपरिहारान्नोपादानत्वं ब्रह्मणस्तस्मात्त्वन्मत उपादानत्वसमर्थकमिदं सूत्रमनारम्भणीयमेवेति स्थितेऽत्र सिद्धान्तमाहुः—'**मैवमि**'ति । शास्त्रस्य सन्देहवारकत्वे**नेदं सर्वं यदयमात्मा आत्मैवेदं सर्वं भवती**त्यादौ ब्रह्मण एव सर्वरूपत्वोक्तेः समवायित्वस्य श्रुतिसम्मतत्वात्तत्र यानि कानिचिद्दूषणानि प्रतीयमानानि तानि चेत्सूत्रकारो न निवारयेत्तदा शास्त्रस्य तावत्यंशेऽशास्त्रत्वं, ब्रह्मणः समवायित्वाभावेन तावन्ति वाक्यानि च स्वार्थे बाधितान्येव भवेयुस्तस्मान्नारम्भणीयमेवैतदिति प्रलपितमात्रम् । ननु तत्र यद्युपादानत्वं स्पष्टमेव प्रतीयते तदा तु तस्याऽनारम्भणीयत्वमेव प्रसज्येत । सन्देहं विना शास्त्रस्या-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

शित्वेन । **अयुक्तते**ति । ब्रह्मणः कार्ये समन्वयेऽयुक्तता । विनाशित्वं स्यादित्यर्थः । समाधानमाहुः—**मैवमि**ति । समाधानार्थं विरुद्धवाक्यानामेकवाक्यातासम्पादनार्थम् । **व्यर्थः स्या**दिति । स्वार्थेऽप्रामण्यात् व्यर्थः स्यादित्यर्थः । ब्रह्मणः समवायित्वाभावे बहूनां वाक्यानामसङ्गतत्वमुक्तं तन्मध्ये कानिचिद्दर्शयन्ति—**इदमि**ति । वाक्यसप्तकम् । प्रथमं मैत्रेयीब्राह्मणे । तत्र सर्वस्मिन्नात्माभेदः प्रतिपादितः । स च समवायित्वमन्तरेण न घटते । द्वितीयं छान्दोग्ये सनत्कुमारनारदसंवादे । तृतीयं पुरुषविधब्राह्मणे । चतुर्थं मैत्रेयीब्राह्मणे । तत्र सर्वमिदमात्माभिन्नमिति यो वेद तं प्रति ब्रह्म परादात् सः अमृतत्वाभावरूपं पराभवं प्राप्नुयादित्यर्थः । पञ्चमं तैत्तिरीये ब्रह्मवित्प्रपाठके । तत्रैकस्यैव कर्तृकर्मभावः समवायित्वमन्तरेण न

श्रीलालूभट्टकृता गूढार्थदीपिका ।

समवायिकारणं ब्रह्माङ्गीक्रियते तदा समवायिकारणकार्ययोरभेदात्कार्यधर्माः कारणेऽप्यायान्तीति ब्रह्मणोऽपि जगन्निष्ठतुच्छत्वादिधर्मवत्त्वं स्यादिति भावः । '**एतत्सूत्रमि**'ति । समन्वयसूत्रमित्यर्थः । '**प्रपञ्चरूपप्रतिपादकानामि**'ति । समवायिकारणतानिरूपणे कार्यकारणयोरभेदात्प्रपञ्चरूपता ब्रह्मणः सिद्ध्यतीति समवायिकारणत्वप्रतिपादकानां, **इदं सर्वं यदयमात्मा आत्मैवेदꣳसर्वं स सर्वं भवति आत्मानꣳ स्वयमकुरुत बहुस्यां प्रजायेये**त्यादीनां मुख्यार्थबाधकत्वं

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

ब्रह्मणः कार्यतापत्तिरूपानर्थत्वापत्तेरित्यर्थः । पूर्वपक्षमुपसंहरन्ति—**तस्मा**दिति । **अनारम्भणीयं** समवायिकारणताप्रतिपादनाय नारम्भणीयमित्यर्थः ।

सिद्धान्तमाहुः—'**मैव**'मिति । **समवायित्वं** उपनिषत्सिद्धं समवायित्वम् ।

ननु ब्रह्मणः समवायिकारणतायाः श्रुतिसिद्धत्वे सन्देहाभावाद्व्याससूत्रप्रवृत्तिस्तत्रापार्थेत्यत आहुः—**नन्वेवमि**त्यादि ।

उच्यते, अस्थूलादिवाक्यान्यपि सन्ति सर्वत्र प्रपञ्चतद्धर्मवैलक्षण्यप्रतिपादकानि, ततोऽन्योन्यविरोधेनैकस्य मुख्यार्थबाधो वक्तव्यः। तत्र स्वरूपापेक्षया कार्यस्य गौणत्वात् प्रपञ्चरूपप्रतिपादकानामेव कश्चित् कल्पयेत्, तन्माभूदिति जन्मादिसूत्रवत् समन्वयसूत्रमपि सूत्रितवान्। तथा च अस्थूलादिगुणयुक्त एव अविक्रियमाण एवात्मानं करोतीति वेदान्तार्थः सङ्गतो भवति। विरुद्धसर्वधर्माश्रयत्वं तु ब्रह्मणो भूषणाय।

गोस्वामिश्रीमुरलीधरविरचिता अनुभाष्यव्याख्या।

ऽप्रवृत्तेरित्याहुः—'**नन्वि**'ति। अत्र समाधानमाहुः—'**उच्यत**'इति। यद्यपि समवायित्वं निस्सन्दिग्धमेव प्रतिपाद्यते तथाप्यस्थूलादिवाक्येषु कार्यतद्धर्मवैलक्षण्यस्य च प्रतीयमानत्वाद्भवति संशयः। श्रौतत्वाऽविशेषादेकतरबाधस्याऽशक्यवचनत्वात्। न च संशय एवाऽस्तु किं बाधकमिति वाच्यम्। वेदान्तवाक्यानां शक्तितात्पर्याऽवधारणरूपस्य श्रवणस्याऽसिद्धौ सर्वमेव नश्येत्। अत एकतरनिश्चयार्थं धर्मिप्रतिपादकस्योपजीव्यत्वात्सर्वात्मना बाधासम्भवाद्धर्मप्रतिपादकस्यापि श्रौतत्वात्सर्वथा बाधाभावेऽपि परिचायकत्वाद्यभ्युपगमेन मुख्यार्थबाधे सर्वोपपत्तिरिति कश्चित्कल्पयेत्तन्निषेधार्थं समन्वयसूत्रं प्रयुक्तवान्सूत्रकारः, प्रधानादीनां कारणत्वनिराकरणपूर्वकं ब्रह्मकारणत्वप्रतिपादकजन्मादिसूत्रवत्। ततो यज्जातं तदाहुः—'**तथा चे**'ति। ननु प्रपञ्चतद्धर्मवैलक्षण्यं, तद्रूप-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

सम्भवति। षष्ठं छान्दोग्ये। सप्तमं तु स्पष्टमेव समवायित्वं वदति। तस्मात् सामान्यकारणज्ञाने ज्ञाते सामान्यधर्मप्रकारकं ज्ञानं विशेषधर्मप्रकारकजिज्ञासाजनकमिति न्यायात् विशेषधर्मजिज्ञासानिवर्तकत्वेनेदं सूत्रमावश्यकमिति भावः। पुनः शङ्कते—**नन्विति**। **प्रवृत्तिरि**ति। तथाच सूत्रप्रवृत्त्यन्यथानुपपत्त्योक्तश्रुत्या निःसन्दिग्धं समवायित्वं न प्रतीयत इति शङ्काकर्तुराशयः। समाधानमाहुः—**उच्यत** इति। '**अस्थूले**'ति। अस्थूलमनण्वित्यादीनीत्यर्थः। अपिना सविशेषप्रतिपादकवाक्यसङ्ग्रहः। ननु ततः किमित्यत आहुः—'**तत**' इति। **मुख्यार्थ** इति। शक्त्या प्रतिपाद्य इत्यर्थः। '**गौणत्वादि**'ति। इच्छोत्तरं जायमानत्वेन गौणत्वादित्यर्थः। '**कल्पयेदि**'ति। मुख्यार्थबाधकत्वमित्यादि। '**जन्मादिसूत्रवदि**'ति। कर्तृत्वं यथा प्रतिपादितं तथा समवायित्वमपि ब्रह्मणि प्रतिपादितं स्वमत इति।

श्रीलालूभट्टकृता गूढार्थदीपिका।

कश्चित्कल्पयेदित्यर्थः। '**ततः कर्तृत्वमपी**'ति। कर्मसापेक्ष ईश्वरः फलं ददातीत्येवं कर्माधीनतायामीश्वरस्याङ्गीकृतायामनीश्वरताप्रसक्तौ स्वतन्त्रत्वाभावात्स्वतन्त्रः कर्तेत्यार्षलक्षणप्रसक्तिराहित्यात्कर्तृत्वं भज्येतेत्यर्थः।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

उच्यते समवायिकारणतानिश्चयार्थं सूत्रप्रवृत्तेरावश्यकत्वमुच्यत इत्यर्थः। **अन्योन्ये**त्यादि। सधर्मकनिर्धर्मकप्रतिपादकवाक्यानां परस्परविरोधेनेत्यर्थः। **मुख्यार्थः** शक्यार्थः। **तत्र** सधर्मकनिर्धर्मकब्रह्मप्रतिपादकवाक्यानामन्यतरस्य मुख्यार्थबाधकल्पनायाम्। **स्वरूपापेक्षया** 'निष्कलं शान्त'मित्यादिवाक्यप्रतिपाद्यापेक्षया। **कार्यस्य** 'स एतावानास ऐतदात्म्यमिदं सर्वं स आत्मान ँ स्वयमकुरुते'त्यादिवाक्यप्रतिपाद्यस्य लोकानां कार्यत्वेनाभिमतस्य। **गौणत्वात्** वादिनो गौणत्वाभिमानात्। **प्रपञ्चरूपे**ति। प्रपञ्चात्मकब्रह्मरूपेत्यादि। **कल्पयेत्** मुख्यार्थबाधं कल्पयेत्। **तत** कार्यब्रह्मप्रतिपाद-

किञ्च, अन्यपदार्थसृष्टौ वैषम्यनैर्घृण्ये स्याताम्। कर्माधीनत्वे त्वनीशिता। ततः कर्तृत्वमपि भज्येत। ततः सर्वमाहात्म्यनाश एव स्यात्।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

त्वं चोभयमपि विरुद्धमिति कथमेकत्र तत्सम्भवः। सम्भवे वा विकृतत्वं कस्मान्न भवतीत्यत आहुः—'**विरुद्धे**'ति। इदमेव हि तस्य सर्वतोऽधिकमाहात्म्यं यत्तद्रूपत्वेऽप्यविकृतत्वमिति विरुद्धधर्माश्रयत्वम्। नह्यन्यस्तादृशो दृष्टः श्रुतो वा। अत एवाऽद्वैतश्रुतिरपि संगच्छते। तस्यैव समवायित्वे साधकान्तरमाहुः—'**किञ्चे**'ति। '**अन्यपदार्थसृष्टावि**'ति। भगवतो निमित्तत्वमात्रेऽभ्युपगते कार्यस्याऽन्यत्वमापद्येत। तथा च तत्सृष्टौ कांश्चित्सुखिनः कांश्चिद्दुःखिनः प्रलयं च कुर्वन्कथं विषमो निर्घृणश्च न भवेत्।

ननु कर्मसापेक्षः सन्नेव तथा करोतीति कथमुक्तदूषणावकाश इत्यत आहुः—'**कर्माधीनत्व**' इति। यदि कर्मसापेक्ष एव फलं प्रयच्छेत्तदा तत्कर्म किमिति विचारणीयम्। ब्रह्म चेत्स दोषस्तदवस्थ एव। अन्यच्च तत्सापेक्षत्वादस्वातन्त्र्यात्तद्धेतोरेवेतिन्यायेन च कर्मण एव तदुपपत्तावीश्वरत्वं कारणत्वं च भज्येत। हेतुव्यपदेशश्च विरुध्येत। तस्मात्सृष्टेरात्मरूपत्वाऽभ्युपगम एव वैषम्यादिदोषपरिहारो नाऽन्यथा। अत **एवैष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति। एष उ एवाऽसाधु कारयति तं यमधो निनीषते। पुण्यो वै पुण्येन कर्मणा**

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

सिद्धान्तमाहुः—'**तथा चे**'ति। **सङ्गत** इति निःसन्दिग्ध इत्यर्थः। तथा च विरुद्धवाक्यैः सन्देहे जाते सूत्रप्रवृत्तिरिति भावः। ननु विरुद्धधर्माश्रयत्वे कल्पना स्यादित्यत आहुः—'**भूषणाये**'ति। 'अपाणिपादो जवनो ग्रहीते'त्यादिश्रुतिप्रतिपाद्यत्वरूपभूषणसत्वे काल्पनिकत्वं नास्तीति भावः। ननु पूर्वसूत्रे कर्तृत्वसिद्धौ ब्रह्मणि विरुद्धधर्माश्रयत्वं सिद्ध्यत्येव तावतैव स्वाभिमतसिद्धौ सत्यां पुनर्ब्रह्मणि समवायित्वस्वीकारो व्यर्थ एव, तदङ्गीकारे च विकृतत्वं गले पतति। लोके घटादिविकारित्वस्य मृत्तिकादौ सत्वादिति समन्वयसूत्रं न कर्तव्यमित्यत आहुः—'**किञ्चे**'ति। '**अन्ये**'ति। ब्रह्मणोऽन्यो यः पदार्थस्तदुपादानिका या सृष्टिर्यथा कुलालो मृदुपादानिकां घटादिसृष्टिं करोति तथा स्वीकृ-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

कानां मुख्यार्थबाधनम्। **जन्मादी**त्यादि। तथा च प्रकृत्यादीनां कारणतानिरासार्थं ब्रह्मणः कारणताव्यवस्थापनाय यथा जन्मादिसूत्रं तथा ब्रह्मणः समवायिकारणताव्यवस्थापनाय समन्वयसूत्रमित्यर्थः। फलितार्थमाहुः—**तथाचे**त्यादि। **वेदान्तार्थः** 'सर्वं खल्विदं ब्रह्मे'त्यादिश्रुत्यर्थः। ननु प्रपञ्चतद्धर्मवैलक्षण्यं प्रपञ्चतद्धर्मरूपत्वं च ब्रह्मणो विरुद्धमत आहुः। **विरुद्धे**त्यादि। **भूषणाय** नहि एतादृशोन्यः कश्चित्सम्भवति इति ब्रह्मण एवासाधारणधर्मत्वाद्भूषणायेत्यर्थः।

अविकृतस्यैव समवायिकारणत्व उपष्टम्भकमाहुः—**किञ्चे**त्यादि। **अन्ये**त्यादि। ब्रह्मातिरिक्तपदार्थस्य ब्रह्मणः सृष्टिकरणे। **वैषम्ये**त्यादि। सृष्टानां जीवानां दुःखादिकारणेन वैषम्यनैर्घृण्ये स्यातामित्यर्थः। ननु शुभाशुभकर्माधीन एव परमात्मा जीवानां सुखदुःखे प्रयच्छति न त्वनधीन इति नोक्तदोष इत्यत आहुः—**कर्मे**त्यादि। **अनीशिता** स्वतःसामर्थ्याभावः। **ततः** अस्वातन्त्र्यात्। **भज्येत** 'स्वतन्त्रः कर्ते'ति तल्लक्षणादस्वातन्त्र्ये भज्येतेत्यर्थः। **ततः** कर्तृत्वभङ्गतः। **सर्वमाहात्म्ये**त्यादि। कर्तृत्वान्यथानुपपत्त्या कल्प्यमानं सर्वज्ञत्वं सर्वशक्तिमत्त्वमपि भज्येतेत्यर्थः।

नन्वेवमेवास्तु, अपदार्थत्वात् । रज्जुसर्पवदयुक्तार्थकथनेपि न दोषः । 'सर्वं समाप्नोषि ततोसि सर्व'मिति स्मृतेश्चेति चेत्—

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

भवति पापः पापेन कर्मणेति । वैषम्यनैर्घृण्ये इति सूत्रं तु लोकबुद्ध्यनुसारि । अन्यथा **फलमत उपपत्ते**रित्यधिकरणं विरुध्येत । नन्वस्वातन्त्र्यात्कर्तृत्वं भज्येतेति यदुक्तं तत्तु परमात्म- **'न्यकर्ता अभोक्त'**त्यादिभिस्तदभावश्रवणादित्याशङ्क्याहुः—**'तत'**इति । परमात्मनोऽकर्तृत्वे कर्तृ- त्वादिप्रतीतस्य सर्वस्यापि माहात्म्यस्य नाश एव भवेदित्यर्थः । नन्वकर्तृत्वस्यैव माहात्म्यसाधकत्वात्त- देवाऽस्त्वित्यत आहुः—**'नन्वि'**ति । ननु तस्याऽकर्तृत्वे कार्यस्य विद्यमानत्वात्कर्त्रन्तराऽभावात्तत्प्रती- त्यनुपपत्तिरित्यत आहुः—**'अपदार्थत्वादि'**ति । सर्वस्याऽपि कार्यजातस्याऽध्यासिकत्वेनाऽपदार्थ- त्वादित्यर्थः ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

तायां सृष्टावित्यर्थः । **'वैषम्ये'**ति । वैषम्यं च नैर्घृण्यं च वैषम्यनैर्घृण्ये । एकस्य सुखवत्त्वकरणमेकस्य दुःखवत्त्वकरणं वैषम्यं, दुःखादिसम्पादनं निर्दयत्वं च ब्रह्मणि स्यातामित्यर्थः । अस्मन्मते तु 'स आत्मान ँ स्वयमकुरुत' 'एकाकी न रमते' 'बहु स्यामि'त्यादि, 'निर्विकारी निरञ्जन' इति श्रुत्या निर्विकारित्वमपि स्वीकर्तव्यं, श्रुतिप्रामाण्यात् । स्वसृष्टौ स्वयमेव जगद्रूपेण क्रीडतीति वैषम्यनैर्घृण्य- सम्भावनापि नास्ति । समवायित्वं विना जगद्रूपत्वं च न सम्भवतीत्यतः समन्वयसूत्रं कर्तव्यमिति भावः । एतच्च द्वितीयाध्याये प्रथमे पादे वैषम्यनैर्घृण्येति सूत्रे व्युत्पादयिष्यते । ननु कर्माधीनत्वे वैषम्यादिदोषो नास्तीत्यत आहुः—**'अनीशिते'**ति । पुनः शङ्कते—**'नन्वि'**ति । **अपवादार्थ- त्वादि'**ति । अपदार्थत्वादित्यपपाठः । कर्तृत्वं श्रुत्या यत्प्रतिपाद्यते तदपवादार्थमेव वस्तुतः कर्तृत्वं ब्रह्मणि नास्तीति न विरुद्धधर्माश्रयत्वमिति भावः । नन्वेवं विद्यमानार्थकथनरूपाऽप्रामाण्यापत्तिरित आह—**'रज्जुसर्पवदि'**ति । अपथगामिनि बालके भयप्रदर्शनार्थं रज्जुं प्रदर्श्य सर्पोऽयमित्युच्यते

श्रीलालूभट्टकृता गूढार्थदीपिका ।

ननु श्रुत्युक्तत्वात्कर्तृत्वं यथाद्रियते तथा श्रुत्युक्तत्वादकर्तृत्वमेव कुतो नाङ्गीक्रियत इत्याह— **'नन्वेवमेवास्तु'** इति । अकर्तृत्वमेवास्त्वित्यर्थः । ननु तर्हि श्रुतिपठितस्य कर्तृत्वस्य का गतिरित्या- शङ्क्याऽऽह—**'अपवादार्थत्वादि'**ति । श्रुतौ कर्तृत्वं यदुक्तं तस्याऽपवादार्थत्वात् । कर्तृत्वमपवा- दार्थमुक्तम् । प्राप्तिं विना निषेधस्य कर्तुमशक्यत्वादिति भावः । नन्वस्तु कर्तृत्वकथनमपवादार्थं तथापि **स हैतावानास स आत्मान ँ स्वयमकुरुते**त्यादिवाक्यानां का गतिरित्याशङ्क्य समादधते—**'रज्जुसर्पवदयुक्तार्थे'**त्यादिना । न ह्यत्र मृदो घटकारणतेव ब्रह्मणो जगत्समवायि

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

ननु निष्कलं शान्तमित्यादिवाक्यप्रतिपाद्ये ब्रह्मणि कर्तृत्वादिधर्मशून्यत्वमेव माहात्म्यमित्थं चोक्तधर्मरूपमाहात्म्यनाशे इष्टापत्तिरित्यत आहुः—**नन्वेव**मित्यादि । **एवमेव** शुद्धस्य परब्रह्मणः कर्तृत्वादिधर्मशून्यत्वमेवास्त्वित्यर्थः । ननु ब्रह्मणोऽकर्तृत्वेतिरिक्तस्य च कर्तुरभावे प्रपञ्चो न भवेदत आहुः—**अपदार्थे**त्यादि । तथा च नावस्तुनः खपुष्पादेः कर्त्राकाङ्क्षास्तीति भावः । नन्ववस्तुत्वे प्रपञ्चस्य वस्तुत्वेन प्रतीतिर्न स्यादत आहुः—**रज्जुसर्पे**त्यादीति । तथा चावस्तुत्वेपि विशेषादर्शनदशा-

१ अपवादार्थत्वादिति पाठो गूढार्थदीपिका–विवरणसम्मतः ।

मैवम् । तथा सति पाषण्डित्वं स्यात् । एतादृशशास्त्रार्थाङ्गीकर्तुरासुरेषु भगवता गणितत्वात् । 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसम्भूतं किमन्यत् कामहैतुक'मिति ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

एतदुक्तं भवति । तत्कर्तृत्वस्य ब्रह्मणि साक्षादनुपपत्तेरविद्यासाहचर्येण तत्कथनेऽपि न दोषो न वा प्रतीत्यनुपपत्तिरित्यर्थः । अपवादार्थत्वादितिपाठे तु कर्तृत्वं त्वस्थूलादिवाक्यानुरोधादपवादार्थमेवास्तीति तत्पूर्वं तत्कथनेऽपि नानाप्तकामत्वादिदोषप्रसक्तिर्न वा प्रतीत्यनुपपत्तिः । अविद्याया एवं तदुपरक्तायास्तत्र कारणत्वस्याऽभ्युपेतत्वादित्यर्थः । तत्र दृष्टान्तमाहुः—'**रज्जुसर्पवदि**'ति । यथा रज्जुसर्पस्य विशेषदर्शननाश्यत्वेनाऽऽध्यासिकत्वेऽपि प्रतीत्युपपत्तिस्तथेदमपीति भावः । साधकान्तरमप्याहुः—'**सर्वे**'मिति । चैतन्यस्य सर्वस्मिन्व्यापकत्वात् । अधिष्ठानत्वेन '**ऐतदात्म्यमि**'त्यादौ कार्यरूपत्वोक्तिर्नतूपादानत्वेनेत्यकर्तैव स इति स्थिते समादधते—'**मैवमि**'ति । प्रपञ्चस्याऽऽध्या-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

तदनन्तरं विनीते तस्मिन् रज्जुरेवेयमित्युच्यते तद्वद्वेदेऽपि माहात्म्यज्ञापनेन वैराग्याद्युत्पत्त्याऽतात्त्विकार्थकथनं, न तु कर्तृत्वादौ तात्पर्यमिति न दोष इति भावः । न'न्वात्मैवेदं सर्वमि'त्यादिश्रुतिस्तु समवायित्वं वदतीत्यत आह—'**सर्वमि**'ति । व्यापकत्वं वदति । न तु समवायित्वम् । अत एव गीतायां विश्वरूपज्ञानानन्तरमेवार्जुनेनोक्तं 'ततोऽसि सर्वमि'ति । समाधानमाहुः—'**मैवमि**'ति । पाषण्डित्वासुरत्वे तु गीतावाक्यं प्रमाणमाहुः—'**असत्यमि**'ति । आसुराः अप्रतिष्ठं, न विद्यते ब्रह्मणि

श्रीलालूभट्टकृता गूढार्थदीपिका ।

कारणतोच्यते । किन्तु रज्वामज्ञानकल्पितसर्पकारणतावद्ब्रह्मणो जगदुपादानत्वं स्वीक्रियते । तथा च यथा सर्पोपादानभूताऽपि रज्जुर्न सर्पगुणदोषाभ्यां संसृज्यते, तथा जगदुपादानं ब्रह्मापि जगद्गुणदोषाभ्यां न लिप्यते । एवं सत्युपादानकारणकार्ययोरभेदाद्ब्रह्मणि कार्याऽभेदरूपार्थस्य कार्यगुणदोषयोजकतयाऽयुक्तस्य रज्जुसर्पवत्कथने दोषो न । रज्जुसर्पाऽभेदस्य रज्जौ सर्पनिष्ठगुणदोषाप्रयोजकत्वात् । अत एव सर्वत्र व्यापकतयैव सर्वरूपत्वं गीतासूक्तमित्याह—**सर्वं समाप्नोषि ततोऽसि सर्वमिति स्मृतेश्चेति चेदि**ति । ब्रह्मणो व्यापकतया सर्वाधिष्ठानत्वेन सर्वरूपत्वम् । न तु सर्वस्य ब्रह्मसमवायिकारणतया ब्रह्माभेदः । एवं सति सर्वस्य ब्रह्मरूपत्वाभावान्मिथ्यात्वम् । **ततोन्यदार्तमि**तिश्रुत्या ब्रह्मातिरेके ह्यसत्यत्वात् । एवं पूर्वपक्षिणा कर्तृत्व उपादानत्वे प्रपञ्चसत्यत्वे च खण्डिते तत्समर्थनायाऽऽहुः—'**मैवं, तथा सती**'त्यादिना । सर्वस्य मिथ्यात्वाङ्गीकारे सतीत्यर्थः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

यां दोषबलाद्यथा रज्जुसर्पज्ञानं तथाऽविद्यादोषबलात्सर्वस्य मिथ्यात्वज्ञानरूपविशेषदर्शनाभावकाले प्रपञ्चस्यापि वस्तुत्वेन भानं नानुपपन्नमित्यर्थः । मिथ्यावादी समाधानान्तरमाह—**सर्व**मित्यादि । तथा च '**सर्वं समाप्नोषी**'ति सर्वं जगद्व्याप्नोषि । '**ततः**' हेतोः '**सर्वमसि**' सर्वपदवाच्योसीत्यर्थः । इत्थं च 'अथेदं सर्वं यदयमात्मे'त्यादिश्रुतिः 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मे'त्यादिरूपा च या श्रुतिः सा ब्रह्मणो व्यापकत्वेन सर्वस्मिन् मिथ्याभूते जगति ब्रह्मगतस्य सत्यत्वाद्यारोपेण ब्रह्मत्वं वदति नतु जगत्समवायिकारणत्वेनेति स्मृतितात्पर्यं वाद्यभिमतम् ।

तद्दूषयन्ति—**मैवमि**त्यादिना । **पाषण्डित्व**मिति । पापलिङ्गित्वं स्यादित्यर्थः । एतदेवोपपादय-

शास्त्रानर्थक्यञ्च, 'सर्वं समाप्नोषी'त्यप्यसङ्गतं स्यात्, वस्तुपरिच्छेदात्। नहि वेदो निःप्रपञ्चरूपकथनमुक्त्वा स्वोक्तं जगत्कर्तृत्वं निषेधति। तस्मादध्यारोपापवादपरत्वेन व्याख्यातृ-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

सिकत्वाङ्गीकर्तुः पाषण्डित्वं स्यात्। वेदविरुद्धपदार्थाभ्युपगम एव पाषण्डित्वमिति हि स्थितिः। कथमेतस्य वेदविरुद्धत्वमित्यत आहुः—'**तादृशे**'ति। शास्त्रार्थो वेदार्थः। दूषणान्तरमाहुः—'**शास्त्रानर्थक्यं चे**'ति। शास्त्रस्य ब्रह्मकारणत्वोपपादकस्य जन्माद्यस्य यत इत्यादेरानर्थक्यं स्यात्। तस्याऽकर्तृत्वादित्यर्थः। पुनर्दूषणान्तरमाहुः—'**सर्वमि**'ति। ब्रह्मणो निमित्तत्वे कार्यस्य तदन्यत्वात्तद्व्याप्तिर्ब्रह्मणो न सम्भवति। तत्र हेतुमाहुः—'**वस्त्वि**'ति। लोके हि वस्तुना कार्येण सह कर्तुः परिच्छेदाद्भिन्नतया स्थितेर्दर्शनात्तन्न्यायेनाऽत्रापि तथा भविष्यतीत्यर्थः।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

प्रतिष्ठा यस्येत्यप्रतिष्ठम्। न विद्यत ईश्वरो नियन्ता यस्येत्यनीश्वरम्। अपरस्परं योषित्पुरुषसम्बन्धं विना संभूतमेतादृशमेव जगत्। काम एव प्राणिनां कारणमन्यन्न किमपीत्यर्थः। इत्याहुरिति गीतावाक्यार्थः। अत्रेदमाकूतं—अध्यारोपवादिमते शास्त्रप्रवृत्तिर्हि द्विविधा वक्तव्या। संसारभ्रमनिवारणार्थमीश्वरसत्तासाधनार्थं च। तत्र केवलब्रह्मस्वरूपप्रतिपादकवाक्यैरेव भ्रमनिवृत्तावन्येषां वाक्यानां वैयर्थ्यं स्यात्। अथ च सर्वैरेव स्वमतरीत्या चेतनस्वरूपं ब्रह्मेत्यङ्गीक्रियत एव पुनस्तत्साधनार्थं प्रवृत्तिर्व्यर्थैव। किञ्च, सर्वं समाप्नोषीत्यस्याप्यसङ्गतिः। सर्वस्यापवादार्थत्वेनारोपितत्वादवस्तुत्वेनाव्याप्यत्वादपरिच्छेदकत्वं, बोधकत्वाभावादिति मन्तव्यम्। ननु वेद एव तथा वदतीत्यत आहुः—'**न ही**'ति। निषेधतीत्यने-

श्रीलालूभट्टकृता गूढार्थदीपिका।

'**शास्त्रानर्थक्यं चे**'ति। प्रपञ्चमिथ्यात्वाङ्गीकारे वेदादेः शास्त्रस्यापि मिथ्यात्वेन जीवाज्ञानकल्पितत्वात्कल्पितस्य मिथ्यापदार्थनिवर्तकसाधनोपदेशाऽसमर्थत्वेनाऽऽनर्थक्यं स्यादित्यर्थः। '**सर्वं समाप्नोषीत्यप्यसङ्गतं स्यादि**'ति। सर्वस्य मिथ्यात्वाङ्गीकारे सर्वस्यैव वस्तुतोऽभावाद्व्याप्याऽभावे व्याप्तिकथनस्याऽयुक्तत्वादित्यर्थः। असङ्गतत्वे हेतुमाहुः—'**वस्तुपरिच्छेदादि**'ति। '**स्वोक्तं जगत्कर्तृत्वमि**'ति। प्रतीत्या प्राप्तं लोकानुसारि यज्जगत्कर्तृत्वं तदेव श्रुतिर्निषेधति। **यतो वा इमानि भूतानि जायन्ते एतस्माज्जायते प्राणः स आत्मानं स्वयमकुरुते**त्यादिभिर्वाक्यैर्यत्स्वोक्तं जगत्कर्तृत्वं तन्निषेधति। तथा सति **प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमि**ति न्यायेन जगत्कर्तृत्वोक्तिर्बाध्येतेत्यर्थः। यच्चोक्तं जगत्कर्तृत्वं निषेधार्थं श्रुत्याऽनूद्यत इति। तदप्ययुक्तम्।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

न्ति—**एतादृशे**त्यादि—असति बाधे वेदस्य मुख्यार्थबाधकर्तुः। आसुरत्वरूपफलेन तेषां पाषण्डित्वं द्रढयन्ति—**आसुरेष्वि**त्यादिना। तदेवोपपादयन्ति—'**असत्यमि**'त्यादिना। **असत्यं** मिथ्याभूतम्। **अप्रतिष्ठं** अकाल्पनिकधर्माधर्मतद्व्यवस्थापकप्रमाणशून्यम्। **अनीश्वरं** अकाल्पनिकेश्वरशून्यम्। **अपरस्परसम्भूतं** सर्वस्य कारणकार्यत्वाभिमतस्य मिथ्यात्वात् स्त्रीपुरुषादिरूपकारणजन्यमित्यर्थः। तथा सति सर्वं कथं दृश्यत इत्यत आह—**कामे**त्यादि। तथा चाविद्यमानापि कामिनी यथा कामिना दृश्यते एवं द्वेषादनिष्टमपि दृश्यते तथा मिथ्याभूतमपि दोषात् दृश्यत इति त आहुरित्यर्थः। **शास्त्रानर्थक्यं** ब्रह्मणो जगत्कारणताप्रतिपादकश्रुतिसूत्रवैयर्थ्यम्। **असङ्गतं स्या**दित्युपपादयन्ति—'**वस्त्वि**'त्यादिना। तथा च ब्रह्मणो व्यापकत्वं सर्वात्मकव्याप्यवस्तुपरतन्त्रं, तत्र सर्वस्य मिथ्यात्वे व्याप्यवस्तु-

भिर्वेदान्तास्तिलापः कृता इति मन्यामहे, सर्ववाक्यार्थबाधात् । यथा निर्दोषपूर्णगुणविग्रहता भवति तथोपरिष्टाद्वक्ष्यामः ।

ननु पुरुषार्थार्थानि शास्त्राणि । इदं च शास्त्रं मोक्षरूपपुरुषार्थसाधकम् । मोक्षश्चाविद्यानिवृत्तिरूप इति युक्तम् । अविद्या चाज्ञानं ज्ञानेनैव नश्यति । ततो ज्ञानोपयोगित्वेन व्याख्यातव्ये वेदान्तेऽध्यारोपापवादव्यतिरेकेण व्याख्यानमयुक्तम्, अतो यथाकथञ्चिद्व्याख्यानेपि पुरुषार्थसिद्धेर्न कोपि दोष इति चेत्—

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

ननु कर्तृत्वादिकमुक्त्वा स्वयमेव निषेधतीत्यनुपपत्त्याऽध्यारोपापवादपरत्वेन श्रुतयो व्याख्यायन्त इत्यत आहुः—'**न ही**'ति । ब्रह्मणो निर्विशेषत्वप्रतिपादकानां किं निर्विशेषत्वमात्रे तात्पर्यमुत प्रपञ्चवैलक्षण्य इति सन्देह **उत्तरं पूर्वसन्देहवारक**मित्युक्तेर्गीतावाक्यस्यैव निर्णायकत्वम् । तत्र चाऽ**वजानन्ति मा**मित्यादिना प्रपञ्चसाधारण्येन तज्ज्ञानं निन्दित्वा, **महात्मानस्त्वि**त्यनेन तद्वैलक्षण्येनैव ज्ञानं पुरुषार्थसाधकमित्युक्तम् । तथा **जन्मकर्म च मे दिव्य**मित्यादिना च । एवं निर्विशेषप्रतिपादकानां लौकिकतत्तन्निषेधमात्रपरत्वेन प्रपञ्चवैलक्षण्य एव तात्पर्यं, न तु स्वोक्ततन्निषेधोऽप्यभिप्रेतः । तस्य तदसाधकत्वात् । ननु तत्साधकत्वाभावेऽपि तन्निषेधे बाधकाऽभावात्सोऽप्यत्रास्तीति चेत् । न । **तमेव विदित्वातिमृत्युमेती**त्यत्र तच्छब्देन पूर्वोक्तं सहस्रशीर्षत्वादिविशिष्टमेव परमात्मानं परामृश्य तज्ज्ञानस्यैवेतरनिराकरणपूर्वकममृतत्वसाधकत्वमुक्तमिति न श्रुत्युक्तानामपि धर्माणां निषेधः श्रुत्यभिप्रेत इति सुधीभिराकलनीयम् । नन्वध्यारोपापवादपरत्वेऽपि सामञ्जस्यं **शाखारुन्धतीन्याये** दृष्टमिति कथमेतदनभ्युपगम इत्याशङ्क्योपसंहारेणाऽऽह—'**तस्मादि**'ति । तत्र

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

नान्वितम् । अध्यारोपापवादवादिनमुपहसन्ति—'**कृता**' इति । **अस्पृश्याः** कृता इत्यर्थः । वेदान्तार्थस्पर्शोऽपि तेषां नास्तीति भावः । ननु प्रपञ्चसमवायित्वे कार्यदोषो ब्रह्मणि स्यादत आहुः—'**यथे**'ति । **वक्ष्यामः** । अन्तस्तद्धर्माधिकरण इति शेषः । स एव पुनः प्रत्यवतिष्ठते—'**नन्वि**'ति । **पुरुषार्थार्थानि** पुरुषार्थचातुर्विध्यमेवार्थः प्रयोजनं येषां तानि । **इदं च** वेदान्तशास्त्रं च ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

अनुवादं विनापि निषेधस्याऽजरममरमित्यादिश्रौतवाक्येषूपलभ्यमानत्वात् । नहि कुत्राप्युपनिषत्सु ब्रह्मणि जरामरणादिकमनूदितमस्ति । न च प्राप्तिं विना निषेधो न स्यादिति वाच्यम् । भ्रान्तप्रत्ययेन प्रसक्तस्य सुखेन निषेद्धुं शक्यत्वात् । एवं सति लोकप्रतीत्या प्राप्तं यत्कुलालादितुल्यं कर्तृत्वं तस्यैव

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

नोऽभावे व्यापकत्वमपि मिथ्यैव भवेदिति फलितम् । समाधानान्तरमाहुः—**न हीत्या**दिना । तथा 'चापहतपाप्मे'त्यादि 'पूर्णकामं निष्कल'मित्यादि प्रपञ्चविलक्षणं ब्रह्म प्रतिपाद्य यदि स्वोक्तकर्तृत्वं निषेधेत तदा मृषावादित्वेनाप्रामाण्यं स्यात्सर्वस्यापि वेदस्येत्यर्थः । **तिलापः कृताः** अप्रमाणीकृता इत्यर्थः । तदेवोपपादयन्ति—**सर्ववाक्यार्थे**त्यादिना । 'सर्वं खल्वि'ति 'ऐतदात्म्य'मिति 'स आत्मानं स्वयमकुरुते'तिवाक्यानां प्रामाण्यबाधादित्यर्थः । सर्ववेदान्तानां मुख्यार्थे प्रामाण्यार्थमाहुः—**यथे**त्यादि । **उपरिष्टात्** अन्तस्तद्धर्माधिकरणे ।

न । पुरुषार्थस्य शास्त्रार्थस्य वा स्वरूपं शास्त्रैकसमधिगम्यम् । न स्वबुद्धिपरिकल्पितम् । अतः स्वबुद्ध्या शास्त्रार्थं परिकल्प्य तत्र वेदं योजयन्तो महासाहसिकाः सद्भिरुपेक्ष्याः । पुरुषार्थः पुनर्यथा वेदान्तेष्ववगतः । 'ब्रह्म वेद ब्रह्मैव भवति' 'ब्रह्मविदाप्नोति परं' 'न स

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

हेतुमाहुः—'**सर्वे**'ति । तत्र तस्य सामञ्जस्येऽत्यत्र बहूनां वाक्यानामर्थस्य बाधान्नाऽत्र सामञ्जस्यमिति भावः । ननु तस्योपादानत्वे कार्यरूपत्वेन प्राकृतत्वमापद्येतेत्यत आहुः—'**यथे**'ति । नहि कार्यं प्राकृतं, सर्वस्य भगवद्रूपत्वात् । पुरुषः स्वभ्रमादेव तथा पश्यतीत्यादिकमुपरिष्टात्**तदनन्यत्वमारम्भणे**त्यादिषु । पुनः पूर्वपक्षी प्रत्यवतिष्ठते—'**नन्वि**'ति । सर्वाण्यपि हि शास्त्राणि त्रिवर्गसाधकत्वात्पुरुषार्थपर्यवसानानि । वेदान्तशास्त्रं तु मोक्षसाधकत्वात्ततोऽप्यधिकम् । मोक्षस्तु पञ्चपर्वाऽविद्यानाश एव । यतस्तमेवेत्यादिभिर्ज्ञानस्यैव मोक्षसाधकत्वस्य प्रतीयमानत्वात् । ज्ञानस्य चाज्ञाननिरासकत्वात् । तथा च वेदान्तानां ज्ञानोपयोगित्वेनैव मोक्षपर्यवसायित्वस्योपपत्तेर्नाऽध्यारोपापवादव्यतिरेकेण सृष्ट्यादिवाक्यानां तदुपयोगित्वं सम्भवतीति तथैव व्याख्यानेन सर्वोपपत्तौ न किञ्चिद्दूषणमिति स्थिते निषेधन्ति—'**ने**'ति । पुरुषार्थपर्यवसायित्वाऽन्यथानुपपत्त्याऽध्यारोपापवादोऽङ्गीकर्तव्य इति यदुक्तम् । तन्न युक्तम् । यतः पुरुषार्थस्वरूपं श्रुत्येकसमधिगम्यं न स्वबुद्धिकल्पितम् । तस्य संघात-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

'**अज्ञानमि**'ति । भावरूपं नतु ज्ञानाभावः । इदं च योगशास्त्रे प्रसिद्धम् । '**यथा कथञ्चिदि**'ति । तथा च यथा वेदान्तव्याख्यानेन ज्ञानं भविष्यति तथा व्याख्येयम् । ततो ज्ञाने जाते 'ब्रह्मविद्ब्रह्मैव भवती'तिब्रह्मरूपस्वरूपावस्थात्मकपुरुषार्थसिद्धौ सत्यामध्यारोपापवादेन व्याख्यानं युक्तमेवेति भावः । समाधानमाहुः—'**ने**'ति । पुरुषार्थस्य मोक्षस्य । **महासाहसिका** इति । तथा च भवद्रीत्याऽविद्यानिवृत्तिरूपो मोक्षोऽध्यारोपापवादेन व्याख्यानरूपः शास्त्रार्थोऽपि नास्तीति भावः । ननु भवन्मते कीदृशो मोक्ष इत्यत आहुः—'**पुरुषार्थ**' इति । **अवगत** इति । तथा मन्तव्य इति शेषः । येषु वाक्येष्ववगतस्तानि वाक्यान्याहुः—'**ब्रह्म वेदे**'ति । इदं वाक्यपञ्चकं, ब्रह्मभावः,

श्रीलालूभट्टकृता गूढार्थदीपिका ।

श्रुत्या निषेधः क्रियते । न तु परमालौकिकस्य मनसाप्याकलयितुमशक्यस्य स्वोक्तकर्तृत्वस्य । अत एव जन्मादिसूत्रभाष्ये समवोचद्भगवान् भाष्यकारः **प्रतीतं च निषेध्यं नाप्रतीतं न श्रुतिप्रतीत**मिति । ननु कारणत्वमात्रस्वीकारे दोषाऽभावेऽपि समवायिकारणतास्वीकृतौ कार्यकारणयोरभे-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

अध्यारोपापवादखण्डनंमसहमानस्तद्वादी पुनः प्रत्यवतिष्ठते—'**नन्वि**'त्यादिना । **पुरुषार्थार्थानि** पुरुषार्थचतुष्टयसम्पत्तिबोधकानि । **इदं च** वेदान्तरूपं च । **अज्ञानं** पञ्चपर्वात्मकं न तु ज्ञानाभावरूपम् । तथा सत्यहमज्ञ इति प्रत्यक्षानुपपत्तेः । तथा हि अहमज्ञ इति च धीर्ज्ञानसामान्याभावविषयिणी वाच्या । अभावप्रत्यक्षस्य प्रतियोगिज्ञानजन्यत्वनियमात् । प्रतियोगिज्ञानसत्त्वे च ज्ञानसामान्यभावस्य वक्तुमशक्यत्वात् । तथा चाहमज्ञ इति प्रत्ययप्रकारगता पञ्चसु सर्वेष्वेव वाच्या नत्वभावे इति फलितं बोध्यम् । **ज्ञानेनैव** मिथ्यापदार्थव्यावृत्तब्रह्मज्ञानेनैव । **व्याख्यानं** वेदान्तानां व्याख्यानम् । **यथाकथञ्चित्** अध्यारोपापवादप्रकारेणापि ।

पुनरावर्त्तते', 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरं' 'अनावृत्तिः शब्दादनावृत्तिः शब्दादि'त्येवमादिभिः श्रुतिस्मृतिन्यायैः ब्रह्मप्राप्तेरेव पुरुषार्थत्वं, ब्रह्म च पुनर्न जीवस्यात्ममात्रमज्ञानवद्वा । 'एकस्यैव ममांशस्य जीवस्यैव महामते । बन्धोऽस्याविद्ययानादिर्विद्यया च तथेतर' इति भगवता जीवस्यैवाविद्यावत्त्वप्रतिपादनात् ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

निवृत्त्यनन्तरभावित्वेन पूर्वं तज्ज्ञानस्य श्रुतिं विनाऽसम्भवात् । तथा च स्वबुद्ध्या **शास्त्रार्थं** शास्त्रस्य वेदान्तस्यार्थं, प्रयोजनं फलं पुरुषार्थं मोक्षरूपं परिकल्प्य कथं तत्र वेदः सर्वोऽपि योजयितुं शक्यः । ज्येष्ठप्रमाणस्याऽपौरुषेयत्वेन निरस्तसमस्तदोषाशङ्कस्य प्रमाणान्तरानुरोधेन नेतुमशक्यत्वात् । नयने वा साहसमात्रत्वात्सतामसम्मतमेवेत्युपेक्षाविषयत्वं न व्यभिचरतीति सर्वं सुस्थम् ।

तर्हि कीदृशः शास्त्रार्थ इत्याकांक्षायां तत्स्वरूपमाहुः—**'पुरुषार्थ'**इति । तदेवाहुः—**'ब्रह्म वेद'**-ति । ननु ब्रह्मप्राप्तेः कथं पुरुषार्थत्वम् । प्राप्यप्रापकभावस्य भेदसिद्ध्यधीनत्वात् । जीवस्य चाभेदबोधकश्रुत्यनुरोधेन ब्रह्मरूपत्वादित्याशङ्क्याऽऽहुः—**'ब्रह्म चे'**ति । नहि जीवमात्रं ब्रह्मेति वक्तुं शक्यम् । **सर्वं एवात्मानो व्युच्चरन्ती**त्यादौ जीवातिरिक्तस्यांऽशिनः प्रतीयमानत्वात् । दूषणान्तरमाहुः—

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

परप्राप्तिः, संसारेऽनावृत्तिः, परप्राप्तिस्वरूपं, जन्यभावनश्वरत्वयोर्व्याप्तिनिराकरणं, एतत्पञ्चकं बोधयति । **'पुरुषार्थत्वमि'**ति । भवतीति शेषः । तथा च श्वेताश्वतरोपनिषदि मायानिवृत्तिरेव मोक्षः । तैत्तिरीये ब्रह्मज्ञानेन मायानिवृत्तौ परप्राप्तिरेव मोक्षो नत्वविद्यानिवृत्तौ । एकादशस्कन्धे विद्याविद्ययोर्मायाजन्यत्वस्योक्तत्वेन मायाविद्ययोर्भेदादिति भावः । नन्वविद्यावतो जीवस्य ब्रह्मस्वरूपस्य परमव्योमात्मकत्वसम्पादनरूपत्वेन ब्रह्मणोऽप्यविद्यावत्त्वं तस्य पुनः सर्वत्र सत्वात्कथं परप्राप्तिरुच्यत इत्यत आहुः—**'ब्रह्मे'**ति । **'आत्ममात्रमि'**ति । 'मात्रं कार्त्स्न्येऽवधारणे' इत्यमरात्कृत्स्नात्मस्वरूपमि-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

दात्कार्यगता दोषा ब्रह्मणि प्रसज्येरन्नित्याशङ्क्याऽऽहुः—**'यथा निर्दोषपूर्णगुणविग्रहते'**त्यादि । **'यथाकथञ्चिद्व्याख्यानेऽपी'**ति । श्रुतीनां मुख्यार्थबाधेन व्याख्यानेऽपीत्यर्थः । **'जीवस्याऽऽत्ममात्रमि'**ति । देहेन्द्रियप्राणान्तःकरणात्मकभेदेन पञ्चात्मको यः सङ्घातस्तत्र सङ्घाते यो जीवः स आत्मा तदेव ब्रह्मेति न । किन्तु सर्वस्य प[1]

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

स्वबुद्धिपरिकल्पितं अवैदिकावध्यारोपापवादौ कल्पयित्वा सर्वेषां वेदान्तानां निर्धर्मके ब्रह्मणि तात्पर्यकल्पनं शास्त्रार्थ इति स्वबुद्धिकल्पितम् । **तत्र** स्वबुद्धिकल्पिततात्पर्याविषये । **महासाहसिकाः** लोकेऽविचारितकर्तारः साहसिकाः, वेदार्थातिक्रमेणाविचारितवक्तारो महासाहसिका इत्यर्थः । वादिमतसिद्धं पुरुषार्थं खण्डयित्वा सिद्धान्ते पुरुषार्थस्वरूपमाहुः—**पुरुषार्थ** इत्यादिना । ननु जीवब्रह्मणोश्चैतन्यव्यक्तिभेदाभावात्, प्राप्तेश्च भेदपूर्वकत्वनियमाद्ब्रह्मप्राप्तेः कथं पुरुषार्थतेत्यत आहुः—**ब्रह्म चे**त्यादि ।

१ अत्राऽपि पुस्तकाभावात्पुनरग्रिमग्रन्थस्त्रुटितः ।

तस्मान्न्यायोपबृंहितसर्ववेदान्तप्रतिपादितसर्वधर्मवत् ब्रह्म । तस्य श्रवणमनननिदिध्यासनैरन्तरङ्गैः शमदमादिभिश्च बहिरङ्गैरतिशुद्धे चित्ते स्वयमेवाविर्भूतस्य स्वप्रकाशस्य सायुज्यं परमपुरुषार्थः । तस्मात् सर्वे वेदान्ताः स्वार्थ एव युक्तार्था इति न्यायैर्वक्तव्यत्वात् ब्रह्मणः समवायित्वाय समन्वयसूत्रं वक्तव्यम् एवं ब्रह्मजिज्ञासां प्रतिज्ञाय किंलक्षणकं ब्रह्मेत्याकाङ्क्षायां जन्मादिसूत्रद्वयेन वेदप्रमाणकजगत्कर्तृ समवायि चेत्युक्तं, एवं त्रिसूत्र्या जिज्ञासालक्षणविचारकर्तव्यता सिद्धा ।

इति प्रथमाध्याये प्रथमपादे तृतीयं समन्वयाधिकरणम् ॥

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

'अज्ञानवद्वे'ति । अज्ञानमविद्या । नह्यविद्यावत्त्वं ब्रह्मणः केनापि वक्तुं शक्यम् । **एकस्यैव ममांशस्ये**त्यादौ जीवस्यैव तद्वत्त्वश्रवणात् । ततः किमत आहुः—**'तस्मादि'**ति । यस्माद्वेदार्थस्य सर्वस्यापि स्वरूपं न स्वबुद्धिकल्पितं किन्तु शास्त्रैकसमधिगम्यं तस्मादित्यर्थः । श्रुत्यर्थो हि सूत्रानुसारेणोक्तः स्वाभाविक इति ब्रह्मणो वेदार्थत्वेन तत्स्वरूपं पुरुषार्थस्वरूपं चोभयमपि यादृशं वेदान्तेष्ववगतं तादृशमेवेति मन्तव्यम् । एतावन्निरूपणस्य प्रयोजनमाहुः—**'तस्मादि'**ति । अस्थूलादिवाक्यानां स्वार्थपरत्वे तन्न्यायेनाऽन्येषामपि श्रौतत्वात्तत्परत्वस्याऽऽवश्यकत्वात्**तदात्मानं स्वयमकुरुते**त्यादिसमवायित्वप्रतिपादकवाक्यस्थसन्देहनिराकरणार्थं समन्वयसूत्रकथनस्याऽऽवश्यकत्वात्सार्थकत्वमित्यर्थः ॥

इति तृतीयाधिकरणम् ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

मित्यर्थः । **'प्रतिपादनादि'**ति । जीवस्याविद्यावत्त्वांशित्वप्रतिपादनेनांशिब्रह्मप्राप्तिरुचितैवेति भावः । ब्रह्मणः सर्वधर्माश्रयत्वमुपसंहरन्ति—**'तस्मादि'**ति । **'न्यायोपबृंहिते'**ति । न्यायेनोत्तरमीमांसयोपबृंहितः वर्द्धितो यो वेदान्त उपनिषद्भागस्तेन प्रतिपादितमित्यर्थः । **तस्य** सर्वधर्मविशिष्टस्य ब्रह्मणः । **'अतिशुद्ध'** इति । तथा च सर्वेषां साधनानां चित्तशुद्ध्यर्थत्वमेवेति भावः । **'स्वयमाविर्भूतस्ये'**ति । 'नायमात्मा प्रवचनेने'ति श्रुत्या प्रसाद एवाऽऽविर्भावे हेतुरिति स्वयंपदेन द्योत्यते । तथा च 'सोऽश्नुते' इति श्रुत्युक्तं सायुज्यमेव मोक्ष इति भावः । उपसंहरन्ति—**तस्मा**दिति । **स्वार्थ** एव शक्यार्थ एव । न्यायैः उत्तरमीमांसासूत्रैः । सर्वत्र शक्त्यैवोपनिषद्वाक्यप्रतिपादनं व्यासाभिप्रेतमिति भावः । समवायित्वाय समवायिकारणत्वबोधनायैव ।

इति तृतीयाधिकरणम् ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

सिद्धान्तमुपसंहरन्ति—**तस्मा**दिति । **न्यायोपबृंहितं** सर्वव्याससूत्रप्रतिपादितं । **तस्य** सधर्मकब्रह्मणः । **स्वार्थ एव** वाच्यार्थ एव । **समवायित्वाय** 'स आत्मानं स्वयमकुरुते'तिश्रुतिप्रतिपादितसमवायिकारणताव्यवस्थापनायेत्यर्थः । **प्रतिज्ञाय** प्रथमसूत्रेण ब्रह्मविचारप्रतिज्ञां कृत्वा । **इत्युक्तं** निमित्तकारणत्वमसमवायिकारणत्वरूपलक्षणद्वयवद्ब्रह्मेत्युक्तम् । एवं त्रिसूत्रोक्तार्थमुपसंहृत्य सिद्धमाहुः । **त्रिसूत्र्ये**त्यादि

इति प्रथमाध्याये प्रथमपादे तृतीयं समन्वयाधिकरणम् ॥ ३ ॥

